Lastly we refer to the opinion of Mr. Agashe on this point. He first begins by contending that the word Prabandha in Râjashekhara's stanza must be understood in the sense of 'a poetic composition' only and that the Kâvyâdarsha, being professedly a scientific treatise, is not to be included in 'the three Prabandhas of Daṇḍin, famous in the three worlds', because the term Prabandha cannot be properly applied to it. Then he tries to prove in his own way that the author of the Kâvyâdarsha could not have possessed originality and poetical powers enough to entitle him to the proud name of a poet. And lastly he concludes by suggesting the possibility of the existence of three Daṇḍins, *viz.*, Daṇḍin, the critic, the author of the Kâvyâdarsha, Daṇḍin, the third-rate poet, the author of the Dashakumâracharita and Daṇḍin, the great poet, whose three famous compositions (none of which is at present available) Râjashekhara has immortalised in his memorable stanza.

We have already dealt above with the question of the identity of the authorship of the Dashakumâracharita and the Kâvyâdarsha. Here we want to point out that Mr. Agashe's restriction of the sense of 'Prabandha' to a poetic composition is arbitrary and strongly objectionable. Lexicons give Prabandha in the sense of any literary work or composition and we do not

(*h*) Vide his Introduction to the Shringaratilaka pp. 14—20.

(*i*) Vide on this point Böhtlingk's remarks in his Introduction to the K*a*vy*a*darsha.

(*j*) Vide in this connection Weber's History of Indian Literature p. 206.

see any reason why a work like the Kâvyâdarsha should not be included under that heading. Further Mr. Agashe himself is not quite sure whether the Daṇḍin of the Kâvyâdarsha was not really a poet. For he says 'We do not deny that he must have been able to write very elegant verse.' Yet he denies to this Daṇḍin the honour of being a poet, as 'the occasional writing of a few verses cannot surely entitle one to the high distinction of a poet.' As though in sooth the author of the Kâvyâdarsha was expected to make a display of his poetical powers in the work on poetics that he was writing! Further comment on Mr. Agashe's view is unnecessary.

VII *Akhyayika* and Katha.

Ancient writers divide Sanskrit Kâvya into three broad, but by no means scientific divisions, *viz.*, gadya (prose), padya (verse) and mishra (mixed) (*k*). Gadya or prose is a composition which is not in measured lines and is further divided into two kinds, the Âkhyâyikâ and the Kathâ (*l*). It will be noticed from below that Daṇḍin himself did not approve of these two divisions of gadya and believed them to be somewhat arbitrary. Though his Dashakumâracharita does not exhibit the characteristic marks of either of these fully, it is more like an Âkhyâyikâ, according to ancient definitions, than a Kathâ. We therefore proceed to note down the characteristics of these two divisions of prose with a view to enable the student to judge for himself.

Putting together the characteristics of these two classes of prose works given by the Agnipurâṇa and Bhâmaha (*m*), an

---

(*k*) 'गद्यं पद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम् ।' काव्यादर्श 1. 11; 'गद्यं पद्यं च मिश्रं च काव्यादि त्रिविधं स्मृतम् ।' अग्निपुराण 337. 6.

(*l*) 'अपादः पदसंतानो गद्यमाख्यायिका कथा । इति तस्य प्रभेदौ द्वौ ' काव्यादर्श 1. 23. अग्निपुराण, however, divides गद्य into five kinds: ' अपदः पदसंतानो गद्यं तदपि गद्यते 9... आख्यायिका खण्डकथा कथा परिकथा तथा । कथानिकेति मन्यंते गद्यकाव्यं च पञ्चधा ॥ 12' अध्याय 337.

(*m*) ' कर्तृवंशप्रशंसा स्याद्यत्र गद्येन विस्तरात् । कन्याहरणसंग्रामविप्रलम्भविपत्तयः ॥ 13 भवन्ति यत्र दीप्ताश्च रीतिवृत्तिप्रवृत्तयः । उछ्वासैश्च परिच्छेदो यत्र या चूर्णिकोत्तरा ॥ 14 वक्त्रं वापरवक्त्रं वा यत्र साख्यायिका मता ॥' 'श्लोकैः स्ववंशं संक्षेपात्कविर्यत्र

ancient rhetorician, we gather that: (1) In an Âkhyâyikâ there is a detailed eulogy of the poet's family in prose; while in a Kathâ the poet briefly praises his family in verse. (2) In an Âkhyâyikâ such topics as the kindnapping of a girl, battles, separation of the hero are described; in a Kathâ it is not so. (3) In an Âkhyâyikâ it is the hero who relates his own deeds; in a Kathâ the story is told by others and not by the hero. (4) An Âkhyâyikâ is divided into sections called Uchchhvâsas and contains stanzas in the Vaktra and the Aparavaktra metres, which are suggestive of future events; a Kathâ may not be divided into sections and if it is, they are called Lambakas. (5) An Âkhyâyikâ is distinguished by the possessions of certain catchwords which the poet intentionally puts in; in a Kathâ it is not so. With slight variations Daṇḍin in his Kâvyâdarsha (*n*) notes these characteristics of the Âkhyâyikâ and the Kathâ, criticises the two-fold distinction of Gadya, shows that the characteristics mentioned are not exclusive and comes to the conclusion that both the Kathâ and the Âkhyâyikâ are but two names of the same species of prose composition. From the earliest times it, however, seems to have been acknowledged that an Âkhyâyikâ has to deal with historical matter, leaving very little scope for imagination and it is for this reason that in an Âkhyâyikâ the hero is allowed, against the rules of Hindu propriety, to praise

---

प्रशंसति ॥ 15 मुख्यार्थस्यावताराय भवेद्यत्र कथान्तरम् । परिच्छेदो न यत्र स्याद्भवेद्वा लम्बकैः क्वचित् ॥ 16 सा कथा नाम । ' (अग्निपुराण 337). ' प्रकृतानाकुलश्रव्य–शब्दार्थपदवृत्तिना । गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता ॥ वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम् । वक्त्रं चापरवक्त्रं च काले भाव्यर्थशंसि च ॥ कवेरभिप्राय कृतैः कथनैः कैश्चिदङ्किता । कन्याहरणसंग्रामविप्रलम्भोदयान्विता ॥' ' न वक्त्रापर-वक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि । संस्कृतं संस्कृता चेष्टा कथापभ्रंशभाक् तथा ॥ अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते । स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः ॥ ' भामह 1. 25-26.

(*n*) Vide काव्यादर्श 1 23-30 ' आख्यायिका किल ॥ नायकेनैव वाच्यान्या नायके-नेतरेण वा । स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः ॥ अपि त्वनियमो दृष्टस्तत्राप्य-न्यैरुदीरणात् । अन्यो वक्ता स्वयं वेति कीदृग्वा भेदलक्षणम् ॥ वक्त्रं चापरवक्त्रं च सो-च्छ्वासत्वं च भेदकम् । चिह्नमाख्यायिकायाश्चेत्, प्रसङ्गेन कथास्वपि । आर्यादिवत्प्रवेशः

himself, thus admitting into its fold such works as autobiographies. A Kathâ was admitted to be the work of imagination with very little truth in it (*o*). Rudra*t*a in his Kâvyâlankâra has defined the Kathâ and the Âkhyâyikâ (*p*), forming his definitions apparently on the models of the Kâdambarî and the Harishacharita the two standard specimens of these kinds of prose composition. Ânandavardhana refers to the Kathâ and the Âkhyâyikâ in his Dhvanyâloka when he lays down certain restrictions on the use of long compounds (*q*).

Abhinavagupta distinguishes between these two classes of composition by saying that while the Âkhyâyikâ is possessed of sections called Uchchhvâsas and of stanzas in the Vaktra and the Aparavaktra metres, the Kathâ is free from such characteristics (*r*). Vidyânâtha in his Pratâparudrayashobhushana characterises the Âkhyâyikâ somewhat in a similar fashion (*rr*).

किं न वक्त्रापरवक्त्रयोः । भेदश्च दृष्टो लम्भादिरुच्छ्वासो वास्तु किं ततः ॥ तत्कथाख्या-यिकेत्येका जातिः संज्ञाद्वयाङ्किता । अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ॥ कन्याहरण-संग्रामविप्रलम्भोदयादयः । सर्गबन्धसमा एव नैते वैशेषिका गुणाः ॥ कविभावकृतं चिह्न-मन्यत्रापि न दुष्यति । मुखमिष्टार्थसंसिद्धयै किं हि न स्यात् कृतात्मनाम् ॥'

(*o*) Vide the definitions of these words given by the Amarakosha: 'आख्यायिकोपलब्धार्था ।' 'प्रबन्धकल्पना कथा'. Also 'गद्यं तु गदितं द्वेधा कथा चाख्यायिकेति च । कथा कल्पितवृत्तान्ता सत्यार्थाख्यायिका मता' (अलंकारसंग्रह). 'प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः । परम्पराश्रया या स्यात् सा मताख्यायिका बुधैः ॥'

(*p*) See काव्यालंकार 16. 20-30

(*q*) 'आख्यायिकायां तु भूम्ना मध्यमसमासादीर्घसमासे एव संघटने' 'कथायां तु विकटबन्धप्राचुर्येऽपि गद्यस्य रसबन्धोक्तमौचित्यमनुसर्तव्यम्' 'तथाहि गद्यबन्धेऽप्यतिदीर्घ-समासा रचना न विप्रलम्भशृंगारकरुणयोराख्यायिकायामपि शोभते' 'तथाह्याख्यायि-कायां नात्यन्तमसमासा स्वविषयेऽपि नाटकादा नातिदीर्घसमासा चेति संघटनाया दिगनु-सर्तव्या' ध्वन्यालोक (निर्णयसागर) pp. 143—144.

(*r*) 'आख्यायिका उच्छ्वासादिना वक्त्रापवक्त्रादिना च युक्ता । कथा तद्वि-रहिता ।' लोचन p. 141.

(*rr*) 'वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम् । वर्ण्यते यत्र काव्यज्ञैरसावाख्या-यिका मता ॥ p. 96 (B. S. S.)

The most modern definitions of the Kathâ and the Âkhyâyikâ are those given by Vishvanâtha, the author of the Sâhityadarpaṇa According to him a Kathâ contains a fine plot in prose with here and there a stray stanza in the Âryâ, Vaktra or Aparavaktra metre; in the beginning there is a salutation in verse and a mention is made of the conduct of the wicked etc. (*s*). An Âkhyâyikâ is similar to a Kathâ but in it we have in addition an account of the poet's family and sometimes of other poets. The divisions of the narrative are styled Âshvâsas which contain in the beginning stanzas in the Âryâ, Vaktra or Aparavaktra metre that are suggestive of future events. (*t*).

VIII A Critical Appreciation.

In the galaxy of Sanskrit authors Daṇḍin is a star of the second magnitude only. Beside the dazzling brilliance of Bâṇa his light fades dim. Yet his Dashakumâracharita enjoys a popularity which, considering its merits, must no doubt be termed unique. Already Sanskrit literature is extremely poor in prose, boasting of about half a dozen good works and a few others, which, though mentioned by poets, are not found at present (*u*). Among

(*s*) 'कथायां सरसं वस्तु गद्यैरेव विनिर्मितम् ॥ क्वचिदत्र भवेदार्या क्वचिद् वक्त्रापवक्त्रके । आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम् ॥' साहित्यदर्पण 6. 332-333. Dr. Peterson reads 'पद्यैरेव विनिर्मितम्' and translates, 'A Katha .. is a narration in prose *of matter already existing in a metrical form* (Introduction to the Kadambari p. 69).

(*t*) 'आख्यायिका कथावत्स्यात् कवेर्वंशानुकीर्तनम् । अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित् क्वचित् ॥ कथांशानां व्यवच्छेद आश्वास इति बध्यते । आर्यावक्त्रापवक्त्राणां छन्दसा येन केन चित् ॥ अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम् ॥' साहित्यदर्पण 6. 334-336. Dr. Peterson reads 'वृत्तं गद्यं क्वचित् क्वचित्' (Ibid p 44).

(*u*) They are दशकुमारचरित, हर्षचरित, कादम्बरी, वासवदत्ता, तिलकमञ्जरी, गद्यचिन्तामणि and वीरनारायणचरित. Besides these B*a*na mentions the prose work of भट्टारहरिचन्द्र (हर्षचरित Introductory stanza 12) and Dhanap*a*la refers to तरङ्गवती and त्रैलोक्यसुन्दरी (तिलकमञ्जरी Introductory stanzas 23, 36). It may be noted that Mr. Agashe's statement that तिलकमञ्जरी has 'not yet found a publisher' is inaccurate. For the book was published by the Nir*n*ay*a*s*a*gara Press **as early as 1903!**

these the Dashakumâracharita of Daṇḍin possesses a few peculiar features which have helped it to gain such great popularity. Appayyâ Dîkshita, the celebrated author of the Kuvalayânanda, is known to have beguiled his leisure hours by writing a metrical abridgement of the Pûrvapîṭhikâ. A similar abridgement in verse of the same portion bears the name of Vinâyaka of whom nothing more is known. A writer calling himself Mahârâjâdhirâja Gopînâtha has written the story of the Pûrvapiṭhikâ in verse, but his work is much more diffuse, being more than three times bigger than the abridgement of either Appayyâ or Vinâyaka. Gopînâtha has also written in prose the story of Daṇḍin's Dashakumâracharita (proper), adding occasional amplification or explanation of incidents in the original. A Kannada writer of the name of Chauṇḍarâja (circa 1300 A. D.) has composed a *Champu* (*v*), called Abhinava Dashakumâracharita, wherein he speaks of Daṇḍin as Kavîshvara (Lord of poets) and of his work as having caused delight and admiration to readers, and remarks that his own performance stands to Daṇḍin's as a character in a drama would to the original (*w*). There is also a Telugu version of the Dashakumâracharita by a poet named Ketana (13th century), who assumed the title Abhinavadaṇḍin, presumably because he rendered Daṇḍin's Sanskrit original into Telugu. We further possess a few well-known stanzas (*x*) of unknown authors, that show us in what

---

(*v*) A *champu* is a work partly in prose and partly in verse. Vide 'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ।' साहित्यदर्पण 6. 336.

(*w*) ' मोदलोळ् दण्डिकवीश्वरं दशकुमाराख्यचरित्रमं
पदपिं संस्कृतभाषेयिं रचिसिदं धात्रीजनरतोत्रसं- ।
मदवप्पं तदनां प्रसिद्धियवताराकारमं नट्टुवं
विदितं रङ्गदोळाडि तोर्प तेरदिं पेळ्वें सुकर्नाटदिम् ॥

अभिनवदशकुमारचरिते आश्वास 1. 17.

(*x*) (1) जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत् ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥

(2) कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः
कोऽहं रण्डे वद क्षिप्रं त्वमेवाहं न संशयः ॥

passionate admiration Daṇḍin was held by the ancients. These circumstances lead to the conclusion that Daṇḍin was a very popular author, and it need not to added that his popularity has not waned in recent times.

The first special characteristic of Daṇḍin's Dashakumâracharita, which distinguishes it from other similar works, is that it is written in a simple style. The ease with which we understand the work is the chief cause of its popularity. Belonging as Daṇḍin did to the school of Kâlidâsa, he wrote in what is called the Vaidarbhî style (*y*), the chief features of which, according to the Sâhityadarpaṇa, are sweet words and graceful composition with no,

---

(3) उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥

(4) त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः ।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥ राजशेखरस्य

(5) आचार्यदण्डिनो वाचामाचान्तामृतसंपदाम् ।
विकासो वेधसः पत्न्या विलासमणिदर्पणम् ॥ मधुराविजय 1. 10.

(6) नीलोत्पलदलश्यामां विज्जकां मामजानता ।
वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती ॥ विज्जकायाः शार्ङ्गधरपद्धति No. 180

(7) भासो रामिलसोमिलौ वररुचिः श्रीसाहसाङ्कः कवि-
र्मेण्ठो भारविकालिदासतरलाः स्कन्धः सुबन्धुश्च यः ।
दण्डी बाणदिवाकरौ गणपतिः कान्तश्च रत्नाकरः
सिद्धा यस्य सरस्वती भगवती के तस्य सर्वेऽपिऽते॥ राजशेखरस्य Ibid No. 188

(8) माघश्चोरो मयूरो मुररिपुरपरो भारविः सारविद्यः
श्रीहर्षः कालिदासः कविरथ भवभूत्याह्वयो भोजराजः ।
श्रीदण्डी डिण्डिमाख्यः श्रुतिमुकुटगुरुर्भल्लटो भट्टबाणः
ख्याताश्चान्ये सुबन्ध्वादय इह कृतिभिर्विश्वमाह्लादयन्ति ॥

सुभाषितरत्नभाण्डागारम् p. 38. 71.

(*y*) The Vaidarbhi style is thus defined: 'श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥ 41 इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः । एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि ॥ 42' काव्यादर्श 1; 'समग्रैरोजःप्रसादप्रभृतिभिर्गुणैरुपेता वैदर्भी नाम रीतिः । ...अस्पृष्टा दोषमात्राभिःसमग्रगुणगुम्फि-

or very few compounds. Daṇḍin writes in smooth, simple and elegant prose, which is generally ornamented with the usual figures of speech. There are no recondite allusions, obscure puns, involved constructions, threatening compounds, or obsolete words, that sometimes render the path of a reader of Bâṇa's works difficult. The penchant for alliteration and rhyme, which mars the literary style of the Pûrvapîṭhikâ, is here kept under control and the few instances of these Shabdâlankâras, that occur in Daṇḍin's proper work, serve to heighten the beauty of those passages. Disregard of grammar and syntax, which is the special fault of the Pûrvapîṭhikâ, is here met with very scarcely, if at all. Altogether Daṇḍin has succeeded in giving us a specimen of prose, cultivated yet not elaborate, simple yet not vulgar, dignified yet not difficult.

Daṇḍin's diction is always happy and the choice of his words often exceedingly felicitious. A proverbial stanza (z) assigns to him the palm for the grace of his words and the beauty of his expressions. Though not a master of Sanskrit in the sense in which Bâna was such a master, Daṇḍin yet wields great command over the language. This is evidenced by the fact that he has succeeded in writing a whole chapter (a) without the use of labial letters. Such literary *tour de force* clearly testifies to the author's great skill and mastery over vocabulary. Daṇḍin uses a large variety of words though their actual number is not counted, as in the case of some Western poets. They are generally of common occurrence and out-of-the-way words are very rarely found, if at all.

Daṇḍin possesses considerable powers of imagination and description. Here, however, he has to labour under a disadvantage,

---

ता । विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥ ' वामन's वृत्ति on का. सू. 1. 2 11; ' माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ॥ 2 अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते । ..8' साहित्यदर्पण 9. The last definition should be carefully noted by the student.

(z) Vide stanza No. 3 in note (x) p. LV above.

(a) Vide the account of Mantragupta contained in Uchchhvasa 7. The reason why Mantragupta avoided the labials in the narration of his adventures is rather romantic and contained in the following lines: ' स किल करकमलेन किंचित्संवृताननो ललितवल्लभारभसदत्तदन्तक्षतव्यसनविह्वलाधरमणिर्निरौष्ठ्यवर्णमात्मचरिमाचचक्षे ' p. 119 (Agashe).

as his performance is naturally compared with that of Bâṇa and it is no wonder if Daṇḍin suffers in consequence. Though not a child of nature like Bhavabhûti, Daṇḍin's descriptions of natural phenomena are highly poetical and display his great powers of observation. He often draws upon the fauna and flora of India for the purposes of his description. His references to plants, flowers and animals are, however, conventional and do not on the whole appear to us to indicate that he loved nature to any great extent. He often indulges in exceedingly poetical ideas and conceits which would do credit to any first-class poet. As specimens of his successful description, wherein he makes some approaches to Bâṇa, we may mention the description of the advent of the spring, the meeting of Râjavâhana and Avantisundarî, the sun-set and the sleeping posture of Ambâlikâ (*b*).

While we are dealing with this point it would not be irrelevant to quote Wilson's estimate of Daṇḍin's style. After remarking that it is 'highly cultivated', the Professor goes on observing that it is 'of that elaborate description which has induced native scholars to ascribe to the work the denomination of a Kâvya, or Poem. It is not uniformly, however, of a poetical elevation; and although passages occur in which from the use of compound words of more than ordinary length, from a complicated grammatical structure and from a protracted suspension of the governing term, it may be somewhat difficult to discover the precise meaning; yet in general the language is intelligible as well as elegant and can occasion no great embarassment to a practised scholar, while it affords him a useful example of classical prose composition.' He further says that Daṇḍin wrote 'at a period at which although not yet wholly currupted, an elaborate and artificial style of writing had begun to supplant the simple and more elegant models that had been furnished by the writers of the school of Kâlidâsa (*c*).'

Another cause of the popularity of the Dashakumâracharita appears to us to lie in the nature of its subject-matter. This may perhaps sound strange to some readers, but it has an element of

(*b*) Vide pp. 72-73, 76-79, 125, 158-160 of the text.

(*c*) Vide his *Introduction to the Dashakumaracharita* pp. 1, 2.

truth in it, we believe. The Dashakumâracharita treats of the adventures of ten youths, which are generally made up of impersonation and murder, gambling and burglary, abduction and illicit love. Verily such a subject-matter does no great credit to the author, who could easily have found better topics for his pen. But strangely enough stories of adventures like these have a mysterious fascination for a large section of society. This is why the novels of George W. M. Reynolds are widely read, though almost every body is found to condemn them for their general tenor. As one Kumâra after another goes on unfolding his tale of adventures, the reader is almost tempted, like Shakespeare's Desdemona, to love him for the dangers he had passed. In short the subject-matter also, we think, is to a certain extent responsible for the wide popularity of the Dashakumâracharita.

Regarding the topics dealt with, Wilson makes the following observations: ' 'The subjects of the stories of the Dashakumâracharita are those taken from domestic life, and are interesting as pictures of Hindu society for centuries probably anterior to the Mohammedan conquest. The portrait is not flattering; profligacy and superstition seem to be the characteristic features;—not, in general, the profligacy that invades private happiness, nor the superstition that bows down before imaginary divinities, but loose principles and lax morals and implicit faith in the power of occult rites and magical incantations. The picture does not want some redeeming traits, and the heroes are described as endowed with enterprize and hardihood, with inviolable devotedness to their friends and kindred, and with tender and constant attachment to the objects of their affection. The opportunities which are afforded to the youth of both sexes of forming connexions are of remarkable facility; and the absence of any intimation that the bonds, which are so easily contracted, are to be considered of brief duration, gives a character of respectability to the very formal unions which take place. The parties, however, it must be remembered, are of those classes, the regal and military, among whom marriage by mutual consent, the Gândharva Vivâha, is a recognised legal compact (*d*)'.

(*d*) op. cit. pp. 6, 7.

The above description of the state of society revealed by the Dashakumâracharita requires but few additions. The caste-system was in force even as now, but with very important modifications. The Brâhmaṇas were entitled to the highest respect. Marriages between the castes, both of the Anuloma and Pratiloma kind, were common. Ratnodbhava and Apahâravarmâ marry a merchant's daughter and a courtesan respectively, while Satyavarmâ espouses two Brâhmaṇa girls. Poligamy was prevalent and co-wives hated one another. Child or early marriages do not seem to be the order of the day and in the matter of choosing a life-companion young people sometimes set at naught the authority of their parents, who were often actuated, even as now, by considerations of money. The Brâhmaṇas did not feel any scruples in taking food in the houses of those that did not belong to their caste. This is evident from the fact that Râjavâhana stays in the house of Pushpodbhava and passes for an eminent Brâhmaṇa. Idolatry was of course quite common and temples erected in honour of various deities existed. The custom of presenting human offerings to favourite deities prevailed among the lower strata of society. Belief in the efficacy of dreams and in the possession of human beings by evil spirits and supernatural beings were shared by all, and, even as now, scoundrels took advantage of this wide-spread superstition to deceive the gullible. Superstitions of other kinds also enthralled people's minds and were similarly exploited. Festivals in honour of Madana were held. The practice of undertaking long pilgrimages to holy places existed. Jugglery was credited with the power of producing wonderful illusive phenomena. Gambling houses were kept in large cities and their keepers held licences from the crown. Courtesans formed a powerful class, having access even to the royal court, and their education was both liberal and elaborate. The police paraded the streets of cities at night for the purpose of keeping watch, but thieves often succeeded in defying them. The education of Princes was well looked after and even arts of thieving, gambling and deception were included in their curriculum. People believed in the existence of former births and the doctrine of Karma or fatalism afforded consolation in adversity. Caravans of merchants moved from place

to place for the purpose of trade and even vessels embarked on distant voyages with the same object.

With reference to the above description of the state of society in Daṇḍin's time one more point deserves to be noted. Attempt is sometimes made to prove how depraved Hindu society once was by pointing to certain social pictures painted in the Dashakumâracharita. The absurdity of such an attempt is self-evident. For though pictures of depraved society occur in the book, he would indeed be an uncritical critic who would therefrom jump to the conclusion that the *whole* of the society was of that type. We must remember that these pictures refer to a *section* of the society and not to the society of the time in general. And what society, even in modern days, is free from such depravity and recklessness, which are confined to one of its sections?

Lastly a word about the general plan and arrangement of the book. The Dashakumâracharita, as observed by the late Vishṇushâstrî Chiplunkar (*e*), does not belong to the class of romances like the Harshacharita, the Kâdambarî or the Vâsavadattâ. It rather falls under the genus of the Panchatantra, the Hitopadesha and the Brihatkathâ and consists of a number of tales loosely strung together, somewhat like the Decamerone of Boccaccio, or the Canterbury Tales of Chaucer. Such being the case, a reader of the Dashakumâracharita is disappointed not to find therein one main sentiment gradually developed and others made subordinate to it so as to heighten its beauty. The two main sentiments of the book are the erotic and the heroic, but these are not artistically developed. There is no such thing as a *denoument* towards which the events described lead. In fact Daṇḍin lacked constructive art the absence of which is visible throughout his work. It is not right to hold him responsible for the Pûrvapîṭhikâ, but the way in which characters are introduced and dismissed in it does not speak creditably of the author's resourcefulness or ingenuity. The way in which Daṇḍin winded his story up is not also known to us. Thus really speaking, in judging of Daṇḍin's art of

(*e*) Vide his संस्कृतकविपंचक pp. 237 and 238.

plot-construction we are at a serious disavantage, as we do not know how exactly he began his tale and how he concluded it. So the above criticism is to be understood as being based upon the Dashakumâracharita as it has come down to us and not as it was originally composed by its author.

* * * *

It is gratifying to find that the conclusion, which we have arrived at in Section V above, regarding the date of Daṇḍin, has the sanction of that venerable old sage, Sir R. G. Bhandarkar. For in his presidential address to the First Oriental Conference, held in Poona in November 1919, he places Daṇḍin, the author of the Dashakumâracharita, in the 6th century, while speaking of the Arthashâstra of Kauṭilya. Says the revered Doctor, 'The earliest notice of Kauṭilya's work is that contained in the Kâmasûtra of Vâtsyâyana in which occur a number of passages which are the same as in Kauṭilya. It is then mentioned by Kâmandaka in the third century, *by Daṇḍin in the sixth century* and by Bâṇa in the seventh century A. D. (The Italics are ours).' The reference by Daṇḍin to Kauṭilya's work, mentioned by Dr. Bhandarkar, occurs in the Dashakumâracharita p. 35, l. 7. (our text).

श्रीवेङ्कटेशो विजयते ।

दशकुमारचरितम् ।

पूर्वपीठिका

कुमारोत्पत्तिर्नाम प्रथमोच्छ्वासः ।

ब्रह्माण्डच्छत्रदण्डः शतधृतिभवनाम्भोरुहो नालदण्डः
क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ।

श्रीवेंकटेशो विजयते ।

श्रीब्रह्मेशेन्द्रदेवैः सनकप्रभृतिभिर्योगिवृन्दैश्च सेव्यः
सृष्टिस्थित्यप्ययादीन् स्थिरचरजगतो लीलया यः करोति ।
संसारोच्छेदहेतोर्हृदि विमलतरे चिन्त्यते यश्च सद्भिः
स स्ताद्भक्तप्रियोंऽहोवनदहनपटुः श्रेयसे नो मुकुन्दः ॥ १ ॥
धर्मध्वंसकरे कुयुक्तिकलिते काले कलेः केवलं
पातिव्रत्यविधासदाचरणयोरादर्शभूताविव ।
प्रख्यातौ विदुषां सतीभिरनघौ वृन्देन चाभिष्टुतौ
तौ वन्दे पितरौ तयोरुपकृतेर्भारं वहन् मूर्धनि ॥ २ ॥
विद्वद्भिश्चरिते नुते दशकुमाराणां कृताः प्राक्तनै-
र्व्याख्या यद्यपि सन्त्यथापि न हि ताः संक्षिप्तरूपत्वतः– ।
छात्राणां मुदमावहन्ति विपुलामित्याकलय्य द्रुतं
तेषां बोधकृते विरच्यत इयं टीका मया विस्तृता ॥ ३ ॥
कवीनां मूर्धन्यो ललितपदविन्यासचतुरः
क्व दण्डी वाग्देवी यमवृणुत वश्येव ललना ।
क्व चाहं न क्षुण्णो कविवचसि तादृक्तदपि यत्
समुद्युक्तो व्याख्यातुमिदमहमेषा गुरुकृपा ॥ ४ ॥

अथ कविश्रेष्ठो दण्डिनामा ‘ गद्यं कवीनां निकषं वदन्ति ’ इति लोकप्रसिद्धभाणकस्य सत्यतापरीक्षणाय दशकुमारचरितं नाम काव्यं निर्मित्सुः ग्रन्थस्य निर्विघ्नपरिसमाप्ति-

ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमो वो[1] वितरतु विबुधद्वेषिणां कालदण्डः ॥ १ ॥

प्रचयाग्रुद्देशेन स्वाभीष्टां देवतां स्तोतुमुपक्रमते । ब्रह्माण्डेति । त्रैविक्रमोऽङ्घ्रिदण्डो वो श्रेयो वितरत्वित्यन्वयः । ब्रह्माण्डं सकलभुवनानि तदेव छत्रं तस्य दण्डस्तदाधारो दण्डः। ब्रह्माण्डशब्दस्य भुवनमिति व्याख्यानं न चारु क्षोणीनौकूपदण्ड इति पदेन पुनरपि पृथ्व्या वर्णनादतो भुवनसमुदाय एव तदर्थः । तदुक्तं ब्रह्मवैवर्ते ‘ दिक्पाला द्वादशादित्या रुद्राश्चैकादशापि वा । नवग्रहाष्टौ वसवो देवाः कोटित्रयस्तथा । ...स्वर्गाः सप्त क्रमेण वै । सप्तसागरसंयुक्ता सप्तद्वीपा वसुंधरा । काञ्चनी भूमिसंयुक्ता तमोयुक्तस्थलं ततः । पातालाश्च तथा सप्त ब्रह्माण्डमेभिरेव च ’ ॥ शतधृतेर्ब्रह्मणो भवनं निवासस्थानं जनिस्थानं वा यदम्भोरुट् कमलं तस्य नालदण्डः । रुहबीजजन्मनीत्यस्मात्क्विप् । प्रसिद्धश्च हान्तोऽयं कमलवाचकः । ‘ आस्ये पूर्णशशाङ्कता नयनयोस्तादात्म्यमम्भोरुहाम् ’ इति भामिनीविलासे जगन्नाथोऽप्यूरीचकार हान्तं कमलवाचकं शब्दम् । ‘ भवेच्छतधृतिः पुंसि शक्रे च परमेष्ठिनि ’ इति मेदिनी । क्षोणी पृथ्व्येव नौस्तरणिस्तस्याः कूपदण्डः गुणवृक्षकः। नौकाया वायुप्रेरणं सम्यक्तया भवत्विति तदुपरि वस्त्रबन्धनार्थं स्थाप्यमानो ‘ डोलकाठी’ इति प्रसिद्धो दण्डः कूपकः। ‘ कूपको गुणवृक्षे स्याद् ’ इति मेदिनी । अनेन च रूपकेण संसृतिसागरनिमग्नानां न भगवच्चरणादृते भिन्नं संतरणमिति द्योत्यते । क्षरन्ती गलन्ती याऽमरसरित्स्वर्गङ्गा सैव पट्टिका ध्वजवस्त्रं तस्याः केतुदण्डः । भगवच्चरणतो गङ्गाया निर्गमात्तस्याश्च शुभ्रत्वात्पट्टिकारूपकं चरणे च तदनुगुणं केतुदण्डरूपकम्। ज्योतिषां नभसि स्थितानां तेजसां चक्रं तस्याक्षदण्डस्तदवयवीभूतस्तदाधारभूतो दण्डः।‘अक्षो रथस्यावयव ’ इति हेमचन्द्रः । ज्योतिषु चक्रसंबन्धात्तदाधारे भगवच्चरणेऽक्षदण्डतादात्म्यम् । त्रैविक्रमस्त्रिविक्रमस्य वामनस्यायम् । तस्येदमित्यण् । त्रयाणां भुवनानां समाहारस्त्रिभुवनम् । तद्धितार्थेत्यनेन समासः। तस्य विजयस्य स्तम्भदण्डो विजयसूचकः स्तम्भोऽङ्घ्रिदण्डो दण्ड इवाङ्घ्रिः । उपमितं व्याघ्रादिभिरित्यनेन समासः । विशेषणेषु सर्वेषु च सुप्सुपेत्यनेन समासः। विबुधान् सुरान् द्विषन्ति तेषामसुराणां कालदण्डो यमः। सुप्यजातावित्यनेन ताच्छील्ये णिनिः । तेन चासुराणां सुरविद्वेषः स्वभाव इति द्योत्यते । अत्र च प्रतिविशेषणमुक्तरूपकसाधकं पूर्वरूपकमिति परम्परितरूपकालंकारः। तल्लक्षणं तु ‘ नियतारोपणोपायः स्यादारोपः परस्य यः । तत्परम्परितम् ’। तच्च रूपकं यमकसंमिश्रमिति शब्दार्थालंकारयोः संसृष्टिः । अत्र च प्रतिरूपकमभिन्नार्थं दण्डपदं प्रयुञ्जानस्य कवेः स्वनामैकदेशप्रथनादृते नान्यो हेतुरिति मन्यामहे । अन्यथाऽनवीकृतत्वदोषदुष्टप्रयोगे किं निमित्तं स्याद् । श्लोके चास्मिन्

---

१ ‘ ते ’ व–ब–न.

1 अस्ति समस्तनगरीनिकषायमाणा शश्वदगण्यपण्यविस्तारितमणिगणादिवस्तुजातव्याख्यातरत्नाकरमाहात्म्या मगधदेशशेखरीभूता पुष्पपुरी नाम नगरी। तत्र वीरभटपटलोत्तरङ्गतुरङ्गकुञ्जरमकरभीषणसकलरिपुगणकटकजलनिधिमथनमन्दरायमाणसमुद्दण्डभुजदण्डः, पुरंदरपुराङ्गणवनविहरणपरायणगीर्वाणतरुणगणिकागण-

---

समात्तपुनरात्तत्वरूपदोषः। वितरतु सततमित्यनेनैव वाक्यपरिसमाप्तेः 'विबुधद्वेषिणां कालदण्ड' इति वर्णनं पुनरुपात्तं तेन च दुष्टमिदं काव्यम्। केचित्तु नायकेन स्वद्वेषिणां नाशो विहित इति सूचयितुं तदुपादानाद् 'भवो भवतु भव्याय लीलाताण्डवपण्डित' इत्यत्रेव नात्र स दोष इत्याहुः। स्रग्धरावृत्तं तल्लक्षणं तु 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' इति ॥ १ ॥

एवं स्वाभीष्टां देवतामुपवर्ण्य स्ववर्ण्यं प्रतुष्टावयिषुः तस्य निवासभूतां पुष्पपुरीं वर्णयति। अस्तीति। समस्तानां सकलानां नगरीणां निकष इव कषपाषाण इवाचरति सा। 'कर्तुः क्यङ्०' इत्यनेन क्यङि शानच्। यथा सुवर्णपरीक्षकः कषपाषाणस्तद्वदियं नगरी सकलानामन्येषां नगराणां परीक्षिका। अस्या दर्शनेन तेषां हीनत्वावबोधनादिति भावः। सर्वासां नगरीणां श्रेष्ठेति तात्पर्यम्। 'निकषः शाणफलक' इति विश्वः। शश्वद् वारंवारं अगण्येष्वसंख्येयेषु पण्येषु क्रय्यवस्तुषु विस्तारितानां विक्रेयार्थं स्थापितानां मणिगणादीनां हीरकप्रमुखानां वस्तूनां जातेन समूहेन व्याख्यातं विस्तरतो वर्णितं रत्नाकरस्य सकलरत्नखनेः सागरस्य माहात्म्यं प्रौढिर्यया सा। अस्यां हि पण्यवस्तुषु स्थापितानां रत्नचयानामवलोकनेन सागरस्य रत्नाकरनामत्वं कीदृगिति ज्ञायते। अतो नगरीयं तन्माहात्म्यव्याख्यात्रीति भावः। पण्येत्यवद्यपण्येत्यनेन साधु। मगधदेशस्य शेखरीभूता शिरोभूषणभूता। शेखरादभूततद्भावे च्विः। शेखरशब्दः शिरःस्थमाल्यवाचकोऽपीह भूषणपरः। तत्रेति। वीराः शूरा ये भटा योधाः तेषां पटलान्येवोद्धताः तरङ्गा लहर्यो यस्य सः। प्रादिभ्यो धातुजस्येत्यनेन समासः। तुरंगा अश्वा कुञ्जरा गजाश्च त एव मकरा जलचरास्तैर्भीषणो भयानको यः सकलानां रिपूणां शत्रूणां गणस्य सङ्घस्य कटकः सेनासमूहः स एव जलनिधिः सागरस्तस्य मथने विलोडने मन्दर इव तदाख्यपर्वत इवाचरन् समुद्दण्डः प्रचण्डो भुजदण्डो यस्य सः। यथा मन्दरेणोत्तरङ्गो मकरैर्भीषणोऽपि समुद्रो मथित एवं वीरोत्तरङ्गो गजादिमकरैर्भीषणोऽपि शत्रुसेनासमुद्रो यस्य मन्दरसदृशेन हस्तेन विलोडित इति तात्पर्यम्। मन्दरात्कर्तुः क्यङित्यनेन क्यङि शानच्। पुरन्दरेति। कीर्त्या यशसाऽभित आसमन्तात्सुरभितः सुगन्धिरिति यावत्। कीर्तिं प्रशंसति। पुरन्दरस्येन्द्रस्य पुरं नगरममरावती तस्याङ्गणवने तत्समीपस्थवने नन्दनसंज्ञक इति यावद्विहरणं क्रीडा तत्र परायणाः पारंगताःपाण्डिता

जेगीयमानयातिमानया शरदिन्दुकुन्दघनसारनीहारहारमृणालमरालसुरगजनीरक्षीरगिरिशाट्टहासकैलासकाशनीकाशमूर्त्या रचितदिगन्तरालपूर्त्या कीर्त्याभितःसुरभितः, स्वर्लोकशिखरोरुरुचिररत्नरत्नाकरवेलामेखलावलयितधरणीरमणीसौभाग्यभोगभाग्यवान्, अनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासंभारभासुरभूसुरनिकरः, विरचि-

इति यावद्या गीर्वाणतरुणगणिका देवानां यौवनस्था वेश्या अप्सरस इत्यर्थस्तासां गणेन समूहेन जेगीयमानाऽतिशयेन पुनः पुनर्वा तोष्टूयमाना तया । अप्सरसां देवयोनित्वाज्जराभावेपि तरुणेति विशेषणं तासां क्रीडासक्ततायोतकम् । जेगीयमानेति रूपं गायतेः पौनःपुन्यार्थाद्भृशार्थाद्वा 'धातो रेकाचो हलादे' रित्यनेन यङि घुमास्थेतीत्वे द्वित्वेऽभ्यासस्य जकारे गुणे शानचि च सिध्यति । पुरंदरेति पूःसर्वयोर्दारिसहोरित्यनेन साधुः । अत्यन्तं मानं प्रमाणं यस्यास्तया । शरदृतुसंबन्धी इन्दुश्चन्द्रो कुन्दं पुष्पविशेषः घनसारः कर्पूरः नीहारो हिमम् हारो मुक्तामाला मृणालं कमलनालम् मरालो हंसः सुरगज ऐरावतः नीरमुदकं क्षीरं दुग्धं गिरिशस्य शंकरस्याट्टहास उच्चैर्हास्यं कैलासः शिवनिवासपर्वतः काशस्तृणविशेषः एतैर्नीकाशा सदृशी मूर्तिर्यस्यास्तया । 'घनसारस्तु कर्पुरे' इति मेदिनी । 'किंचिच्छ्रुते विहसितमट्टहासो महीयसि' इति हैमः । गिरिरस्यास्तीति मत्वर्थीयः शो लोमादित्वात् । कीर्तेः शुक्लत्वं कविसमयसिद्धं तदुक्तं 'शुभ्रत्वं कीर्तिपुण्यादौ कार्ष्ण्यं चाकीर्त्यघादिषु' । रचिता कृता दिशामन्तरालस्य मध्यस्य पूर्तिः पूरणं यया तया । सर्वदिग्व्यापिन्येति तात्पर्यम् । स्वर्लोको मेरुस्तस्य शिखर इवोरूणि महान्ति रुचिराणि च यानि रत्नानि तैर्युक्तो यो रत्नाकरः समुद्रस्तस्य वेला मर्यादैव मेखलावलयं काञ्चीवलयं तदस्या संजातं सा, मेखलावलयिता तादृशी धरणी भूमिरेव रमणी प्रमदा तस्याः सौभाग्यस्य सुभगताया भोग उपभोगस्तस्य भाग्यं विद्यते यस्य सः । समुद्रवलयवेष्टितभुव उपभोक्तेति तात्पर्यम् । भूम्या रमणीरूपकचारुत्वाधानार्थं रत्नाकरे काञ्चीरूपकम् । परम्परितरूपकं चेदम् । लक्षणं तु पूर्वमुक्तम् । सौभाग्यभोग एव भाग्यं यस्येति बहुव्रीहिणा निर्वाहेपि कर्मधारयान्मत्वर्थीयः । न च न कर्मधारयेति निषेधः । असुब्वत इति भाष्योदाहरणात्तस्यानित्यत्वात् । अनवरताः सततं क्रियमाणा ये यागा यज्ञास्तेषु दक्षिणा तया रक्षितः पालितः शिष्टविशिष्टानां विद्वदग्रेसराणां विद्यासंभारेण विद्यानां चतुर्दशानां समूहेन भासुराणां दीप्तिमतां भूसुराणां ब्राह्मणानां निकरः समूहो येन सः । 'न पाणिपादचपलो न नेत्रचपलो मुनिः । न च वाङ्गचपल इति शिष्टस्य लक्षणम्' इति महाभारतेऽश्वमेधपर्वणि । 'धर्मो नाधिगतो यैस्तु वेदः सपरिबृंहणः । ते शिष्टा ब्राह्मणाः प्रोक्ता नित्यमात्मगुणान्विता' इति कौर्मे ।

१ 'मेखलायित' न.

तारातिसंतापेन प्रतापेन सतततुलितवियन्मध्यहंसः, राजहंसो नाम घनदर्पकंदर्पसौन्दर्यसोदर्यहृद्यनिरवद्यरूपो भूपो बभूव । तस्य वसुमती नाम सुमती लीलावतीकुलशेखरमणी रमणी बभूव । रोषणेक्षणेन निटिलेक्षणेन भस्मीकृतचेतने मकरकेतने तदा भयेनानवद्या वनितेति मत्वा, तस्या रोलम्बावली केशजालम्, प्रेमाकरो रजनीकरो विजितारविन्दं वदनम्, जयध्वजायमानो मीनो जायायुतोऽक्षियुगलम्,

---

विरचितः कृत अरातिसंतापः शत्रुपीडा येन सः । सूर्योपि तापद इत्युभयोस्तुलना । सततं तुलित उपमितो वियत आकाशस्य मध्ये हंसः सूर्यो येन सः । मध्यपदेन सूर्यस्य प्रखरता द्योत्यते । घनो दृढो दर्पो गर्वो यस्य तत् कन्दर्पस्य मदनस्य सौन्दर्यं तस्य सोदर्यं सदृशं हृद्यं हृदयस्य प्रियं मनोहरमिति यावन्निरवद्यं दोषरहितं रूपं यस्य सः । सोदर्येति ‘ सोदराद्य ’ इत्यनेन साधुः । ‘ हृदयस्य प्रिय ’ इत्यनेन यति ‘ हृदयस्य हृल्लेख ’ त्यनेन हृदादेशः । सुष्ठु मतिर्यस्याः सा । मतिशब्दाद् ङीप् चिन्त्यः । अथवा बाह्वादेराकृतिगणतया ‘ कृदिकारादक्तिन ’ इति गणसूत्रस्थाक्तिन इति प्रतिप्रसवबाधकस्तत्पाठ एतत्प्रयोगात्कल्पनीयः । लीला विलासो विद्यते यासां ताः । ‘ लीला केलिविलासयोः । इति मेदिनी । तासां कुलस्य समूहस्य शेखरमणिः शिरोधार्यालंकारस्थं रत्नम् । ‘ शिखाविन्यस्तमालायामापीडः शेखरोऽपिच ’ इति शब्दरत्नमालानुसारेण शीर्षस्थकुसुमवाचकोऽप्ययमत्रालंकारपर्यायो ग्राह्यः । ‘ कपालमेवामलशेखरश्रीः ’ इतिकुमारसंभवस्थपद्येऽपि भूषणवाचकता तस्य । रमणी रमतेऽस्यामिति व्युत्पत्त्या भर्तुः प्रियेति व्यज्यते । भरतश्च वपुर्गुणोपचारेण सौभाग्येन कान्तं या रमयतीति तल्लक्षणमाह । रोषणं क्रुधाशीलमीक्षणमवलोकनं यस्य तेन । अथवा कर्मधारयः । रोषणं यदीक्षणं तेन । तस्य भस्मीकृत इत्यत्र करणत्वेनान्वयः । ‘ क्रुधमण्डार्थेभ्यश्च ’ इत्यनेन ताच्छील्ये युच् । निटिले भाले ईक्षणं नयनो यस्य तेन शंकरेण । अत्रेक्षतेः करणे ल्युट् । भस्मीकृता दग्धा चेतना यस्य तस्मिन् । अत्र च्वेः प्रयोगो नाभूततद्भावे । प्रायः प्रयोक्तारो नाभूततद्भाव एव च्विमङ्गीकुर्वन्ति । भयेनेति तत्समीपगमने हेतुभूतम् । अनवद्या निर्दोषा । वनितासन्निधिं गतस्य न कापि पीडा भविष्यतीति धिया तत्र गमनम् । तस्या इति । रोलम्बावली तस्याः केशजालमभूदित्यन्वयः । एवमग्रेपि प्रतिवाक्यमनुसंधेयम् । रोलम्बावलिः भ्रमरपङ्क्तिर्मदनधनुषि मौर्वीस्थिता । कृष्णानां केशानां भ्रमरसाम्याद्धरभीत्या मदनधनुर्ज्यास्थिता भ्रमरा तन्नाशे स्वरक्षणार्थं एतस्याः केशरूपेण परिणता इति कल्पना । प्रेम्ण आकरः खनिः । ‘ खनिः स्त्रियामाकरः स्याद् ’ इत्यमरः । इदं विशेषणं केवलं शब्दालंकारसिध्द्यर्थमेवेत्यतो न विशेषचारुतामर्हति । रजनीकरश्चन्द्रः विजितं स्वप्रभया तिरस्कृतमरविन्दं कमलं येन तत् । कमलसंको-

सकलसैनिकाङ्गवीरो मलयसमीरो निःश्वासः, पथिकहृद्दलनकरवालः प्रवालश्चाधरबिम्बम्, जयशङ्खो बन्धुरा लावण्यधरा कंधरा, पूर्णकुम्भौ चक्रवाकानुकारौ पयोधरौ, ज्यायमाने मार्दवासमाने बिसलते च बाहू, ईषत्फुल्ललीलावतंसकह्लारकोरको गङ्गावर्तसनाभिर्नाभिः, दूरीकृतयोगिमनोरथो जैत्ररथोऽतिघनं जघनम्, जयस्तम्भभूते सौन्दर्यभूते विघ्नितयतिजनारम्भे रम्भे चोरुयुगम्, आतपत्रसहस्रपत्रं पाद-

चक्रश्चन्द्रोऽप्यरविन्दजेता हरभयादत्रागतः। तन्मुखं चन्द्र इव मनोहारीति तात्पर्यम्। जयध्वज इवाचरति तथाभूतः। आचारे क्यङि शानच्। अत्र च मीनस्य जयध्वजस्थितत्वाज्जयध्वजे विद्यमान इत्यर्थो लक्षणया बोध्यः। अक्ष्णोर्द्वयस्य सत्वेन जायायुतेति विशेषणम्। सकलेषु सैनिकेष्वङ्गवीरः प्रधानयोधः मलयसमीरो वासन्तानिलः। वासन्तानिलेन वर्धते कामिपिडाऽतः स कामस्य प्रधानयोधः। 'वासन्तो मलयानिल' इति हारावलिः। 'अङ्गं०। क्लीबैकत्वे त्वप्रधाने' इति मेदिन्यनुसारेणाप्रधानवाच्ययं शब्दोऽपि अब्भक्षो वायुभक्ष इतिवत् सावधारणार्थत्वेनास्यैवाप्रधानो नेतरेषामित्यर्थकतया मुख्यवाचक इति ज्ञेयम्। पथिकानां प्रवासिनां वियुक्तानामिति यावद् हृदो हृदयस्य दलनं विदारणं तस्य करवालः खङ्गः। मार्गेण गच्छन्तो वियुक्ताः प्रेयसीस्मारकान् वृक्षप्रवालान् दृष्ट्वा व्यथन्तेऽतः ते तद्धृदयविदारका इति भावः। प्रवालानां च ताम्रत्वादधरसाम्यम्। बिम्ब इवाधरोऽधरबिम्बम्। 'उपमितं व्याघ्रादिभिः' इत्यनेन समासः। जयेति। बन्धुरा हृद्या। 'बन्धूरबन्धुरौ रम्ये नम्र' इति विश्वः। उन्नता रेखात्रययुता ग्रीवा कम्बुग्रीवा सा च सौन्दर्यलक्षणं तस्याश्च गौरायाः शङ्खसाम्यम्। 'कम्बुग्रीवा त्रिरेखा' इत्यमरः। इदं च सुलक्षणं 'रेखात्रयेण च विभूषितकण्ठदेशा' इति। पूर्णकुम्भौ मङ्गलकलशौ। 'भद्रकुम्भः पूर्णकुम्भ' इत्यमरः। चक्रवाकमनुकुरुतस्तौ। पयोधरौ स्तनौ। ज्येव धनुर्गुण इवाचरतस्ते। आचारे क्यङि शानच्। मार्दवे मृदुतायां न समानः सदृशो ययोस्ते बिसलते मृणाललते। लताशब्दोऽलंकारार्थः। ईषत्फुल्लः किंचिद्विकसितः लीलावतंसः क्रीडया भूषणमिति धृतः कल्हारकोरकः कमलकुड्मलः। गङ्गाया आवर्तोऽम्भोभ्रमस्तत्सनाभिः तत्सदृक्। आवर्तनाभित्वं सुलक्षणं तदुक्तं गारुडे ६४ तमेऽध्याये 'यस्यास्तु कुञ्चिताःकेशा मुखं च परिमण्डलम्। नाभिश्च दक्षिणावर्ता सा कन्या कुलवर्द्धिनी' इति। दूरीकृतस्तिरस्कृतो योगिमनोरथो येन सः योगिनां तावद इति यावत्। जैत्रो जयनशीलः। जयतेः 'तृन्' इत्यनेन ताच्छील्ये तृनि प्रज्ञादित्वात्स्वार्थेऽण्। अतिघनमतिनिबिडं विस्तृतमिति यावत्। जघनं कटिपुरोभागः। जयस्तम्भ इव जयस्तम्भभूते मदनजयस्तम्भे इति काल्पते इति यावत्। इवार्थे

१ 'चित्ररथो' ब.

द्वयम्, अस्त्रभूतानि प्रसूनानि तानीतराण्यङ्गानि च समभूवन्निव। विजितामरपुरे पुष्पपुरे निवसता सानन्तभोगलालिता वसुमती वसुमतीव मगधराजेन यथासुखमन्वभावि।

2 तस्य राज्ञः परमविधेया धर्मपालपद्मोद्भवसितवर्मनामधेया धीरधिषणावधीरितविबुधाचार्यविचार्यकार्यसाहित्याः कुलामात्यास्त्रयोऽभूवन्। तेषां सितवर्मणः सुमतिसत्यवर्माणौ, धर्मपालस्य सुमन्त्रसुमित्रकामपालाः, पद्मोद्भवस्य सुश्रुतरत्नोद्भवाविति तनयाः समभूवन्। तेषु धर्मशीलः सत्यवर्मा संसारासारतां बुद्ध्वा तीर्थयात्राभिलाषी देशान्तरमगमत्। विटनटवारनारीपरायणो दुर्विनीतः कामपालो जनका-

---

भूतशब्दः। आशास्यमन्यत्पुनरुक्तभूतमितिवत्। अङ्गीकृतश्चायं कैयटेन मातृभूतः पितृभूत इत्यस्य सिद्धिवेलायाम्। सौन्दर्यभूते इति तु सुप्सुपेत्यनेन साधुः। विघ्निता अन्तरिता यतिजनानां सन्यासिनामारम्भाः तत्कृतकर्माणि तपश्चर्यादीनि याभ्यां ते। रम्भे कदल्यौ तत्संज्ञकाप्सरसौ च। रम्भा च यतिजनविघ्नकारिणी। आतपात्त्रायते तदातपत्रं छत्रं तदेव सहस्रपत्रं कमलं चरणयोः कमलसादृश्यात्तथोक्तिः। अस्त्राणि भूतान्यस्त्रभूतानि सुप्सुपेति समासः। प्रसूनानि कुसुमानि। 'अरविन्दमशोकं च शिरीषं चूतमुत्पलम्। पञ्चैतानि प्रकीर्त्यन्ते पञ्चबाणस्य सायकाः' इति। इतराण्यङ्गान्यन्येऽवयवाः। 'अङ्गं गात्र' इति मेदिनी। अवयवानां पुष्पसादृश्यं मनोहारितया लोभोत्पादकत्वेन च बोध्यम्। विजितं पराभूतममरपुरमिन्द्रनगरं येन तत्र। अमरपुरादपि अधिकसुन्दरे इति यावत्। अनन्तैर्भोगैरुपभोगैर्लालिता क्रीडिता वसुमती तत्संज्ञकस्वमहिषी पक्षे अनन्तेन भोगेषु निजफणासु लालिता धृतेत्यर्थः। वसुमतीव पृथ्वीव। यथासुखं सुखमनतिक्रम्य यथा तथा। एतेन तदुपभोगे सुखस्यैव सत्त्वं द्योत्यते। अन्वभावि भवतेरनुपूर्वात्कर्मणि लुङ्।

तस्येति। परममत्यन्तं विधेया वचनग्राहिणः 'विधेयो वचनग्राही' इत्यमरः। एतेन नृपामात्यानामैकमत्यं द्योत्यते। धीराभिर्गभीराभिर्धिषणाभिरवधीरितं तिरस्कृतं विबुधाचार्येण सुरगुरुणा विचार्यस्य विचारणीयस्य कार्यस्य साहित्यं सहकारिता यैस्ते। स्वबुद्धिप्रकर्षेण सुरगुरुणा संपादनीयकार्यस्य सहकारिता यैस्तिरस्कृतेत्यर्थः। बुद्धिमहिम्ना तमप्यतिशयाना इति तात्पर्यम्। तेष्विति। संसारस्यासारतां निःसत्त्वतां बुद्ध्वाऽवगम्य। तीर्थयात्रामभिलषतीच्छति तच्छीलः। ताच्छील्ये णिनिः। विटा वेश्यासक्ता नटा गायका वारनार्यो वेश्याश्च तासु परायण आसक्तः। अत एवात्यन्तं दुर्विनीतः। 'विटस्तु मूषके। खदिरे लवणे षिड्गे' इति हैमः। जनको धर्मपालोऽग्रजन्मा ज्यायान् भ्राता सुमित्रश्च तयोः। शासनमाज्ञामतिक्रम्योल्लङ्घ्य। वाणिज्यं वणिजो भावः। ब्राह्मणादित्वाद्भावे-

प्रजन्मनोः शासनमतिक्रम्य भुवं बभ्राम। रत्नोद्भवोऽपि वाणिज्यनिपुणतया पारावारतरणमकरोत्। इतरे मन्त्रिसूनवः पुरंदरपुरातिथिषु पितृषु यथापूर्वमन्वतिष्ठन्।

3 ततः कदाचिन्नानाविधमहदायुधनैपुण्यरचितागण्यजन्यराजन्यमौलिपालिनिहितनिशितसायको मगधनायको मालवेश्वरं प्रत्यग्रसंग्रामघस्मरं समुत्कटमानसारं मानसारं प्रति सहेलं न्यक्कृतजलधिनिर्घोषाहंकारेण भेरीझाङ्कारेण हठिकाकर्णनाक्रान्तभयचण्डिमानं दिग्दन्तावलवलयं विघूर्णयन्निजभरनमन्मेदिनी[1]भरणायस्तभुजगराजम-

---

ष्यज्। तत्र निपुणतया कुशलतया। पारावारतरणं परद्वीपगमनम्। परद्वीपस्थजनैः सह क्रयविक्रयमिति यावत्। इतरे सुमतिसुमन्त्रादयः। पुरंदरस्येन्द्रस्य पुरं नगरं तत्रातिथयः तत्र गतास्तेषु। देहपातानन्तरं स्वसुकर्मफलभोगाय स्वर्गं गतेष्वित्यर्थः। मृतेष्विति तात्पर्यम्। यथापूर्वं पूर्ववद्। यथार्थेऽव्ययीभावः। अतिष्ठन् पितृवदेव राजशासनमाचरन्नित्यर्थः।

तत इति। नानाविधेष्वनेकप्रकारकेषु महत्स्वायुधेषु शस्त्रेषु यन्नैपुण्यं कौशल्यं तेन रचितान्यगण्यान्यसंख्येयानि जन्यानि युद्धानि यैस्तथाभूता ये राजन्या राजकुमारास्तेषां मौलयः किरीटास्तेषां पालयः पङ्क्तयस्तासु निहिता निवेशिता निशितास्तीक्ष्णाः सायका बाणा येन सः। महत ‘आन्महतः’ इत्यत्यनेन प्राप्तस्यात्वस्याभावोऽसाधुः। ‘महायुध’ इति पाठेन भाव्यम्। राजन्यानां रचितागण्यसंख्येति विशेषणेन शौर्यातिशयस्तद्विजेतृत्वेन च मगधनायकस्य महावीरत्वं च व्यज्येते। राजन्येत्यपत्यार्थे ‘राजश्वशुराद्यद्’ इत्यनेन साधु। ‘मौलिः किरीटे’ इति ‘पालिः कर्णलताग्रेऽश्रौ पङ्क्तौ’ इति च मेदिनी। मगधनायको मगधाधीश्वरः। मालवेश्वरं मालवदेशाधिपं प्रत्यग्रो नवः संग्रामो युद्धं तस्य घस्मरं भक्षकं नवनवसंग्रामजेतारमिति यावत्। ‘सृघस्यदः क्मरच्’ इत्यनेन क्मरच्। अत एव समुत्कटोऽतिशयितो मानो गर्व एव सारो बलमथवा मानः सारश्च यस्य तम्। मानसारं प्रति तत्संज्ञकमालवेशम्। सहेलं सक्रीडम्। अनायासेनेति यावत्। न्यक्कृतो जलधेः सागरस्य निर्घोषस्य गर्जनाया अहंकारो गर्वो येन तेन। समुद्रगर्जनामतिशयानेनेत्यर्थः। भेरीणां दुन्दुभीनां झांकारेण ध्वनिना हठिकमाकर्णनं बलादापतितभेरीशब्दाकर्णनं तेनाक्रांत आगतो भयस्य चण्डिमा प्राचण्ड्यं यं तम्। चण्डाद्भावे इमनिच्। भेरीशब्देन दिग्गजा अपि भीता इति भावः। दिग्दन्तावला दिग्गजास्तेषां वलयं समूहं विघूर्णयन् भ्रमयन्। ‘दन्तशिखात्संज्ञायाम्’ इत्यनेन वलचि ‘वले’ इत्यनेन दीर्घः। ‘दन्ती दन्तावलो हस्ती’ त्यमरः। निजभरेण स्वभारेण नमन्ती अधोभवन्ती मेदिनी पृथ्वी तस्या भरणं धारणं

---

१ ‘भरेणायस्त’ न.

स्तकबलेन चतुरङ्गबलेन संयुतः संग्रामाभिलाषेण रोषेण महताविष्टो निर्ययौ । मालवनाथोऽप्यनेकानेकपयूथसनाथो विग्रहः सविग्रह इव साग्रहोऽभिमुखीभूय भूयो निर्जगाम । तयोरथ रथतुरगखुरक्षुण्णक्षोणीसमुद्भूते करिघटाकटस्रवन्मदधाराधौतमूले नव्यवल्लभवरणागतदिव्यकन्यकाजनजवनिकापटमण्डप इव वियत्तलव्याकुले धूलीपटले दिविषद्ध्वनि धिक्कृतान्यध्वनिपटहध्वानबधिरिताशेषदिगन्तरालं शस्त्राशस्त्रि

तेनायस्तं पीडितं भुजगराजस्य वासुकेर्मस्तकबलं शीर्षसामर्थ्यं येन तेन । भुवं स्वशीर्षेण वहन् वासुकिः बलभाराधिक्यवहने व्याकुल आसीदिति तात्पर्यार्थः । 'मेदिनीभरेण' इति पाठे मेदिन्या भरेण भारेण इत्यर्थस्तस्य चाग्रिमायस्तपदे समासैकदेशे करणत्वेनान्वयः । चतुरङ्गं चत्वारि हस्त्यश्वरथपदातिरूपाण्यङ्गान्यवयवा यस्य तद्बलं सैन्यं तेन संयुतोऽन्वितः । महता रोषेण क्रोधेनाविष्टो युक्तः । संग्रामाभिलाषेण युद्धेच्छया । निर्ययौ निर्जगाम । मालवनाथोपि मानसारोपि । अनेकैर्बहुभिरनेकपानां द्विरदानां यूथैः सङ्घैः सनाथो युक्तः । सविग्रहः शरीरधारी विग्रह इव साक्षाद्युद्धमिव साग्रहोऽभिनिविष्ट इति यावत् । संग्रामे बद्धादर इति भावः । रथा रथावयवभूतचक्रनेमयः । अङ्गिभिरङ्गानां लक्षणया ग्रहणं रथानां तुरगा इत्यर्थस्वीकारे क्षोण्या दलनं रथाश्वैरेव स्यान्नाश्ववाराणामश्वैः परं तन्न युक्तमतोऽत्र रथशब्दस्य तदवयवे लक्षणा । तुरगा अर्थाद्रथे नियुक्ता भिन्नाश्च तेषां खुराश्च तैः क्षुण्णाया विदारिताया क्षोण्या भुवः समुद्भूत उत्पन्ने करिणां गजानां घटाः समूहास्तासां कटेभ्यो गण्डस्थलेभ्यः स्रवन्तीभिर्गलन्तीभिर्मदधाराभिर्धौतमूले दानोदकधाराभिर्धौतं प्रक्षालितं मूलं यस्य तस्मिन् । नव्या नवीनाश्च ते वल्लभाः प्रियाः रणेऽभिमुखे हता अत एव स्वर्गं गन्तारस्तेषां वरणाय स्वीकरणायागतो दिव्यकन्यकानामप्सरसां जनः समूहस्तस्य जवनिकापटमण्डप इव तिरस्करणीपट इव । रणे मृतानां शूराणां स्वीकारायाप्सरसः समागच्छंस्तासां मुखान्यावरीतुं प्रसारितः पटो नु धूलीपटल इति कल्पना । वियत आकाशस्य तले व्याकुलं प्रसृतं तस्मिन् । धूलीनां रजसां पटले समूहे । दिविषद्ध्वनि देवमार्गे स्वर्गे इति यावत् । धिक्कृताः तिरस्कृता अन्ये ध्वनयः शब्दा येन तथाभूतः सर्वशब्दातिग इत्यर्थः तादृशो यः पटहध्वानो भेरीनिनादस्तेन बधिरितं व्याप्तमिति यावदशेषं सकलं दिगन्तरालं दिशां मध्यो येन तत् । शस्त्रैः शस्त्रैश्च प्रहृत्येदं युद्धं प्रवृत्तं शस्त्राशस्त्रि हस्तैश्च हस्तैश्च प्रहृत्येदं युद्धं प्रवृत्तं हस्ताहस्ति । 'तत्र तेनेदमिति सरूपे' इत्यनेन बहुव्रीहिः । 'इच् कर्मव्यतीहारे' इत्यनेनेच् समासान्तः पूर्वपददीर्घश्च । परस्परेणान्योन्येनाभिहतं नाशितं सैन्यं यस्मिंस्तत् । जन्यं युद्धम् । अजनि अभूत् । जायतेर्लुङि दीपजनेत्यनेन चिण्

१ 'मण्डल इव' ख.

हस्ताहस्ति परस्पराभिहतसैन्यं जन्यमजनि । तत्र मगधराजः प्रक्षीणसकलसैन्यमण्डलं मालवराजं जीवग्राहमभिगृह्य कृपालुतया पुनरपि स्वराज्ये प्रतिष्ठापयामास ।

4 ततः स रत्नाकरमेखलामिलामनन्यशासनां शासदनपत्यतया नारायणं सकललोकैककारणं निरन्तरमर्चयामास । अथ कदाचित्तदग्रमहिषी देवी 'देवेन कल्पवल्लीफलमाप्नुहि' इति प्रभातसमये सुस्वप्नमवलोकितवती । सा तदा दयितमनो-

---

कर्तरि । तत्रेति । तत्र तस्मिन्महति युद्धे । मगधराजः मगधेश्वरः । प्रक्षीणं नष्टं हतमिति यावत्सकलं सैन्यं मण्डलममात्याश्च यस्य तं मालवराजं मानसारम् । जीवग्राहं जीवन्तमित्यर्थः । 'स मूलाकृतजीवेषु हनकृञ्ग्रहः' इत्यनेन णमुल् । अभिगृह्य धृत्वा । स्वराज्ये तद्राज्ये प्रातिष्ठापयामास न्यवेशयत् । एतेन तस्यौदार्यातिशयो व्यज्यते । शरणागते च प्रेमापि दृश्यते ।

तत इति । तस्माद्युद्धादारभ्य । स मगधराजः रत्नाकरः सागरो मेखला काञ्ची यस्यास्ताम् । नान्यस्य स्वभिन्नस्य शासनं यस्यां तामिलां पृथ्वीं । 'इलोर्वी वाग्बुधस्त्री गौ' रिति हेमचन्द्रः । शासद्यथाशास्त्रं रक्षन्नित्यर्थः । अनपत्यतया अपत्याभावात् । नारायणं नराणामयनं स्थानम् 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः' इति मनुः । सकलानां लोकानामेकं मुख्यं कारणम् । 'उत्पत्तिः स्थितिसंहारौ नियतिर्ज्ञानमावृतिः । बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराड्' इति स्कांदवचनात् 'यतो वा इमानि भूतानि जायन्ते' इत्युपनिषद्वाक्याच्च नारायण एव सकलजगत्कर्ता । तदेव सम्यक्प्रतिपादितं श्रीमदानन्दतीर्थमुनिवर्यैः जन्माद्यधिकरणे तत्तत एव दिदृक्षुभिर्द्रष्टव्यम् । एतेन वर्णनेन मंगलाचरणश्लोकाच्चायं कविर्विष्णुभक्त इत्यवसीयते । निरन्तरं सततमेतेन दृढभक्तत्वं व्यज्यते । अर्चयामास पूजयामास । अथेति । तस्य मगधस्यनाथस्याग्रमहिषी प्रधाना राज्ञी । 'महिषी कृताभिषेका' इति मेदिन्यनुसारेण महिषीशब्देनैव प्रधानत्वे लब्धेऽग्रपदं स्पष्टार्थम् । देवेन स्वभर्त्रा सह । सहार्थे विनापि तद्योगं तृतीया । कल्पवल्ल्याः कल्पवृक्षस्य फलमाप्नुहि लभस्व । प्रभातसमये उषसि । अनेन स्वप्नस्य सद्यः फलदत्वं सूच्यते । तथा हि ब्रह्मवैवर्ते स्वप्नाध्याये 'दशाहे फलदः स्वप्नोऽप्यरुणोदयदर्शने । प्रातः स्वप्नश्च फलदस्तत्क्षणं यदि बोधितः' इति । सुस्वप्नं समीचीनं स्वप्नम् । पुत्रावाप्तिरूपफलकम् । 'ब्राह्मणो ब्राह्मणी वापि संतुष्टा सस्मिता सती । फलं ददाति यस्मै च तस्य पुत्रो भविष्यति' इति तत्रैव । सा वसुमती । दयितस्य स्वप्रियस्य राजहंसस्य मनोरथस्य मनीषितप्राप्तिरूपफलस्य पुष्पभूतं पुष्पमिव । गर्भं भ्रूणम् । 'गर्भाशयगतं शुक्रमार्तवं

---

1 'आधेहि' ब.

रथपुष्पभूतं गर्भमधत्त। राजापि संपन्न्यक्कृताखण्डलः सुहृन्नृपमण्डलं समाहूय निजसंपन्मनोरथानुरूपं देव्याः सीमन्तोत्सवं व्यधत्त।

एकदा हितैः सुहृन्मन्त्रिपुरोहितैः सभायां सिंहासनासीनो गुणैरहीनो ललाटतटन्यस्ताञ्जलिना द्वारपालेन व्यज्ञापि—'देव, देवसंदर्शनलालसमानसः कोऽपि देवेन विरच्यार्चनार्हो यतिर्द्वारदेशमध्यास्ते' इति। तदनुज्ञातेन तेन स संयमी

जीवसंज्ञकम्। प्रकृतिः सविकारा च तत्सर्वं गर्भसंज्ञितम्' इति भावप्रकाशे। राजेति संपदा ऐश्वर्येण न्यक्कृतो धिक्कृत आखण्डल इन्द्रो येन सः। अनेन विशेषणेनोत्सवे महान् व्ययस्तेन कृत इति सूच्यते। सुहृदां मित्राणां नृपाणां मण्डलं समूहम्। समाहूयाकार्य। निजस्य स्वस्य संपद ऐश्वर्यस्य मनोरथस्य चानुरूपं योग्यम्। सीमन्तोत्सवं सीमन्तो गर्भिणीसंस्कारस्तस्योत्सवम्। तदुक्तं कालविधाने 'चतुर्थषष्ठाष्टममासभाजि सैरेण गर्भे प्रथमं विधेयम्। सीमंतकर्म द्विजभामिनीनाम्' इति व्यधत्ताकरोत्। विपूर्वकस्य दधातेः करोत्यर्थत्वम्।

एकदेति। हितैः पथ्यैः सुहृदो मित्राणि मन्त्रिणः सचिवाः पुरोहिता उपाध्यायाः कुलगुरव इति यावत्तैः। सहार्थे तृतीया। सह भान्ति शोभन्ते विचारकरणादिना यत्र सा सभा तस्याम्। 'अन्येभ्योऽपि०' इत्यनेन डः। सिंहासने नृपस्य श्रेष्ठासने आसीनः स्थितः। 'राज्ञो वरासनं नाम श्रीसिंहासनमुच्यते' इति। आसीन इत्यासेः शानचि 'ईदास' इत्यनेनाकारस्येकारः। गुणैः शौर्यौदार्यादिभिरहीनोऽवर्जितो युक्त इति यावत्। ललाटतटे भालप्रदेशे न्यस्तो निहितोऽञ्जलिः करसंपुटो येन तेन द्वारपालेन द्वाररक्षकेण व्यज्ञापि व्यबोधि। ज्ञपयतेः कर्मणि लुङ्। देव महाराज। 'देवो मेघे सुरे राज्ञि' इति मेदिनी। देवस्य महाराजस्य संदर्शनमीक्षणं तत्र लालसमभिलाषयुक्तं मानसमन्तःकरणं यस्य सः। कोऽप्यज्ञातनामधेयादिक इत्यर्थः। देवेनेत्यस्य विरच्येत्यत्र कर्तृत्वेनान्वयः। विरच्या करणीया या अर्चना पूजा तस्यार्हो योग्यः। भवता पूजनीय इति भावः। यतिः सन्यासी। द्वारदेशम् 'अधिशीङ् स्थासाम्०' इत्यनेन कर्मत्वम्। अध्यास्तेऽधितिष्ठति। तेन नृपेणानुज्ञातोऽनुमोदितस्तेन तेन द्वारपालेनेत्यर्थः। इदं कर्तरि तृतीयान्तमतो मयेति शेष इति विद्योतिनीव्याख्यानमसङ्गतम्। संयमी यतिः। अनायि नीतः। नयतेः कर्मणि लुङ्। **भूपतिरिति**। आयान्तमागच्छन्तं तं यतिं विलोक्य दृष्ट्वा। सम्यक् सुष्ठु ज्ञातोऽवगतस्तदीयस्तत्संबन्धी गूढो गुप्तश्चारभावः गुप्तपुरुषकर्म येन सः। तदीय इति 'त्यदादीनि च' इत्यनेन वृद्धत्वात्तच्छब्दाच्छे निष्पन्नम्। अत्र च 'प्रत्ययोत्तरपदयोश्च' इति त्वदादेश इत्यन्यव्याख्यानम्। निखिलं सकलमनुचरनिकरं सेवकगणं विसृज्य दूरमपसार्य। मन्त्रिजनेनामात्यलोकेन समेतो युक्तः। गुप्तचरानीतवार्ताविचारकाले मन्त्रिणामावश्यकतेति भावः। प्रणतं कृतनमस्कारमेनं तापसम्

नृपसमीपमनायि । भूपतिरायान्तं तं विलोक्य सम्यग्ज्ञाततदीयगूढचारभावो निखिलमनुचरनिकरं विसृज्य मन्त्रिजनसमेतः प्रणतमेनं मन्दहासमभाषत—'ननु तापस, देशं सापदेशं भ्रमन्भवांस्तत्रतत्र भवदभिज्ञातं कथयतु' इति। तेनाभाषि भूभ्रमणबलिना प्राञ्जलिना—'देव, शिरसि देवस्याज्ञामादायैनं निर्दोषं वेषं स्वीकृत्य मालवेन्द्रनगरं प्रविश्य तत्र गूढतरं वर्तमानस्तस्य राज्ञः समस्तमुदन्तजातं विदित्वा प्रत्यागमम्। मानी मानसारः स्वसैनिकायुष्मत्तान्तराये संपराये भवतः

अन्वादेशत्वाद् 'द्वितीयाटौस्स्वेन' इत्यनेनैनादेशः । मन्दोऽल्पो हासो हास्यं यस्मिन्यथा तथाऽभाषतावदत्।

नन्विति। 'ननु प्रश्नेऽप्यनुनय' इति विश्वः। तापस तपः शब्दाद् 'अण् च' इत्यनेन मत्वर्थीयोऽण्। देशमिति जातावेकवचनम्। सापदेशं सव्याजम्। यत्यादिवेषं धृत्वेत्यर्थः। तत्र तत्र यत्र यत्र गतोसि तत्रेत्यर्थः भवता अभिज्ञातमवगतं । कथयत्विति भवच्छब्दस्य कर्तृत्वात्प्रथमपुरुषः। भुवि पृथ्व्यां भ्रमणेन बली समर्थस्तेन। बहुप्रवासेन समागतसामर्थ्य इत्यर्थः। अथवा भुवि भ्रमणे बलं सामर्थ्यं विद्यते यस्य तेन। प्रगत ऊर्ध्वं धृतोऽञ्जलिर्येन तेन। तेन यतिना। अभाषि अवादि। भाषतेः कर्मणि लुङ्। देवेत्यामन्त्रणपदम्। शिरसि मूर्धनि देवस्य श्रीमत आज्ञामादाय स्वीकार्य एनं यतिरूपं निर्दोषं दोषवर्जितं सर्वत्र निःशंकगमनक्षममित्यर्थः। मालवेन्द्रनगरं मानसारराजधानीम्। तत्रोज्जयिन्याम् । गूढतरं गुप्ततरं यथा तथा। समस्तं सकलमुदन्तजातं निखिलवार्तासङ्घं विदित्वा ज्ञात्वा। प्रत्यागमम्। लृदित्वादङ्। मत्समो नास्तीति मननं मानः सोऽस्यास्ति सः। आत्मानं महान्तं मन्यमान इत्यर्थः। स्वस्य सैनिका सेनावर्तिनस्तेषामायुष्मत्ता जीवितावधिस्तस्या अन्तराये विघ्ने संपराये युद्धे। भवतस्त्वत्तः 'पराजेरसोढ' इत्यपादानत्वम्। वैलक्ष्येन लज्जया दैन्येन वा लक्ष्यमाक्रान्तं हृदयं यस्य सः। वीता नष्टा दया यस्य स निर्दय इत्यर्थः। महाकाले तत्संज्ञके तीर्थे निवसति तम्। महाकालं तीर्थं च महाभारते वनपर्वणि 'महाकालं ततो गच्छेन्नियतो नियताशनः। कोटितीर्थमुपस्पृश्य हयमेधफलं लभेत्' इति। अथवा महाकालनिवासी तत्संज्ञक उज्जयिन्यां स्थितो महादेवः। तदुक्तं कथासरित्सागरे 'अस्तीहोज्जयिनी नाम नगरी भूषणं भुवः। हसन्तीव सुधा धौतैः प्रासादैरमरावतीम्॥ यस्यां वसति विश्वेशो महाकालवपुः स्वयम्। शिथिलीकृतकैलासनिवासव्यसनो हर' इति। महादेवस्य महाकालेति नाम तन्निरुक्तिर्यथा महानिर्वाणतन्त्रे 'कलनात्सर्वभूतानां महाकालः प्रकीर्तितः' इति। कालीविलासिनं पार्वत्याः पतिम्। 'काली गौर्याम्' इति मेदिनी। 'महाकालस्य कलनात्त्वमाद्या कालिका परा। कालत्वादादिभूतत्वादाद्या कालीति गीयते' इति तत्रैव महानिर्वाणतन्त्रे । अनश्वरं नाशहीनमनन्तमिति यावत्। महांश्चासौ ईश्वरस्तम्।

पराजयमनुभूय वैलक्ष्यलक्ष्यहृदयो वीतदयो महाकालनिवासिनं कालीविलासिनमनश्वरं महेश्वरं समाराध्य तपःप्रभावसंतुष्टादस्मादेकवीरारातिघ्नीं भयदां गदां लब्ध्वात्मानमप्रतिभटं मन्यमानो महाभिमानो भवन्तमभियोक्तुमुद्युङ्क्ते । ततः परं देव एव प्रमाणम्' इति । तदालोच्य निश्चिततत्कृत्यैरमात्यै राजा विज्ञापितोऽभूत्—'देव, निरुपायेन देवसहायेन योद्धुमरातिरायाति । तस्मादस्माकं युद्धं सांप्रतमसांप्रतम् । सहसा दुर्गसंश्रयः कार्यः' इति । तैर्बहुधा विज्ञापितोऽप्यखर्वेण गर्वेण विराजमानो राजा तद्वाक्यमकृत्यमित्यनादृत्य प्रतियोद्धुमना बभूव । शितिकण्ठदत्तशक्तिसारो मानसारो मानसारो योद्धुमनसामग्रीभूय सामग्रीसमेतोऽक्लेशं मगधदेशं

समाराध्य सम्यग् तोषयित्वा । तपसः प्रभावेण सामर्थ्येन संतुष्टादानन्दितान्महादेवादित्यर्थः । एकश्चासौ वीरः प्रधानयोधः स चासौ अरातिः शत्रुस्तमतिहन्ति नाशयति तथाभूतां भयदां भीत्युत्पादिकां गदामायुधविशेषं लब्ध्वा प्राप्य । 'आयुधे गदा' इति मेदिनी । न प्रतिभटः प्रतिवीरो यस्य तम् । मन्यमानो मनसा कलयन् । महानभिमानोऽहङ्कारो यस्य सः । अभियोक्तुं ससैन्यस्त्वामाक्रमितुमुद्युङ्क्ते तत्परो भवति । त्वया सार्धं योद्धुं बद्धकक्ष इति भावः । ततः परं इदं श्रुत्वा यत्कर्तव्यं तत्र देवो महाराजः प्रमाणं यत्कर्तव्यं तदवधारणे भवानेव समर्थो न मादृशोऽल्पज्ञस्य भृत्यस्य तत्र योग्यता । यतः 'परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः' इति भावः । इतिशब्दो भाषणस्य समाप्तिं द्योतयति । 'इति हेतौ प्रकाशने० । समाप्तौ च' इति मेदिनी । तच्चारभाषितमालोच्य विचार्य निश्चितं निर्धारितं तस्य शत्रोः मानसारस्य कृत्यं यैस्तैरमात्यैर्मन्त्रिभिः । **देवेति** । निरुपायेन निष्प्रतिकारेण देवसहायेनेशलब्धगदासहायेनेत्यर्थः । अरातिः शत्रुर्योद्धुं संग्रामं कर्तुम् । तस्माज्जयप्राप्तेरभावादिति यावदस्माकं देवसहायरहितानामित्यर्थः । सांप्रतमधुना प्रचलितं युद्धमसांप्रतमयोग्यम् । 'युक्ते द्वे सांप्रतं स्थाने' इत्यमरः । 'आत्मानं सततं रक्षेत्प्राणैरपि धनैरपि' इति न्यायेन युद्धं त्यक्त्वा दुर्गसंश्रय एव कार्य इति । सहसाऽतर्कितं विचारमकृत्वेत्यर्थः । दुर्गस्य संश्रयोऽवलम्बनं कार्यः । दुर्गस्थैरस्माभिर्योधने देवसहायोऽपि स न जयं लभेतेति मन्त्रिणामभिप्रायः । तैर्मन्त्रिभिर्बहुधा बहुभिः प्रकारैः । 'बहुगणवतु०' इत्यनेन संख्यासंज्ञायां 'संख्याया विधार्थे धा' इत्यनेन धा । विज्ञापितोऽपि कृतानुनयोऽपि । अखर्वेण महता गर्वेणाहङ्कारेण विराजमानः शोभमानः । तद्वाक्यं मन्त्रिभाषितमकृत्यमसत्कृत्यमतोऽननुष्ठेयमित्यनादृत्य तिरस्कृत्य । प्रतियोद्धुं मनो यस्य सः । 'तुम् काममनसोरपि' इत्यनेन तुमुनो मकारलोपः । **शितिकण्ठेति** । शितिकण्ठेन शंकरेण दत्ता या शक्तिरायुधं गदारूपं सा एव सारो बलं यस्य सः । योद्धुमनसां योद्धुकामानां पूर्ववदेव मकारलोपः । अग्रीभूय

---

१ 'एव वीरारातिघ्नीम्' ब. २ 'दैवसहायेन' व–ब.

प्रविवेश । तदा तदाकर्ण्य मन्त्रिणो भूमहेन्द्रं मगधेन्द्रं कथंचिदनुनीय रिपुभिरसाध्ये विन्ध्याटवीमध्येऽवरोधान्मूलबलरक्षितान्निवेशयामासुः । राजहंसस्तु प्रशस्तवीतदैन्यसैन्यसमेतस्तीव्रगत्या निर्गत्याधिकरुषं द्विषं रुरोध । परस्परबद्धवैरयोरेतयोः शूरयोस्तदा तदालोकनकुतूहलागतगगनचराश्चर्यकारणे रणे वर्तमाने जयाकाङ्क्षी मालवदेशरक्षी विविधायुधस्थैर्यचर्याञ्चितसमरतुलितामरेश्वरस्य मगधेश्वरस्य तस्योपरि पुरा पुरारातिदत्तां गदां प्राहिणोत् । निशितशरनिकरशकलीकृतापि सा पशुपतिशासनस्यावन्ध्यतया सूतं निहत्य रथस्थं राजानं मूर्च्छितमकार्षीत् । ततो

प्रमुखो भूत्वा । सामग्र्या शस्त्रास्त्रसैनिकादिभिः समेतो युक्तः । अक्लेशं निरायासं यथा तथा । अनेन प्रवेशवेलायां स न कैरपि रुद्ध इति ज्ञायते । तदेति । तदा तत्प्रवेशकाले । तदाकर्ण्य तस्यागमनं श्रुत्वा । मन्त्रिणः पूर्वोक्ताः सचिवाः । भूम्या महेन्द्रं पृथ्व्या नायकं मगधेन्द्रं राजहंसं कथंचित् महता कष्टेनानुनीय संप्रार्थ्य तदनुमतिं गृहीत्वेत्यर्थः । रिपुभिरसाध्ये शत्रूणां दुष्प्रवेशनीये । अवरोधानन्तःपुरवर्गान् । मूलबलैः प्रधानयोधरक्षितान्निवेशयामासुः स्थापयामासुः । राजेति । वीतं युद्धपरिस्फूर्त्या धनादिलाभेन वा गतं दैन्यं दीनता यस्य तत् । प्रशस्तं स्तुत्यर्हंच तद्वीतदैन्यं यत्सैन्यं तेन समेतो युक्तः । तीव्रगत्या शत्रुं स्वदेशसीम्नि एव रोद्धुं द्रुतवेगेन निर्गत्य पुराद्बहिरागत्य । अधिका रुट् क्रोधो यस्य तं । दैविकशक्तिसंपन्नं मामपि रोद्धुमागतोऽयमतः क्रोधाधिक्यम् । द्विषं मानसारम् । परस्परेति । परस्परेऽन्योन्ये बद्धं कृतं वैरं शत्रुत्वं याभ्यां तयोः । वीरशब्दाद् 'वैरमैथुनिकयोः' इति निर्देशात् युवादित्वाद्वाऽण् । तस्य युद्धस्य तयोर्वीरयोर्वालोकनमीक्षणं तस्य कुतूहलेन कौतुकेनागताः प्राप्ता ये गगनचरा आकाशगामिनः सिद्धगन्धर्वादयस्तेषामाश्चर्यस्य कारणे हेतौ रणे युद्धे वर्तमाने सति प्रारब्धे सति । जयाकाङ्क्षी विजयेच्छुः । मालवदेशं रक्षति स मानसारः । विविधानामनेकेषामायुधानामस्त्राणां स्थैर्येण स्थिरतया या चर्या चरणं प्रयोग इति यावत् तया अञ्चितं युक्तं यत्समरं युद्धं तेन तुलितो सदृशीकृतोऽमरेश्वर इन्द्रो येन तस्य । स्वास्त्रप्रयोगकौशल्येन युद्धे इन्द्रसम इत्यर्थः । तस्योपरि राजहंसोपरि । पुरा प्रथमत एव । पुरारातिना शिवेन दत्ताम् निशितास्तीक्ष्णा ये शरा बाणास्तेषां निकरेण समूहेन शकलीकृतापि छिन्नापि सा गदा । पशुपतेः शिवस्य यच्छासनमाज्ञा एकवीरनाशकरणरूपिणी तस्यावन्ध्यतयाऽवश्यंभावितया सूतं सारथिं निहत्य हत्वा । सूतलक्षणं मात्स्ये 'निमित्तशकुनज्ञानो हयशिक्षाविशारदः । हयायुर्वेदतत्त्वज्ञो भूरिभागविशेषवित् ॥ स्वामिभक्तो महोत्साहः सर्वेषां च प्रियंवदः । शूरश्च कृतविद्यश्च सारथिः संप्रकीर्तितः' इति। एतल्लक्षणयुतस्यात एव वीरश्रेष्ठस्य सारथेर्हननेन शंकरादेशः सफल इति भावः । राजानं मूर्च्छितमकार्षीत् तदापतनवेगेन नृपो मूर्च्छित इति भावः ।

वीतप्रग्रहा अक्षतविग्रहा वाहा रथमादाय दैवगत्यान्तःपुरशरण्यं महारण्यं प्राविशन् । मालवनाथो जयलक्ष्मीसनाथो मगधराज्यं प्राज्यं समाक्रम्य पुष्पपुरमध्यतिष्ठत् ।

6 तत्र हेतिततिहतिश्रान्ता अमात्या दैवगत्यानुत्क्रान्तजीविता निशान्तवातलब्ध-संज्ञाः कथंचिदाश्वस्य राजानं समन्तादन्वीक्ष्यानवलोकितवन्तो दैन्यवन्तो देवीमवापुः । वसुमती तु तेभ्यो निखिलसैन्यक्षतिं राज्ञोऽदृश्यत्वं चाकर्ण्योद्विग्ना शोकसागरमग्ना रमणानुगमने मतिं व्यधत्त । ' कल्याणि, भूरमणमरणमनिश्चितम् । किं च दैवज्ञकथितो मथितोद्धताराति: सार्वभौमोऽभिरामो भविता सुकुमारः।

तत इति । ततो नृपमूर्च्छागमानन्तरं वीताः सारथिहस्ताच्च्युताः प्रग्रहा रश्मयो येषां तेऽक्षतो व्रणरहितो विग्रहो देहो येषां ते वाहा अश्वाः । रथं विगतचेतनेन नृपेण युक्तं रथमित्यर्थः । आदाय गृहीत्वा । दैवगत्या यदृच्छया । अन्तःपुराणामवरोधस्त्रीणां शरण्यं रक्षकं महारण्यं घोरकान्तारं यत्र पूर्वं मन्त्रिभिः राजस्त्रियः स्थापितास्तदुष्प्रवेशं वनमित्यर्थः। शरणशब्दात् ' तत्र साधुः ' इत्यनेन यत् । **मालवेति** । जयलक्ष्म्या जयश्रिया सनाथो युक्तः। प्राज्यं प्रभूतं महदिति यावत् समाक्रम्यात्मसात्कृत्वा । पुष्पपुरं तत्संज्ञिकां राजधानीम् । ' अधिशीङ्० ' इत्यनेन कर्मत्वम् ।

तत्रेति । तत्र युद्धे हेतीनामायुधानां ततयः संङ्घास्ताभिर्हतिर्हननं प्रहारा इति यावत्तया श्रान्ता म्लाना दैवगत्या भागधेयेन नोत्क्रान्तं गतं जीवितं येषां तथाभूताः । निशाया अन्तोऽवसानमुषःकाल इति यावत् तस्य वातेनार्थाच्छीतलमन्दवायुना लब्धा समधिगता संज्ञा ज्ञानं यैस्ते । कथं चिन्महतायासेन आश्वास्यात्मानं संस्तभ्य । राजानं स्वस्वामिनं समन्तादितस्ततःअन्वीक्ष्य मार्गयित्वाऽनवलोकितवन्तोऽपश्यन्तोऽत एव दैन्यं दुःखं येषां ते तथाभूताः । देवीं नृपमहिषीं महाकान्तारे गूढं स्थापितामवापुः ईयुः । **वसुमतीति** । तेभ्यः प्रत्यागतेभ्योऽमात्येभ्यः । निखिलस्य सर्वस्य सैन्यस्य क्षतिं नाशम् । राज्ञः स्वभर्तुरदृश्यत्वमदर्शनं चाकर्ण्य श्रुत्वोद्विग्नं खिन्नं मनो मानसं यस्याः सा । अत एव शोकस्य दुःखस्य सागर उदधौ निमग्ना रमयति क्रीडयति स रमणो भर्ता तस्यानुगमनेऽनुमृतौ मतिं व्यधत्त बुद्धिमकरोत् । कल्याणि शुभलक्षणयुत इत्यर्थः । अनेनाव्हानेन तव भर्तृमरणं नैव भविष्यति त्वं च तूर्णं दुःखानि तरिष्यसीति सूच्यते । भुवो रमणो भर्ता तस्य मरणं नाशोऽनिश्चितं नाद्यापि तस्य कलेवरमुपलब्धमतः स न मृत इत्यर्थः । एवं नृपसत्वं प्रतिपाद्यानुमरणरोधकं कारणान्तरमाह । **किं चेति** । दैवं भागधेयं जानन्ति तैर्ज्योतिर्विद्भिः कथितः । मथिता नाशिता उद्धता प्रचण्डा अरातयः शत्रवो येन सः । अत्र मथितशब्दे भूते क्तोऽपि भविष्यति ग्राह्यः ' धातुसंबंधे प्रत्ययाः ' इत्यनुशासनात् । तस्मात्पुत्रस्यो-

---

१ ' दैवगत्याऽप्रत्युत्क्रान्त० ' व-ब.

कुमारस्त्वदुदरे वसति। तस्मादद्य तव मरणमनुचितम्' इति भूषितभाषितैरमात्यपुरोहितैरनुनीयमानया तया क्षणं क्षणहीनया तूष्णीमस्थायि। अथार्धरात्रे निद्रानिलीढनेत्रे परिजने विजने शोकपारावारमपारमुत्तर्तुमशक्नुवती सेनानिवेशदेशं निःशब्दलेशं शनैरतिक्रम्य यस्मिन्रथस्य संसक्ततया तदानयनपलायनश्रान्ता गन्तुमक्षमाः क्षमापतिरथ्याः पथ्याकुलाः पूर्वमतिष्ठंस्तस्य निकटवटतरोः शाखायां मृतिरेखायामिव क्वचिदुत्तरीयार्धेन बन्धनं मृतिसाधनं विरच्य मर्तुकामाभिरामा वाङ्माधुरीविरसीकृतकलकण्ठा साश्रुकण्ठा व्यलपत्–'लावण्योपमितपुष्पसायक

दरे स वादयास्मिन्दिवसे अनुचितमयोग्यं भर्तुः समागमेच्छया पुत्रजननप्रतीक्षया च त्वयाऽवश्यं स्थेयं न प्राणत्यागः कार्य इति तात्पर्यम्। इत्येवं भूषितमलंकृतं युक्तियुक्तमितियावद्भाषितं वचनं येषां तैरमात्यैः सचिवैः पुरोहितैरनतिक्रमणीयवचनैरुपाध्यायैश्चानुनीयमानया प्रार्थितया तया राज्ञ्या। क्षणं क्षणपर्यन्तम्। अत्यन्तसंयोगे द्वितीया। क्षणेनोत्सवेन हीना वर्जिता तया। तूष्णीं मौनेन प्रत्युत्तरमदत्त्वाऽस्थायि तिष्ठतेः कर्मणि लुङ्। 'क्षणः पर्वोत्सवव्यापारेषु' इति मेदिनी। अथेति। रात्रेरर्धेऽर्धरात्रे। सर्वोप्येकदेशः कालेन समस्यते संख्याविसायेति ज्ञापनात्। अतोऽर्धशब्दस्य रात्रिशब्देन समासः। 'अहःसर्वैकदेशे०' त्यनेनाच् समासान्तः। निद्रया निर्लीढे व्याप्ते नेत्रे नयने यस्य तस्मिन्। श्रमेण शोकेन च तेषां निद्रा। परिजने जातावेकवचनं सेवकवर्ग इति यावत्-विजन एकान्ते। सर्वेषां निद्रितत्वात्तया सहालापितुं नासीत्कोप्यतः शोकाधिक्यम्। शोक एव पारावारः सागरस्तमपारमुत्तरीतुमशक्यमिति यावत्। उत्तर्तुम् अत्र तुमन इडभावश्चिन्त्यः। सेनाया निवेशः शिबिरं तस्य देशं प्रदेशं निर्गतः शब्दक्लेशो यस्मात्तं शनैः कोप्युत्थितो भवेदिति भीत्या शब्दादिकमकृत्वेति यावत्। यस्मिन्वटवृक्षे। रथस्य संसक्ततया संसक्तस्य भावस्तया लग्नतया तस्य रथस्य नयने पलायनं धावनं तेन श्रान्ताः क्लान्ता अत एवाग्रे गन्तुमक्षमा असमर्थाः क्षमापतेर्नृपस्य रथ्याः वाहाः। 'तद्वहति रथयुगप्रासङ्गम्' अनेन यत्। पथि मार्गे आकुला श्रान्ततया पीडिता अतिष्ठंस्तस्य निकटे सन्निधौ वटतरुर्वटवृक्षस्तस्य शाखायां मृतेर्मरणस्य रेखा रेषा करतलवर्ति चिन्हमिति यावत्तस्यामिव। शाखाया लम्बमानाया हस्तस्थायुर्दर्शकरेषासाम्यमत्र कल्पितम्। उत्तरीयस्य प्रावारकस्यार्धेनार्धभागेन मृतिसाधनं मरणकारणं बन्धनं कण्ठपाशमिति यावद्विरच्य कृत्वा। मर्तुं कामोभिलाषो यस्याः सा अभिरामा मनोहरा वाचो माधुर्या मधुरतया विरसीकृतस्तिरस्कृतः कलकण्ठः कोकिलो यया सा। माधुरशब्दाद्गौरादित्वान्ङीष्। अथवा 'तत आगत' इत्यनेन मधुरादणि टिड्ढाणञिति ङीप्। सा राज्ञी अश्रूणि कण्ठे यस्याः सा। साश्रुकण्ठेति नैकं पदम्। अथवाश्रुभिः सहितः साश्रुः कण्ठो यस्याः सा। लावण्येन निजकान्त्योपमितस्तुलितः पुष्पसायको मदनो येन तत्संबुद्धौ। भुवो

भूनायक, भवानेव भाविन्यपि जन्मनि वल्लभो भवतु ' इति। तदाकर्ण्य नीहारकराकिरणनिकरसंपर्कलब्धावबोधो मागधोऽगाधरुधिरविक्षरणनष्टचेष्टो देवीवाक्यमेव निश्चिन्वानस्तन्वानः प्रियवचनानि शनैस्तामाह्वयत्। सा ससंभ्रममागत्यामन्दहृदयानन्दसंफुल्लवदनारविन्दा तमुपोषिताभ्यामिवानिमिषिताभ्यां लोचनाभ्यां पिबन्ती विकस्वरेण स्वरेण पुरोहितामात्यजनमुच्चैराहूय तेभ्यस्तमदर्शयत्। राजा निटिलतटचुम्बितनिजचरणाम्बुजैः प्रशंसितदैवमाहात्म्यैरमात्यैरभाणि–' देव, रथ्यचयः सारथ्यपगमे रथं रभसादरण्यमनयत् ' इति। ' तत्र निहतसैनिकग्रामे सङ्ग्रामे मालवपतिना-

---

नायक पृथ्वीपते। भाविन्यपि जन्मनि भविष्यज्जन्मनि वल्लभो भर्ता। भवत्विति प्रार्थनायां लोट्। तत् तस्या दुःखपूर्णं वचः आकर्ण्य श्रुत्वा। नीहाराः शीताः कराः किरणानि यस्य स चन्द्रस्तस्य किरणानां मयूखानां निकरस्य समूहस्य संपर्कः संबन्धस्तेन लब्धोऽधिगतोऽवबोधो ज्ञानं संज्ञेति यावद्येन सः मागधो मगधानामीश्वरो राजहंसः। ' तस्येश्वर ' इत्यनेनाण्। अगाधमनन्तं यद्रुधिरविक्षरणं रक्तमोक्षस्तेन नष्टा गता चेष्टा चलनादिर्यस्य सः। देव्याः स्वप्रेयस्या वाक्यं वचनमेवेति निश्चिन्वानः निश्चयं कुर्वाणो स्वरप्रत्यभिज्ञया देव्येव व्यालपतीत्यवगच्छन्नित्यर्थः। प्रियवचनानि चाटूक्तानि तन्वानो विस्तारयन्। शनैरित्यनेन स्वरोच्चारणेऽसामर्थ्यं द्योत्यते। तां स्वराज्ञीमाव्हयदाकारयामास। सेति। ससंभ्रमं सत्वरं भर्तुः स्वरं श्रुत्वा त्वरिता सेत्यर्थः। आगत्य तत्समीपमिति शेषः। अमन्दो महान् हृदयस्य मनस आनन्दस्तोषस्तेन प्रफुल्लं विकसितं हास्ययुक्तमिति यावद्वदनारविन्दं मुखकमलं यस्याः सा। तं स्वभर्तारम्। उपोषिताभ्यामिवेत्यनिमेषिताभ्यामित्यस्य कारणीभूतं यथोपोषित आतृप्ति भक्षणं विनाऽन्यन्न करोति तद्वत्तं नेत्रसंकोचमप्यकृत्वा पश्यन्तीत्यर्थः। पिबन्ती पश्यन्तीति यावत्। विकस्वरेणोच्चेन स्वरेण पुरोहिता उपाध्याया अमात्या मन्त्रिणस्तेषां जनं संघमाहूयाकार्य। अदर्शयदत्र नृपोऽस्तीति दर्शयामासेत्यर्थः। राजेति। निटिलतटेन भालस्थलेन चुम्बितं स्पृष्टं वन्दितमिति यावन्निजचरणाम्बुजं पद्मसदृशः स्वचरणो यैस्तैः प्रशंसितं स्तुतं दैवस्य भागधेयस्य माहात्म्यं सामर्थ्यं यैस्तैः। अभाणि अभाषि। भणतेः कर्मणि लुङ्। देवेति। राजानमभिमुखीकर्तुं सम्बोधनमिदम्। रथ्यानां रथं वहन्ति तेषामश्वानां चयः समुदायः सारथेः अपगमे नाश इति यावद्रभसाद्वेगेन अरण्यं प्रियाध्यासितं वनमनयत्प्रापयत्। तत्रेति। निहतो मृतः सैनिकानां योधानां ग्रामः समूहो यत्र तस्मिन् संग्रामे युद्धे आरा-

---

१ ' भवानेकः ' व-ब. २ ' चिरक्षरण ' व. ३ ' देवीवाक्यमिव ' व. ४ ' संप्राप्य ' व; ' संपाय ' ब. ५ ' पिकस्वरेण '.

राधितपुरारातिना प्रहितया गदया दयाहीनेन ताडितो मूर्च्छामागत्यात्र वने निशान्तपवनेन बोधितोऽभवम्' इति महीपतिरकथयत् । ततो विरचितमहेन मन्त्रिनिवहेन विरचितदैवानुकूल्येन कालेन शिबिरमानीयापनीताशेषशल्यो विकसितनिजाननारविन्दो राजा सहसा विरोपितव्रणोऽकारि । विरोधिदैवधिक्कृतपुरुषकारो दैन्यव्याप्ताकारो मगधाधिपतिरधिकाधिरमात्यसंमत्या मृदुभाषितया तया वसुमत्या मत्या कलितया च समबोधि–' देव, सकलस्य भूपालकुलस्य मध्ये तेजोवरिष्ठो गरिष्ठो

धितस्तोषितः पुरारातिः शंकरो येन तेन मालवानामधिपतिना मानसारेणेत्यर्थः । प्रहितया प्रक्षिप्तया गदयाऽऽयुधविशेषेण । दयाहीनो दयावर्जितस्तेन । मूर्च्छां प्रहारसामर्थ्यादिन्द्रियोपरममागत्य प्राप्य । अत्र वनेऽस्मिन्नरण्ये । निशान्तपवनो मध्यरात्रवायुस्तेन बोधितः प्रकृतिमापादितो ग्राहितसंज्ञ इति यावत् । इति एवं महीपतिः राजहंसोऽकथयन्मन्त्रिभ्यो न्यवेदयत् । निशान्त इत्यस्य प्रभात इति व्याख्यानमयुक्तं सुप्ते सेवकवर्गे मध्यरात्रे प्राणान् विसृ॒ष्टुं निर्गताया राज्ञ्याः परिदेवितं नृपेण मध्यरात्र एवाकर्णितं न प्रभात इति ज्ञेयम् । निशीथ इति पाठेऽपि स एवार्थः । अतः पाठद्वयापेक्षया निशीत इति पाठो न चारुः । रात्रिपवनेन शैत्यस्य कालस्य च बोधनात्र शैत्यबोधकः पाठो युक्तः । तत इति । विरचितं कृतं दैवानुकूल्यं भागधेयस्यानुकूलता येन तेन विरचितः कृतो मह उत्सवो नृपपूजा हरिपूजनं वा येन तेन मन्त्रिणां सचिवानां निवहेन समुदायेन । दैवानुकूल्यतया लब्धनृपैर्मन्त्रिभिः उत्सवो विहित इति तात्पर्यम् । कालेन किंचित्कालानन्तरमिति यावत् । 'मह उत्सवतेजसोः' इति मेदिनी । शिबिरं सेनानिवासस्थानमानीय नीत्वा । अपनीतान्युद्धृतान्यशेषाणि सकलानि शल्यानि बाणाग्राणि यस्य सः । विकसितं प्रफुल्लं निजाननमेव स्वमुखमेवारविन्दं कमलं यस्य सः । सहसा द्रुतं विरोपिताश्चिकित्सिता व्रणाः बाणक्षतस्थानानि यस्य सः । ओषधिप्रभावात्तूर्णमेव सर्वाणि क्षतानि शुष्काणीत्यर्थः । अकारि करोतेः कर्मणि लुङ् । विरोधीति । विरोधिना विपरीतेन दैवेन भागधेयेन धिक्कृतः तिरस्कृतः पुरुषकारः पौरुषं पराक्रम इति यावद्यस्य सः अत एव दैन्येन दीनतया व्याप्त आकारो यस्य सः । अधिकोतिशयित आधिर्मानसपीडा यस्य स मगधाधिपती राजहंसः । अमात्यानां संमत्या आनुकूल्येन मृदु भाषितं वचनं यस्यास्तया । दैन्यदूरीकरणं मृदुवाक्यैरेव शक्यमतः युक्तमिदं विशेषणं । मत्या बुध्या कलितया युक्तया तया वसुमत्या राज्ञ्या । समबोधि सम्यक् बोधितः । बोधतेः कर्मणि लुङ् । देवेति । सकलस्य सर्वस्य भूपालानां नृपाणां कुलस्य समुदायस्य मध्ये तेजसा वरिष्ठः श्रेष्ठः । अतिशयेन गुरुर्गरिष्ठः । 'अतिशायिने तमबिष्ठनौ' इत्यनेनेष्ठनि 'प्रियस्थिरे' त्यादिनागर् । विन्ध्य-

---

१ 'निशीत'; 'निशीथ'. २ 'अधिकाधिकाधिः' न.

भवानद्य विन्ध्यवनमध्यं निवसतीति जलबुद्बुदसमाना विराजमाना संपत्तडिल्लतेव सहसैवोदेति नश्यति च । तन्निखिलं दैवायत्तमेवावधार्य कार्यम् । किं च पुरा हरिश्चन्द्ररामचन्द्रमुख्या असंख्या महीन्द्रा ऐश्वर्योपमितमहेन्द्रा दैवतन्त्रं दुःखयन्त्रं सम्यगनुभूय पश्चादनेककालं निजराज्यमकुर्वन् । तद्वदेव भवान्भविष्यति । कंचन कालं विरचितदैवसमाधिर्गताधिस्तिष्ठतु तावत्' इति ।

7 ततः सकलसैन्यसमन्वितो राजहंसस्तपोविभ्राजमानं वामदेवनामानं तपोधनं निजाभिलाषावाप्तिसाधनं जगाम । तं प्रणम्य तेन कृतातिथ्यस्तस्मै कथितकथ्यस्तदा-

---

वनस्य मध्यं मध्यभागे । अत्र कर्मत्वं चिन्त्यं निवसतेरकर्मकत्वात् । इतिशब्दो हेत्वर्थकः । जलबुद्बुदैर्वारिस्फोटैः समाना सदृशी विराजमाना शोभमाना संपल्लक्ष्मीस्तडिल्लतेव विद्युल्लतेव । लताशब्दोऽलंकारार्थः । सहसैवातर्कितमेवोदेत्युद्गच्छति नश्यत्यदृश्या भवति च । तत्तस्मात् निखिलं सर्वं कार्यं करणीयं दैवायत्तमेव भागधेयाधीनमेवावधार्यं ज्ञातव्यम् । न तद्विषये हानौ जातायामपि खेदयितव्य आत्मेति भावः । पूर्वमपि त्वादृशैर्महद्भिरनुभूतं दुःखमित्याह । किं चेति । पुरा प्राक् हरिश्चन्द्रस्तन्नामकः सूर्यवंशस्थो विश्वामित्रेण परीक्षितसत्वो दुःखमहोदधौ मज्जितो नृपो रामश्च तद्वंशस्थ एव भगवत्सप्तमावतारस्तौ मुख्यौ येषां ते असंख्या अगण्या ऐश्वर्येण संपदा सामर्थ्येन वोपमितस्तुलितो महेन्द्रो देवराट् यैस्ते महीन्द्रा नृपा दैवतन्त्रं दैवाधीनं दुःखमेव यन्त्रं सम्यक् पूर्णतयाऽनुभूयोपभुज्य पश्चाद्दुःखोपभोगानन्तरम् अनेककालं चिरम् । अत्यन्तसंयोगे द्वितीया । निजराज्यं स्वराज्यमकुर्वन्नशासुः । रामादिभिर्विपरीते दैवे दुःखं त्वनुभूय योग्ये काले स्वराज्यं पुनरपि प्राप्तं तद्वदेव तथैव भवान् भविष्यति त्वमपि तथैव भागधेयेऽनुकूले जाते पूर्वां स्थितिमाप्स्यसीत्यर्थः । कंचन कालं दैवानुकूल्यकालं प्रतीक्षमाण इत्यर्थः । विरचितः कृतो दैवो देवसम्बन्धिः समाधिश्चित्तैकाग्र्यं येन सः । दैवमनुकूलयितुं भगवद्ध्यानपर इति यावत् । अत एव गतो नष्ट आधिर्मानसपीडा यस्य सः । अन्यकार्यव्यापृत्या तद्विचारविहीनस्य मनसो दुःखमल्पं भवेदिति भावः ।

तत इति । सकलेन सैन्येन सेनया समन्वितो युक्तः । तपसा तपश्चर्यया विशेषेण भ्राजमानं दीप्यमानं वामदेव इति नाम यस्य तं तप एव धनं यस्य तं निजाभिलाषः स्वेष्टं शत्रुहननं तस्यावाप्तिर्लाभस्तस्य साधनं हेतुम् । तमिति । तं वामदेवं प्रणम्य नमस्कृत्य तेन मुनिना कृतमातिथ्यं यस्य सः । 'अतिथेर्ञ्य' इत्यनेन ञ्यः । तस्मै मुनये कथितं निवेदितं कथ्यं कथयितुं योग्यं येन सः । दूरीकृतो नाशितः श्रमो येन तत्र । तस्य मुनेराश्रमे कंचन कालं कतिपयदिनमत्यन्तसंयोगे द्वितीया । निजराज्यमभिलषती-

श्रमे दूरीकृतश्रमे कंचन कालमुषित्वा निजराज्याभिलाषी मितभाषी सोमकुलावतंसो राजहंसो मुनिमभाषत–‘ भगवन्, मानसारः प्रबलेन दैवबलेन मां निर्जित्य मद्भोग्यं राज्यमनुभवति। तद्वदहमप्युग्रं तपो विरच्य तमरातिमुन्मूलयिष्यामि लोकशरण्येन भवत्कारुण्येनेति नियमवन्तं भवन्तं प्राप्नवम् ’ इति । ततस्त्रिकालज्ञस्तपोधनो राजानमवोचत्– ‘ सखे, शरीरकार्श्यकारिणा तपसालम् । वसुमतीगर्भस्थः सकलरिपुकुलमर्दनो राजनन्दनो नूनं संभविष्यति । कंचन कालं तूष्णीमास्स्व ’ इति । गगनचारिण्यापि वाण्या ‘ सत्यमेतत् ’ इति तदैवावाचि । राजापि मुनिवाक्यमङ्गीकृत्यातिष्ठत् ।

8 ततः संपूर्णगर्भदिवसा वसुमती सुमुहूर्ते सकललक्षणलक्षितं सुतमसूत । ब्रह्म-

---

च्छति सः । मितं स्वल्पं भाषते सः सोमकुलं चन्द्रवंशस्तस्यावतंसो भूषणं मुनिं वामदेवम् । भगवन्निति । ‘ ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानविज्ञानयोश्चैव षण्णां भग इतींगना ’ इति विष्णुपुराणोक्तभगो विद्यते यस्य तत्संबुद्धौ प्रबलेन प्रचण्डेन देवादागतं शंकरात्प्राप्तं यद्बलं गदारूपं सामर्थ्यं तेन भागधेयशक्त्या वा । निर्जित्य पराभूय । मया भोग्यं भोक्तव्यं राज्यं मदीयमित्यर्थोऽनुभवत्युपभुङ्क्ते । तद्वन्मानसारवत् । ‘ तेन तुल्यं क्रिया चेद्वतिः ’ अनेन वतिः । उग्रं प्रचण्डं तपस्तपश्चर्यां विरच्य कृत्वा । तमरातिं मद्राज्यापहारकं मानसारमुन्मूलयिष्यामि । लोकानां जनानामर्थान्मादृशां दीनानां शरण्यम् आश्रयस्तेन भवतः कारुण्यं दयालुता तेन । इतिशब्दो हेतौ । नियमवन्तं व्रतयुक्तमनेन मुनेः सामर्थ्यं द्योत्यते । तत इति । त्रिकालं भूतभविष्यद्वर्तमानरूपं कालत्रयं जानाति सः । सखे इति । सखे इत्यामन्त्रणेन मुनिना सुहृत्त्वेनांगीकृतस्य नृपस्य कार्यलाभः सूचितः । शरीरस्य कार्श्यं कृशता ब्राह्मणादित्वाद्भावे ष्यञ् । तत्करोति तेन तपसा तपश्चर्ययाऽलं निषेधार्थकमलमित्यव्ययम् । गम्यमानापि क्रिया कारकविभक्तीनां प्रयोजिकेति गम्यमानायाः क्रियायाः करणरूपार्थे तृतीया तपःशब्दात् । अलं शब्दयोगेनात्र तृतीयेति वचनं तथाविधसूत्राभावादुपेक्ष्यम् । वसुमत्यास्त्वद्राज्ञ्या गर्भे तिष्ठति सः सकलानां रिपुकुलानां शत्रुसंघानां मर्दनो नाशकः । राज्ञस्ते नन्दनस्तोषदः पुत्र इति यावत् नूनमसंशयं संभविष्यत्युत्पत्स्यते । कंचन कालमातदुत्पत्तिसमयं तूष्णीं मौनतया कमप्युद्यममकृत्वेत्यर्थ आस्स्व तिष्ठ । इतिशब्दः समाप्तौ । राजेति । मुनेर्वाक्यं वचनमङ्गीकृत्य स्वीकृत्यातिष्ठत्पुत्रोत्पत्तिं प्रतीक्षमाणस्तस्थावित्यर्थः ।

तत इति । संपूर्णा गर्भदिवसा अर्थान्नव मासा यस्याः सा । सुमुहूर्ते शोभने काले । सकलैः सर्वैर्लक्षणैश्चिन्हैर्लक्षितं युक्तं सुतं पुत्रमसूताजनयत् । ब्रह्मणो वर्चो ब्रह्मवर्चसं

---

१ ‘ववोचि’ व-न.

वर्चसेन तुलितवेधसं पुरोधसं पुरस्कृत्य कृत्यविन्महीपतिः कुमारं सुकुमारं जातसंस्कारेण बालालंकारेण च विराजमानं राजवाहननामानं व्यधत्त। तस्मिन्नेव काले सुमतिसुमन्त्रसुमित्रसुश्रुतानां मन्त्रिणां प्रमतिमित्रगुप्तमन्त्रगुप्तविश्रुताख्या महदभिख्याः सूनवो नवोद्यदिन्दुरुचश्चिरायुषः समजायन्त। राजवाहनो मन्त्रिपुत्रैरात्ममित्रैः सह बालकेलीरनुभवन्नवर्धत।

9 अथ कदाचिदेकेन तापसेन रसेन राजलक्षणविराजितं कंचिन्नयनानन्दकरं सुकुमारं कुमारं राज्ञे समर्प्यावोचि– 'भूवल्लभ, कुशसमिदानयनाय वनं गतेन मया

'ब्रह्महस्तिभ्यां वर्चस' इत्यच्। तपःस्वाध्यायजं तेजस्तेन तुलितो वेधा ब्रह्मा येन तं। 'तपःस्वाध्यायजं यच्च तेजस्तु ब्रह्मवर्चसम्' इति जटाधरः। पुरोधसं पुरोहितं पुरस्कृत्याग्रभागे कृत्वा कृत्यं वेत्ति कार्यं जानाति स महीपतिः राजहंसः सुकुमारं मनोहरं कुमारं बालं जातसंस्कारेण जातकर्माख्यसंस्कारेण बालालंकारेण बालकयोग्यैर्भूषणैर्जातावेकवचनमथवा बालस्य नूतनोत्पन्नस्यालंकारधारणेऽसमर्थस्य एक एवालंकारः। जातकर्म नाम जन्मनोऽनन्तरं क्रियमाणः संस्कारविशेषः। तदुक्तं हेमाद्रौ 'जन्मनोऽनन्तरं कार्यं जातकर्म यथाविधि' इति। विराजमानं विशेषतः शोभमानं राजवाहननामानं व्यधत्त तस्य राजवाहन इति नाम चक्र इत्यर्थः। **तस्मिन्निति**। तस्मिन्नेव काले नृपस्य पुत्रोत्पत्तिसमये। प्रमतिः मित्रगुप्तः मन्त्रगुप्तः विश्रुतश्चेत्याख्या अभिधानं येषां ते। महती अभिख्या शोभा येषां ते। अत्रापि 'आन्महतः' इत्यनेनात्वेन भाव्यं परमयं कविः प्रायस्तन्नांगीकरोति। अशुद्धश्चायं प्रयोगः। नवः प्रतिपत्स्थ उद्यन् उद्गच्छन् इन्दुश्चन्द्रः इव रुचिः कान्तिर्येषां ते। प्रतिपच्चन्द्रनिभा इत्यर्थः। चिरायुषश्चिरजीविनः। चिरजीवित्वं च तेषां हस्तस्थसुलक्षणैर्ज्ञातमित्यवगन्तव्यम्। बालकेलीर्बालोचिताः क्रीडा अनुभवन्नवर्धत वृद्धिं ययौ।

अथेति। अथ राजवाहनोत्पत्त्यनन्तरं तापसेन मुनिना रसेन प्रेम्णा। नयनयोरानन्दस्तोषस्तस्य करं विधायिनं सुकुमारं शोभनं कुमारं बालं राज्ञे राजहंसाय समर्प्य दत्त्वाऽवाच्युक्तम्। 'अवाचि' इति वक्तेः कर्मणि लुङ्। तत्र प्रथमस्यैकवचने चिणि च वृद्धिरेवोचिता। अतः 'अवोचि' इति पाठोऽसाधुः। 'वच उम्' इति त्वङि परे एव न चिणि तत्प्राप्तिरित्यलम्। भूवल्लभेत्यामन्त्रणं पृथ्व्यां लब्धं सर्वं त्वदायत्तं विधेयमिति द्योतयितुम्। कुशा दर्भाःसमिधश्च तेषामानयनमाहरणं तस्मै तादर्थ्ये चतुर्थी। वनमरण्ये गतेन प्राप्तेन। एतेन स्वस्य वनगमनकारणं कथितम्। काचिदज्ञातनामधेया अश-

---

१ 'वोचि' ब-न.

काचिदशरण्या व्यक्तकार्पण्याश्रु मुञ्चन्ती वनिता विलोकिता। 'निर्जने वने किंनिमित्तं रुद्यते त्वया' इति पृष्टा सा करसरोरुहैरश्रु प्रमृज्य सगद्गदं मामवोचत्— 'मुने, लावण्यजितपुष्पसायके मिथिलानायके कीर्तिव्याप्तसुधर्मणि निजसुहृदो मगधराजस्य सीमन्तिनीसीमन्तमहोत्सवाय पुत्रदारसमन्विते पुष्पपुरमुपेत्य कंचन कालमधिवसति समाराधितगिरीशो मालवाधीशो मगधराजं योद्धुमभ्यगात्। तत्र प्रख्यातयोरेतयोरसंख्ये संख्ये वर्तमाने सुहृत्साहाय्यकं कुर्वाणो निजबले सति[1] विदेहे विदेहेश्वरः प्रहारवर्मा जयवता रिपुणाभिगृह्य कारुण्येन पुण्येन विसृष्टो हतावशेषेण शून्येन सैन्येन सह स्वपुरगमनमकरोत्। ततो वनमार्गेण दुर्गेण

रण्याऽसहाया व्यक्तं प्रकटं कार्पण्यं दैन्यं यस्याः सा। अश्रु नेत्रोदकं मुञ्चन्ती त्यजन्त्यर्थाद्रुदती वनिता नारी विलोकिता दृष्टा। निर्जनेऽमानुषे वनेऽरण्ये। किं निमित्तं केन निमित्तेन। निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनमिति प्रथमा। रुद्यते आक्रन्द्यते। इति एवं पृष्टा सा युवतिः। करसरोरुहैः करकमलैरश्रु बाष्पं प्रमृज्य संशोध्य। सगद्गदं गद्गदस्वरेण युक्तं यथा तथाऽवोचत्। वचेः कर्तरि लुङ्। 'अस्यतिवक्ती' त्यनेनाङि 'वच उम्' इत्यनेनोम्। **मुने** इति। लावण्येन कान्त्या जितः पराभूतःपुष्पसायको मदनो येन तस्मिन्। सौन्दर्येण मदनमप्यतिशयानः इत्यर्थः। कीर्त्या यशसा व्याप्ता सुधर्मा देवसभा येन तस्मिन्। स्वर्गेपि गीयमानकीर्तिरित्यर्थः। 'स्यात्सुधर्मा देवसभा' इत्यमरः। मिथिलानायके मिथिलाधीशे। निजसुहृदः स्वमित्रस्य मगधराजस्य राजहंसस्य सीमन्तिन्याः भार्याया सीमन्तमहोत्सवः गर्भिण्यवस्थायां क्रियमाणोत्सवस्तदर्थं पुत्राभ्यां दाराभिः भार्यया च समन्विते युक्ते पुष्पपुरं मगधराजधानीमुपेत्य प्राप्य। कंचन कालं स्वल्पकालं 'उपान्वध्याङ्' इत्यनेन द्वितीया। समाराधितः सम्यक् पूजितो गिरीशः शंकरो येन स मालवाधीशो मानसारः योद्धुं युद्धाय मगधराजं राजहंसमभ्यगात् अगमत्। इण् धातोः लुङि 'इणो गा लुङी' ति गादेशे 'गातिस्थे' ति सिचो लुक्। **तत्रेति**। तत्र मगधेषु प्रख्यातयोः प्रसिद्धयोरेतयो राजहंसमानसारयोः असंख्ये गणनानर्हे संख्ये युद्धे वर्तमाने सति। सुहृदो राजहंसस्य साहाय्यकं साहाय्यं कुर्वाणः। निजबले स्वसैन्ये विगतो देहो यस्य तथाभूते मृत इति यावत्। विदेहेश्वरः मत्स्वामी। जयवता जयो विद्यते यस्य तेन विजयिना रिपुणाऽरिणा मानसारेण अभिगृह्य गृहीत्वा कारुण्येन दयया पुण्येन मत्स्वामिन इति यावत् विसृष्टस्त्यक्तो हतान्मृतादवशेषेणावशिष्टेन शून्येन पराजयाद्विमनस्केन सैन्येन सह स्वपुरगमनं स्वराजधानीं प्रति गमनमकरोत्। **तत इति**। ततो गमने प्रक्रान्ते दुर्गेण दुःखेन गन्तुं शक्येन मार्गेण पथा गच्छन् अधिकं बलं सामर्थ्यं

---

१ 'असति विधेये' ब-ब.

गच्छन्नधिकबलेन शबरबलेन रभसादभिहन्यमानो मूलबलाभिरक्षितावरोधः स महानिरोधः पलायिष्ट । तदीयार्भकयोर्यमयोर्धात्रीभावेन परिकल्पिताहं मद्दुहितापि तीव्रगतिं भूपतिमनुगन्तुमक्षमे अभूव । तत्र विवृतवदनः कोऽपि रूपी कोप इव व्याघ्रः शीघ्रं मामाघ्रातुमागतवान् । भीताहमुद्ग्रग्राविग स्खलन्ती पर्यपतम् । मदीयपाणिभ्रष्टो बालकः कस्यापि कपिलाशवस्य क्रोडमभ्यलीयत । तच्छवाकर्षिणोऽमर्षिणो व्याघ्रस्य प्राणान्बाणो बाणासनयन्त्रमुक्तोऽपाहरत् । विलोलालको बालकोऽपि शबरैरादाय कुत्रचिदुपानीयत । कुमारमपरमुद्वहन्ती मद्दुहिता कुत्र गता न जाने । साहं मोहं गता केनापि कृपालुना वृष्णिपालेन स्वकुटीरमावेश्य विरोपि-

यस्य तेन शबरबलेन भिल्लसेनया रभसाद्वेगादभिहन्यमान आक्रम्यमाणः । मूलबलेन प्रधानसैन्येन रक्षितोऽवरोधोऽन्तःपुरं यस्य सः । महान् निरोधः प्रतिरोधो यस्य सः । सः प्रहारवर्मा पलायिष्ट । अयतेः परापूर्वकस्य कर्तरि लुङ् । 'उपसर्गस्यायतेः' इत्यनेन रेफस्य लकारः । तस्येमौ तदीयौ तौ च तावर्भकौ बालौ तयोर्यमयोः यमजयोः । 'यमोन्यलिङ्गो यमजे' इति मेदिनी । धात्रीभावेनोपमातृतया परिकल्पिता रक्षिता तत्कर्मणि नियोजिताऽहं मम दुहिता कन्यापि तीव्रा द्रुता गतिर्गमनं यस्य तं भूपतिमस्मत्स्वामिनमनुगन्तुमनुसर्तुमक्षमे असमर्थे अभूव । भवतेर्लुङ् । तत्रेति । तत्र तदानीं विवृतं विकसितं वदनं मुखं यस्य सः रूपी रूपं विद्यते यस्य तथाभूतो मूर्तिमान् कोप इव क्रोध इव व्याघ्रः शार्दूल आघ्रातुमास्वादितुमागतवान्प्राप्तः । भीता व्याघ्रागमनेन त्रस्तोदग्रे उद्गताग्रभागे ग्राव्णि पाषाणे स्खलन्ती स्खलनमनुभवन्ती । ममायं मदीयो यो पाणिर्हस्तस्तस्माद्भ्रष्टः पतितो बालको राजदारकः कपिलायाः धेन्वाःशवस्य प्रेतस्य क्रोडमङ्कदेशमभ्यलीयत निगूढ आसीत् । तस्याः शवं प्रेतमाकर्षति तस्यामर्षिणः क्रुद्धस्य व्याघ्रस्य प्राणानसून् । बाणासनं चापस्तदेव यन्त्रं तस्मान्मुक्तो बाणः शरोऽपाहरन्नाशयामास । विलोलाश्चञ्चला अलकाः केशा यस्य सः बालकोपि शबरैः पुलिन्दैरादाय गृहीत्वा कुत्रचिन्मदज्ञातप्रदेशमनीयत नीतः । अपरं यमजं द्वितीयं कुमारं बालमुद्वहन्ती धारयन्ती मद्दुहिता मम कन्यका न जाने नावगच्छामि । सा यद्धस्ताद्बालो गतो या च व्याघ्रभीत्याक्रान्ता सा मोहं गता मूर्छां प्राप्ता केनाप्यज्ञातनामधेयेन कृपालुना दयावता वृष्णिपालेन गोपालेन स्वकुटीरं स्वपर्णगृहं 'कुटीशमीशुण्डाभ्यो रः' इत्यनेन रः । आवेश्य संस्थाप्य विरोपिता पूरिता व्रणा यस्याः सा पूर्ववदक्षतशरीरेत्यर्थः । अत्र च आवेश्येत्यत्र 'समानकर्तृकयोः पूर्वकाल' इत्यनेन क्त्वा । तस्य च ल्यप् । न चात्रावेशनस्य वृष्णिपालः कर्ता भवनस्य च कर्तृत्वं दासीनिष्ठमतः कथं क्त्वाप्रत्यय इति वाच्यम् ।

१ 'उदग्रग्राणि:' ब-ब.

त्रणाभवम्। ततः स्वस्थीभूय भूयः क्ष्माभर्तुरन्तिकमुपतिष्ठासुरसहायतया दुहितुरनभिज्ञाततया च व्याकुलीभवामि' इत्यभिदधाना 'एकाकिन्यपि स्वामिनं गमिष्यामि' इति सा तदैव निरगात्। अहमपि भवन्मित्रस्य विदेहनाथस्य विपन्निमित्तं विषादमनुभवंस्तदन्वयाङ्कुरं कुमारमन्विष्यंस्तदेकं चण्डिकामन्दिरं सुन्दरं प्रागाम्। तत्र संततमेवंविधविजयसिद्धये कुमारं देवतोपहारं करिष्यन्तः किराताः 'महीरुहशाखावलम्बितमेनमसिलतया वा, सैकततले खननिक्षिप्तचरणं लक्ष्यीकृत्य शितशरनिकरेण वा, अनेकचरणैः पलायमानं कुक्कुरबालकैर्वा दंशयित्वा संहनिष्यामः' इति भाषमाणा मया समभ्यभाष्यन्त–'ननु किरातोत्तमाः, घोरप्र-

---

ल्यबन्तस्य विरोपितेत्युत्तरक्रियासत्त्वात्। तस्याश्च कर्तृत्वं व्रणिपालनिष्ठमिति न काप्यनुपपत्तिः। तत इति। ततो व्रणविरोपणानन्तरं स्वस्थीभूय। भूयः पुनरपि क्ष्माभर्तुर्भूपतेर्मिथिलाधिपतेरन्तिकं समीपमुपतिष्ठासुरुपगन्तुमिच्छुः। तिष्ठतेःसन्नन्तात् 'सनाशंसभिक्ष उः' इत्यनेन उः। असहायतया सहायाभावात् दुहितुः कन्याया अनभिज्ञाततया सा-कुत्रास्तीति ज्ञानाभावेन च व्याकुलीभवामि पीडिता भवामि। इत्येवमभिदधानोक्तवती। एकाकिन्यप्यसहायापि स्वामिनं राजानं। तदैव तस्मिन्नेव काले निरगान्निरगच्छत्। अहमिति। विपन्निमित्तं कारणं यस्य तं विषादं खेदमनुभवन्। तस्य विदेहनाथस्यान्वयः कुलं तस्याङ्कुरं बीजं कुमारं बालमन्विष्यन्मार्गयमाणः। चण्डिकाया भवान्या मन्दिरमायतनं प्रागामगच्छम्। तत्रेति। तत्र चण्डिकामन्दिरे संततं नित्यमेवंविध ईदृग्। विजयस्तस्य सिद्धये सिद्ध्यर्थं कुमारं बालं देवतायै चण्डिकाया उपहारमुपायनं करिष्यन्तः अर्पयिष्यन्तः महीरुहस्य वृक्षस्य शाखायां लम्बितं लम्बमानमेनं पूर्वोक्तं बालमसिलतया खड्गधारया वा। सिकताः सन्त्यस्मिन् स सैकतो वालुकाप्रदेशस्तस्य तलें पृष्ठे। 'सिकताशर्कराभ्यां च' अनेनाण् मत्वर्थीयः। खनने गर्ते खनित्रे वा निक्षिप्तौ स्थापितौ निगडितौ वा चरणौ यस्य तं लक्ष्यीकृत्योद्दिश्य शितानां तीक्ष्णानां शराणां बाणानां निकरेण समूहेन वा। अनेके चरणा येषामिति कुक्कुराणां पलायनसामर्थ्यद्योतकं विशेषणं कुक्कुरबालकैः सारमेयबालैर्दंशयित्वा दशनं कारयित्वा। संहनिष्यामः सम्यक् आप्राणगमनं नाशयिष्यामः इत्येवं प्रकारेण भाषमाणाः परस्परमालपन्तः किराताः। समभ्यभाषन्त सम्यगुक्ताः। ननु इत्यामन्त्रणे 'आमन्त्रणे चापि ननु' इति विश्वः। किरातोत्तमाः किरातेषूत्तमाः श्रेष्ठाः। अनेनामन्त्रणेन स्वजातिश्रेष्ठानां सदाचारनिरतता द्योतिता। श्रेष्ठा एव भवादृशो मया याच्यन्ते इति स्वयाचनस्य भाविनी सार्थकता चापि व्यक्तीकृता। घोरो भयानकः प्रचारो गमनं यत्र तत्र कान्तारे वने स्खलितः पन्था मार्गो

---

१. 'दंदशयित्वा' ब-ब. २. 'किरातास्तमोघोरप्रचारे' ब-ब.

चारे कान्तारे स्खलितपथः स्थविरभूसुरोऽहं मम पुत्रकं क्वचिच्छायायां निक्षिप्य मार्गान्वेषणाय किंचिदन्तरमगच्छम् । स कुत्र गतः, केन वा गृहीतः, परीक्ष्यापि न वीक्ष्यते । तन्मुखालोकनेन विनानेकान्यहान्यतीतानि । किं करोमि, क्व यामि, भवद्भिर्न किमदर्शि ' इति । ' द्विजोत्तम, कश्चिदत्र तिष्ठति । किमेष तव नन्दनः सत्यमेव । तदेनं गृहाण ' इत्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरन् । तेभ्यो दत्ताशीरहं बालकमङ्गीकृत्य शिशिरोदकादिनोपचारेणाश्वास्य निःशङ्कं भवदङ्कं समानीतवानस्मि । एनमायुष्मन्तं पितृरूपो भवानभिरक्षतात्' इति । राजा सुहृदापन्निमित्तं शोकं तन्नन्दनविलोकनसुखेन किंचिदधरीकृत्य तमुपहारवर्मनाम्नाहूय राजवाहनमिव पुपोष।

यस्य सः । ' ऋक्पूरप् ' इत्यनेन समासान्तोऽकारः । स्थविरो वृद्धः अनेन दयायोग्यत्वं भूसुरो भूदेव इत्यनेन पूज्यत्वं च स्वस्य कथ्यते । पुत्रकमनुकम्पार्हं मे तनयम् । ' अनुकम्पायाम् ' इत्यनेन कन् । क्वचिदित्यनेन स्थलस्यापरिचितत्वं व्यज्यते । मार्गान्वेषणाय भ्रष्टमार्गं गवेषयितुम् । स बालः कुत्र कस्मिन्प्रदेशे गतः । बालस्य स्वयं गमनमशक्यमत आह । केनेति । परीक्ष्यापीतस्ततो विलोक्यापि न वीक्ष्यते न दृश्यते । तस्य बालस्य मुखावलोकनं वदननिरीक्षणं तेन । ' पृथग्विने ' त्यनेन तृतीया । अनेकानि बहून्यहानि दिवसा अतीतान्यतिक्रान्तानि । किं करोमि तद्दर्शनार्थं को वा प्रयत्नो विधेय इति प्रश्नाशयः । क्व यामि तदन्वेषणाय कुत्र गच्छामि । भवद्भिर्न किमदर्शि सर्वदास्मिन्नरण्ये प्रचरद्भिर्युष्माभिर्नेक्षितः किं स कुत्रापीति प्रश्नतात्पर्यम् । अदर्शीति दृशेः कर्मणि लुङ् । द्विजेति । द्विजेषूत्तमः श्रेष्ठस्तत्संबुद्धौ । कश्चिदस्माभिरज्ञातनामधेयः । अत्र चण्डिकायतने । एषोऽत्र स्थितस्तव नन्दनः किं ते पुत्रः किं सत्यमेव यदि तवैव पुत्रस्तर्हि गृहाण स्वीकुरु । दैवानुकूल्येन भागधेयस्यानुकूलतया । अन्यथा तादृशा दुष्कर्मप्रवीणाः स्वदेवतायै समर्पयितुमानीतं बलिं कथं विसृजेयुरिति दैवानुकूल्येनेति पदस्य ध्वनिः । व्यतरन्नर्पयामासुः । तेभ्यो भिल्लेभ्यो दत्ता आशीराशीर्वचनं येन सः । अङ्गीकृत्य गृहीत्वा । शिशिरं शीतमुदकमादि प्रधानं यस्मिंस्तेनोपचारेणमूर्च्छादूरीकरण साधनेनाश्वास्य परितोष्य निःशङ्कं शङ्कां परित्यज्य । भवदङ्कं त्वत्समीपम् । एनं पुरोवर्तिनमायुष्मन्तं प्रशस्तायुर्विद्यते यस्य तं प्राशस्त्ये मतुब् । प्राशस्त्यं चास्यायुषस्ताद‍ृग्दुर्जनहस्तान्निर्मुक्त्येति ज्ञेयम् । पितृरूपः जनकसदृशः अभिरक्षतात् पालयतु । ' तु ह्योस्तातङाशिष्यन्यतरस्याम् ' इत्यनेन तातङ् । राजेति । राजा मगधेश्वरः सुहृदो मित्रस्य मिथिलाधिपस्यापदापत्तिर्निमित्तं हेतुर्यस्य तं शोकं खेदं तस्य सुहृदो नन्दनः पुत्रस्तस्य विलोकनमीक्षणं तस्य सुखेन किंचिदल्पमधरीकृत्य न्यूनीकृत्य तं सुहृन्नन्दनमुपहारवर्मेति नाम्नाऽभिधानेनाहूय तस्य तन्नाम कृत्वा राजवाहनमिव स्वतनयमिव पुपोषावर्धयत् ।

---

१ ' सत्यमेतदेनं गृहाण' घ.

10 जनपतिरेकस्मिन्पुण्यदिवसे तीर्थस्नानाय पक्कणनिकटमार्गेण गच्छन्नबलया कयाचिदुपलालितमनुपमशरीरं कुमारं कंचिदवलोक्य कुतूहलाकुलस्तामपृच्छत्— 'भामिनि, रुचिरमूर्तिः सराजगुणसंपूर्तिरसावर्भको भवदन्वयसंभवो न भवति। कस्य नयनानन्दनः, निमित्तेन केन भवदधीनो जातः, कथ्यतां याथातथ्येन त्वया' इति। प्रणतया तया शबर्या सलीलमलापि—' राजन्, आत्मपल्लीसमीपे पदव्यां वर्तमानस्य शक्रसमानस्य मिथिलेश्वरस्य सर्वस्वमपहरति शबरसैन्ये मद्दयितेनापहृत्य कुमार एष मह्यमर्पितो व्यवर्धत '। तदवधार्य कार्यज्ञो राजा मुनिकथितं द्वितीयं

जनपतिरिति। जनपती राजहंसः पुण्यदिवसे पर्वणि तीर्थस्नानं ऋष्यादिभिः सेविते जले स्नानं तस्मै। तरति पापमस्मादिति तीर्थं 'पातृतुदिवची' त्यौणादिकस्थः। 'यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षत' इति। पक्कणः शबरालयस्तस्य निकटमार्गः समीपस्थः पन्थास्तेन गच्छन्। अबलया कयाचिदज्ञातनामधेयया प्रमदयोपलालितं प्रेम्णा रक्षितमनुपममुपमारहितमतुलं शरीरं देहो यस्य तं कुमारं बालमवलोक्य दृष्ट्वा कुतूहलेन कौतुकेनाकुलो व्याप्तस्तां स्त्रियमपृच्छत् व्याहरत्। भामिनि हे प्रमदे। रुचिरा मनोहरा मूर्तिः शरीरं यस्य सः राज्ञो गुणानां सपूर्तिः पूरणं तया सहितः। असावग्रे दृश्यमानः अर्भको बालः। भवत्या अन्वयो वंशः भवदन्वयः। 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव' इति भाष्यकारेष्ट्या पुंवत्त्वम्। तत्र संभवो जन्म यस्य सः। 'संभवो हेतावुत्पत्तौ मेलकेऽपि चे' ति मेदिनी। अस्याकारादिनैवायं त्वदन्वयजातो नास्तीति मे मतिरिति नृपवचनतात्पर्यम्। नन्दयतीति नन्दनस्तोषदः। 'नन्दिग्रहिपचादिभ्य०' इत्यनेन ल्युः। नयनयोर्नेत्रयोर्नन्दनः। अनेन तत्पितुर्नाम पृष्टम्। निमित्तेन केन केन कारणेन भवदधीनः त्वदायत्तो जातः। केन कारणेन पिता तं त्वदधीनं कृतवांस्तद्वदेत्यर्थः। यथा तथा इत्यस्य भावो याथातथ्यं ब्राह्मणादित्वात् ष्यञ्। याथार्थ्येन कथ्यतामुच्यताम्। प्रणतया कृतनमस्कारया तया पूर्वोक्तया शबर्या किरातभार्यया सलीलं सहेलमलाप्युक्तम्। लपतेः कर्मणि लुङ्। **राजन्निति।** आत्मनः स्वस्य पल्ली अल्पग्रामस्तस्याः समीपे संनिधौ। 'पल्यल्पग्रामकुट्योः' इति मेदिनी। पदव्यां मार्गे वर्तमानस्य तेन मार्गेण गच्छतः शक्रेणेन्द्रेण समानस्तुल्यस्तस्य मिथिलानामीश्वरो राजा तस्य सर्वस्वं सर्वं सकलं स्वं धनमपहरति बलाद्गृह्णति शबरसैन्ये किरातबले। मम दयितेन भर्त्राऽपहृत्य बलादाच्छिद्य एष पुरोवर्ती कुमारो बालोऽर्पितो दत्तोऽवर्धत वृद्धिमाप। तत्तस्या वचनमवधार्य विचार्य मुनिना कथितं द्वितीयं य उपमातुः कन्यकाया हस्ते आसीदित्युक्तं तं राजकुमारमेव मिथिलेशतनयमेव निश्चित्य ज्ञात्वा। साम्ना मृदुभाषितेन दानेन धना-

राजकुमारमेव निश्चित्य सामदानाभ्यां तामनुनीयापहारवर्मेत्याख्याय देव्यै ' वर्धय ' इति समर्पितवान् ।

11 कदाचिद्वामदेवशिष्यः सोमदेवशर्मा नाम कंचिदेकं बालकं राज्ञः पुरो निक्षिप्याभाषत—' देव, रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धार्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि—' स्थविरे, का त्वम् । एतस्मिन्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसि ' इति । वृद्धयाप्यभाषि—' मुनिवर, कालयवननाम्नि द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवरः कश्चिदस्ति । तन्नन्दिनीं नयनानन्दकारिणीं सुवृत्तां नामैतस्माद्द्वीपादागतो मगधनाथमन्त्रिसंभवो रत्नोद्भवो नाम रमणीयगुणालयो भ्रान्तभूवलयो मनोहारी व्यवहार्युपयम्य सुवस्तुसंपदा श्वशुरेण संमानितोऽभूत् । कालक्रमेण नताङ्गी गर्भिणी जाता । ततः सोदरविलोकनकुतूहलेन रत्नोद्भवः कथंचिच्छ्वशुरमनुनीय चपललो-

---

दिदानेन च तां शबरीमनुनीय तोषयित्वाऽपहारवर्मेत्याख्यायाभिधानं कृत्वा देव्यै स्वभार्यायै वर्धय पोषयेति समर्पितवान् दत्तवान् ।

कदाचिदिति । वामदेवस्य शिष्यः छात्रः सोमदेवशर्मा सोमदेव इति प्रथितः । राज्ञो राजहंसस्य पुरोऽग्रे निक्षिप्य संस्थाप्याभाषतावदत् । रामतीर्थे तन्नाम्नि क्षेत्रे । प्रत्यागच्छता प्रतिनिवर्तमानेन । काननावनौ अरण्यभुवि कयाप्यज्ञातनामादिकया वनितया प्रमदया धार्यमाणं गृहीतमुज्ज्वलो दीप्त आकारो यस्य तं कुमारं बालं विलोक्य दृष्ट्वा सादरमादरेण सहितं यथा तथाऽभाण्युक्तम् । भणतेः कर्मणि लुङ् । स्थविरे वृद्धे । अटवीमध्ये वनमध्ये । उद्वहन्ती धारयन्ती । किमर्थं केन कारणेनायासेन त्रासमङ्गीकृत्य भ्रमस्याहिण्डसे । मुनिवर मुनिश्रेष्ठ । कालयवननाम्नि अधुना 'झांझीबार' इति प्रसिद्धे द्वीपेऽन्तरीपे । धनेनाढ्यः संपन्नोऽतीव संपत्तिमान् । वैश्यवरो वणिक्श्रेष्ठः । तस्य नन्दिनीं कन्यां नयनयोर्नेत्रयोरानन्दं तोषं करोति तथाभूतां सुवृत्तां नाम तदभिधानामेतस्माद्द्वीपादस्माद्भारतवर्षादागतो रमणीयानां मनोहराणां गुणानामालयः स्थानं भ्रान्तं पर्यटितं भूवलयं पृथ्वीचक्रं येन सः मनो हरति तच्छीलः । ताच्छील्ये णिनिः । व्यवहारी उद्यमोपजीवी वाणिज्यकुशल इति यावत् । उपगम्य विवाह्य श्वशुरेण भार्याजनकेन सुवस्तूनां सत्पदार्थानां संपदा संमानितः पूजितः । कालक्रमेण विवाहोत्तरं गच्छता कालेन नताङ्गी नम्रावयवा गर्भिणी गर्भवती । 'अत इनिठनौ' वित्यनेनेनिः । 'ऋन्नेभ्य०' इत्यनेन ङीप् च । तत इति । ततोऽनन्तरं सोदरस्य एकोदरजातस्य स्वभ्रातुः सुश्रुतस्य विलोकनमीक्षणं तस्य कुतूहलेन कौतुकेन । कथंचिन्महता प्रयत्नेनेत्यर्थः । अनुनीय अनुकूल-

चनयानया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे । कल्लोलमालिकाभिहतः पोतः समुद्राम्भस्यमज्जत् । गर्भभरालसां तां ललनां धात्रीभावेन कल्पिताहं कराभ्यामुद्वहन्ती फलकमेकमधिरुह्य दैवगत्या तीरभूमिमगमम् । सुहृज्जनपरिवृतो रत्नोद्भवस्तत्र निमग्नो वा केनोपायेन तीरमगमद्वा न जानामि । क्लेशस्य परां काष्ठामधिगता सुवृत्तास्मिन्नटवीमध्येऽद्य सुतमसूत । प्रसववेदनया विचेतना सा प्रच्छायशीतले तरुतले निवसति । विजने वने स्थातुमशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारोऽप्यानायि' इति । तस्मिन्नेव क्षणे वन्यो वारणः कश्चिददृश्यत । तं विलोक्य भीता

यित्वा । चपले चञ्चले लोचने यस्यास्तया । अनया स्वभार्यया सह सार्द्धं प्रवहणं नौकामारुह्य । पुष्पपुरं तदाख्यां मगधराजधानीमभिप्रतस्थे । 'समवप्रविभ्यः स्थ' इत्यनेन तङ् । कल्लोलेति । कल्लोलानां महातरङ्गाणां मालाभिः पङ्क्तिभिः अभिहतस्ताडितः पोतो नौका । 'महत्सूल्लोलकल्लोला' वित्यमरः । समुद्राम्भसि सागरोदकेऽमज्जत् । मग्नोऽभवत् । गर्भभरेण भ्रूणभारेणालसां जडां तां ललनां स्त्रियं धात्रीभावेनोपमातृत्वेन कल्पिता नियुक्ता कराभ्यां स्वहस्ताभ्यामुद्वहन्ती जलमध्ये निमज्जन्तीं तां स्वजीवितस्पृहां त्यक्त्वापि धारयन्ती एकं फलकं नावो दारुमयं खण्डमधिरुह्याश्रित्य दैवगत्या भागधेयस्यानुकूल्यादेव तीरभूमिं तटभुवमगमम् प्रापम् । सुहृज्जनेन मित्रसङ्घेन परिवृतो वेष्टितः तत्र समुद्रे केनोपायेन फलकादिनाऽन्येन वा केनापि । क्लेशस्य दुःखस्य परां काष्ठामतिशयं दुःखमिति यावत् । अधिगता प्राप्ता । सुतं पुत्रमसूताजनयत् । प्रसवस्य वेदना दुःखं तया विचेतना मूर्च्छिता सा सुवृत्ता । प्रकृष्टा छाया प्रच्छायमित्यपव्याख्यानं 'छाया बाहुल्य' इत्यनेन वा 'विभाषा सेने' त्यनेन वा तत्र ह्रस्वः प्रकल्प्यः परं तत्र 'तत्पुरुषोऽनञ्कर्मधारय' इत्यधिकारसत्त्वात्कर्मधारये तदप्रवृत्तेः । अतः प्रकृष्टा छाया यस्य तदिति 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इत्यनेन बहुव्रीहिः । प्रच्छायं छायाबाहुल्ययुक्तमत एव शीतलं तस्मिन् तरुतले वृक्षतले निवसति वर्तते । **विजन इति** । विजने जनरहिते वनेऽरण्ये स्थातुमशक्यतया निवसनमशक्यमिति जनपदं देशं गच्छति तथाभूतं मार्गं पन्थानमन्वेष्टुं मार्गयितुमुद्युक्तया तत्परया । विवशाया असहायायास्तस्याः सुवृत्तायाः समीपे सन्निधौ बालकं नूत्नोत्पन्नं वत्सं निक्षिप्य स्थापयित्वा गन्तुमनुचितं गमनं न योग्यमिति कुमारोपि स बालोप्यानायि आनीतः । नयतेः कर्मणि लुङ् । **तस्मिन्निति** । तस्मिन्नेव क्षणे तद्भाषणकाल एव वन्यो वने

सा बालकं निपात्य प्राद्रवत्। अहं समीपलतागुल्मके प्रविश्य परीक्षमाणोऽतिष्ठम्। निपतितं बालकं पल्लवकवलमिवाददति गजपतौ कण्ठीरवो भीमरवो महाग्रहेण न्यपतत्। भयाकुलेन दन्तावलेन झटिति वियति समुत्पात्यमानो बालको न्यपतत्। चिरायुष्मत्तयासंन्नोन्नततरुशाखासमासीनेन वानरेण केनचित्पक्वफलबुद्ध्या परिगृह्य फलेतरतया विततस्कन्धमूले निक्षिप्तोऽभूत्। सोऽपि मर्कटः क्वचिदगात्। बालकेन सत्त्वसंपन्नतया सकलक्लेशसहेनाभावि। केसरिणा करिणं निहत्य कुत्रचिदगामि। लतागृहान्निर्गतोऽहमपि तेजःपुञ्जं बालकं शनैरवनीरुहादवतार्य वनान्तरे वनितामन्विष्याविलोक्यैनमानीय गुरवे निवेद्य तन्निदेशेन भवन्निकटमानीतवानस्मि'

भवः। दिगादित्वाद्यत्। वारणो हस्ती अदृश्यत दृष्टिपथमागतः। तं गजं विलोक्य दृष्ट्वा भीता त्रस्ता सा दासी बालकं निपात्य परित्यज्य प्राद्रवत् पलायामास। समीपलतानां समीपस्थव्रततीनां गुल्मकः स्तम्बस्तत्र। लतागुल्मो नाम 'वेलीची जाळी' इति महाराष्ट्रभाषायां प्रसिद्धः। प्रविश्यान्तर्हितो भूत्वेति यावत्परीक्षमाणः किं भवतीति विलोकन्। निपतितं दासीहस्ताद्भूमौ भ्रष्टं बालकं वत्सं पल्लवकवलमिव पर्णग्रासमिव। नूतनजातस्य शिशो रक्तवर्णत्वात्पल्लवकवलसाम्यम्। आददति गृह्णति गजपतौ करिवरे। भीमो भयानको रवो गर्जना यस्य स कण्ठीरवः सिंहः। महाग्रहेण महताऽऽवेशेन। 'ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे' इति मेदिनी। न्यपतत् गजोपरि पपात भयेन भीत्याकुलो व्याप्तस्तेन। दन्तावलेन गजेन। 'दन्तशिखात्संज्ञायाम्' इत्यनेन मत्वर्थीये वलचि 'वले' इत्यनेन दीर्घः। झटिति तूर्णम्। वियत्याकाशे समुत्पात्यमान उत्क्षिप्यमाणो बालको वत्सो न्यपतत् अध आगतः। चिरमायुश्चिरायुर्विद्यते यस्य तस्य भावस्तया आसन्नः समीपः उन्नत उच्चस्तरुर्वृक्षस्तस्य शाखायां समासीनेन स्थितेन वानरेण कपिना। पक्वफलबुद्ध्या ताम्रवर्णत्वात्पक्वफलभ्रान्त्या परिगृह्य स्वहस्ते धृत्वा फलेतरतया फलभिन्नतया वितते विस्तीर्णे स्कन्धमूले शाखामूले निक्षिप्तः स्थापितः। सोपि बालकस्थापको मर्कटः वानरः क्वचित्कुत्रचिदगात्। इणो लुङ्। बालकेन तेन नूतनजातेन शिशुना सत्त्वं बलं तेन संपन्नो युक्तस्तस्य भावस्तया सकलानां सर्वेषामुपर्युक्तानां क्लेशानां सहेन सहिष्णुनाऽभावि। भवतेर्भावे लुङ्। केसरिणा सिंहेन करिणं गजं निहत्य हत्वा। अगामि' गच्छतेःकर्मणि लुङ्। लतागृहात्पूर्वोक्ताल्लतागुल्मान्निर्गतो बहिरागतः तेजसां पुञ्जं समूहं बालकं शनैर्यथा तस्य क्लेशो न भवेत्तथा। अवतार्य अध आनाय्य। णिजन्तात्तरतेर्ल्यप्। अन्यद्वनं वनान्तरं मयूरव्यंसकादित्वात्समासः। वनितां बालं परित्यज्य गतां स्त्रियमन्विष्यन् मार्गयन्। अविलोक्य कुत्रापि तामदृष्ट्वा।

---

१ 'स चोन्नत' न.

इति। सर्वेषां सुहृदामेकदैवानुकूलदैवाभावेन महदाश्चर्यं बिभ्राणो राजा 'रत्नोद्भवः कथमभवत्' इति चिन्तयंस्तन्नन्दनं पुष्पोद्भवनामधेयं विधाय तदुदन्तं व्याख्याय सुश्रुताय विषादसंतोषावनुभवंस्तदनुजतनयं समर्पितवान्।

12 अन्येद्युः कंचन बालकमुरसि दधती वसुमती वल्लभमभिगता। तेन 'कुत्रत्योऽयम्' इति पृष्टा समभाषत—'राजन्, अतीतायां रात्रौ काचन दिव्यवनिता मत्पुरतः कुमारमेकं संस्थाप्य निद्रामुद्रितां मां विबोध्य विनीताब्रवीत्—'देवि, त्वन्मन्त्रिणो धर्मपालनन्दनस्य कामपालस्य वल्लभा यक्षकान्ताहं तारावली नाम,

---

एनं पूर्वोक्तम्। गुरवे वामदेवाय निवेद्य कथयित्वा। तन्निदेशेन तदाज्ञया भवन्निकटं त्वदन्तिकम्। सर्वेषामिति। सुहृदां मित्राणामेकदैवैकस्मिन्नेव कालेऽनुकूलदैवाभावेन भागधेयस्य प्रातिकूल्यत्वात् महद् आश्चर्यमिति पदद्वयं न समास आत्वापत्तेः। अथवा कविपरिपाट्यनुसारतः समास इत्यङ्गीकरणीयम्। बिभ्राणो धारयन् राजा राजहंसः। रत्नोद्भवः पयोनिधौ मग्नः कथमभवत्कुत्र वर्तत इति चिन्तयंस्तद्विषयिणीं चिन्तां वहन् तन्नन्दनं तत्पुत्रं पुष्पोद्भव इति नामधेयमभिधानं यस्य तथा विधाय कृत्वा। 'भागरूपनामभ्यो धेयः' इत्यनेन स्वार्थे धेयः। तदुदन्तं तां वार्तां सुश्रुताय रत्नोद्भवाग्रजाय। व्याख्याय कथयित्वा विषादो रत्नोद्भवनाशनिमित्तः संतोषश्च तत्पुत्रप्राप्तिजस्तावनुभवन्नुपभुञ्जानः। तस्य सुश्रुतस्यानुजतनयो भ्रातुष्पुत्रस्तं समर्पितवान् दत्तवान्।

अन्येद्युरिति। अन्येद्युरन्यस्मिन्नहनि। 'सद्यः परुत्०' इत्यनेन निपातः। उरसि वक्षसि दधती धारयन्ती वसुमती राजमहिषी वल्लभं भर्तारमभिगता प्राप्ता। कुत्रत्यः कुत्रजातः। 'अव्ययात्त्यप्' इति त्यप्। अतीतायां गतायां रात्रौ निशि काचनापरिचिता दिव्यवनिता स्वर्गीया सुन्दरी। दिविभवेति दिगादित्वाद्यत्। मत्पुरतः मदग्रे। पुरत इत्यस्य नगरादित्यर्थो नात्र संगच्छते। पुरशब्दस्य पूर्ववाचकता च नास्ति। पूर्वशब्दात् 'दक्षिणोत्तराभ्याम्' इत्यनेनातसुचि पुर इतिरूपमत एवामुं पुरः पश्यसीति कालिदासः। अतः प्रयोगोऽयमवैयाकरणत्वं द्योतयति कर्तुरिति पण्डितरायः। दक्षिणोत्तराभ्यां तसुजित्यनेन सिद्धेऽकारकरणमन्यतोऽपितद्विधानार्थमतः पुर् अग्रगमने अस्मात्क्विपि ततोऽतसुचिच सिद्धमिष्टमिति ज्ञानेन्द्रभिक्षुः। नागेशस्तु 'पुर अग्रगमने इति चौरादिकाण्णिजभावे इगुपधलक्षणे के सार्वविभक्तिकस्तसिः' इत्याह। इदमेव च युक्तमित्यलम्। कुमारं बालं संस्थाप्य निधाय। निद्रया स्वापेन मुद्रितां निमीलितनेत्रां मां विबोध्योत्थाप्य विनीता नम्रा सत्यब्रवीदवदत्। त्वन्मन्त्रिणस्त्वत्साचिवस्य धर्मपालस्य नन्दनः पुत्रस्तस्य वल्लभा प्रिया यक्षकान्ता यक्षजातीया वनिता। 'कान्ता प्रियङ्गु-

---

१ 'यक्षकन्या'.

नन्दिनी मणिभद्रस्य । यक्षेश्वरानुमत्या मदात्मजमेतं भवत्तनूजस्याम्भोनिधिवलयवेष्टितक्षोणीमण्डलेश्वरस्य भाविनो विशुद्धयशोनिधे राजवाहनस्य परिचर्याकरणायानीतवत्यस्मि । त्वमेनं मनोजसंनिभमभिवर्धय' इति । विस्मयविकसितनयनया मया सविनयं[1] सत्कृता स्वक्षी यक्षी साप्यदृश्यतामयासीत्' इति । कामपालस्य यक्षकन्यासंगमे विस्मयमानमानसो राजहंसो रञ्जितमित्रं सुमित्रं मन्त्रिणमाहूय तदीयभ्रातृपुत्रमर्थपालं विधाय तस्मै सर्वं वार्तादिकं व्याख्यायादात् ।

13 **ततः परस्मिन्दिवसे वामदेवान्तेवासी तदाश्रमवासी समाराधितदेवकीर्तिं निर्भर्त्सितमारमूर्तिं कुसुमसुकुमारं कुमारमेकमवगमय्य नरपतिमवादीत्—'देव, तीर्थयात्राप्रसङ्गेन कावेरीतीरमागतोऽहं विलोलालकं बालकं निजोत्सङ्गतले निधाय**

योषितोः' इति हेमचन्द्रः । नन्दिनी कन्यका । यक्षेश्वरस्य कुबेरस्यानुमत्याऽनुमोदनेनैतं पुरोवर्तिनं मदात्मजं मम पुत्रं भवत्तनूजस्य त्वत्पुत्रस्याम्भोनिधीनां मण्डलं समूहश्चत्वारः समुद्रा इति यावत्तेन वेष्टितं व्याप्तं यत्क्षोणीमण्डलं भूवलयं तस्येश्वरः स्वामी तस्य भाविन उत्पत्स्यमानस्य विशुद्धानां यशसां कीर्तीनां निधेः राजवाहनस्य परिचर्याकरणं सेवासम्पादनं तस्मै । मनोजेन मदनेन संनिभः सदृशस्तमेनमुपन्युक्तं तनयं वर्धय पोषय। विस्मयेनाश्चर्येण विकासिते विस्फारिते नयने यस्यास्तया मया । सविनयं नम्रतया सत्कृता पूजिता सुष्ठु अक्षिणी नयने यस्याः सा यक्षी अदृश्यतामव्यक्ततामयासीदगमत् । 'यमरमनमातां०' इत्यनेनादन्तात्सगिटौ । यक्षकन्यया संगमो मीलनं तत्र विस्मयमानमाश्चर्ययुक्तं मानसं मनो यस्य सः । रञ्जितानि रमितानि मित्राणि येन तं सुहृदानन्ददायकं सुमित्रं तत्संज्ञकं मन्त्रिणं सचिवमाहूयाकार्य तदीयस्तस्य भ्रातृपुत्रः सोदरस्य तनयस्तमर्थपालं तत्संज्ञकं विधाय कृत्वा तन्नामार्थपाल इति कृत्वा तस्मै सुमित्राय वार्तादिकं पुत्राधिगमवृत्तान्तादि व्याख्याय कथयित्वाऽदादर्पयामास ।

तत इति । वामदेवस्य तदाख्यमुनेरन्ते वसतीत्यन्तेवासी छात्रः । सुप्यजाताविति णिनौ 'शयवासवासिष्वकालाद्' इत्यलुक् । तदाश्रमे तस्य वामदेवस्याश्रमे वसति सः । समाराधिता सम्यगधिगता देवसदृशी सुरतुल्या कीर्तिर्दीप्तिस्तेज इति यावद्येन सः । कीर्तिशब्दस्तेजोवाचक इति शब्दरत्नावली । निर्भर्त्सिता मारमूर्तिर्मदनमूर्तिर्येन तं रूपेण मदनमप्यतिशयान इति तात्पर्यम् । कुसुममिव सुकुमारं कोमलम् । अवगमय्य प्रापय्य । नरपतिं राजानं राजहंसमवादीत् । 'वदव्रज०' इत्यनेनेडादौ सिचि वृद्धिः तीर्थयात्रा पुण्यस्थलगमनं तस्य प्रसङ्गेन क्रमेण कावेर्याः चोलदेशस्थनद्यास्तीरमागतः प्राप्तोऽहं विलोलाश्चञ्चला अलकाः केशा यस्य तं । निजोत्सङ्गे स्वीयाङ्के

---

१ 'सविनया'.

रुदतीं स्थविरामेकां विलोक्यावोचम्--'स्थविरे, का त्वम्, अयमर्भकः कस्य नयनानन्दकरः, कान्तारं किमर्थमागता, शोककारणं किम्' इति। सा करयुगेन बाष्पजलमुन्मृज्य[1] निजशोकशङ्कूत्पाटनक्षममिव मामवलोक्य शोकहेतुमवोचत्--'द्विजात्मज, राजहंसमन्त्रिणः सितवर्मणः कनीयानात्मजः सत्यवर्मा तीर्थयात्राभिलाषेण देशमेनमागच्छत्। स कस्मिंश्चिदग्रहारे कालीं नाम कस्यचिद्भूसुरस्य नन्दिनीं विवाह्य तस्या अनपत्यतया गौरीं नाम तद्भगिनीं काञ्चनकान्तिं परिणीय तस्यामेकं तनयमलभत। काली सासूयमेकदा धात्र्या मया सह बालमेनमेकेन मिषेणानीय तटिन्यामेतस्यामक्षिपत्। करेणैकेन बालमुद्धृत्यापरेण प्लवमाना नदीवेगागतस्य कस्यचित्तरोः शाखामवलम्ब्य तत्र शिशुं निधाय नदीवेगेनोह्यमाना केनचित्तरुलग्नेन काल-

---

निधाय संस्थाप्य रुदतीं अश्रूणि मुञ्चतीं स्थविरां वृद्धां विलोक्य दृष्ट्वाऽवोचमवदम्। 'वच उम्' इत्यनेनोम्। का त्वं त्वन्नाम किं। अर्भको बालः कस्य नयनयोरानन्दः संतोषस्तस्य करो विधाता। एनं प्रेक्ष्य को वाऽतिशयं प्रमुदितो भवत्यर्थादस्य पितुरभिधानं किमित्यर्थः। कान्तारं महारण्यं किमर्थं केन प्रयोजनेन 'कान्तारोऽस्त्री महारण्य' इति मेदिनी। शोककारणं रोदनस्य को वा हेतुः। सा वृद्धा करयुगेन हस्तद्वयेन बाष्पजलं नेत्रोदकमुन्मृज्य निःसार्य निजशोकः स्वदुःखमेव शङ्कुः कीलकस्तस्योत्पाटनमुद्धरणं तत्र क्षमं समर्थमिव मामवलोक्य ज्ञात्वा शोकस्य हेतुं कारणमवोचदुक्तवती। द्विजात्मज ब्राह्मणपुत्र। अनेनाव्हानेन ब्राह्मणत्वं संसूच्यापन्निमग्नोद्धरणे प्रयतनं स्वभावो ब्राह्मणस्येति द्योतितम्। राजहंसस्य मन्त्री सचिवस्तस्य सितवर्मणस्तन्नामकस्य कनीयान् यवीयान् द्वितीयः पुत्रः। तीर्थयात्रायाः पुण्यक्षेत्रगमनस्याभिलाषेणेच्छया एनं देशं चोलप्रदेशमागच्छत्प्रापत्। अग्रहारे नृपात्प्रतिग्रहेण लब्धे भूप्रदेशे। भूसुरस्य ब्राह्मणस्य नन्दिनीं कन्यां विवाह्य परिणीय तस्याः काल्या अनपत्यतयाऽपत्याभावतया। तस्याः काल्या भगिनीं स्वसारं काञ्चनमिव सुवर्णमिव कान्तिर्यस्यास्तां परिणीयोपयम्य। तस्यां गौर्यामेकं तनयं पुत्रमलभताजनयदित्यर्थः। कालीति। सासूयं गुणेषु दोषाविष्करणपूर्वकं यथा तथा। धात्र्योपमात्रा। बालकमेवं पुरोदृश्यमानं सपत्नीतनयमेकेन मिषेण केनचिदपदेशेन एतस्यां तटिन्यां कावेर्याख्यां नद्यामक्षिपदत्यजत्। करेण हस्तेन बालं वत्समुध्दृत्योपरि जलस्य धारयन्ती। अपरेणान्येन करेण प्लवमाना तरन्ती नद्या वेगेन जवेनागतस्य तरोर्वृक्षस्य शाखामवलम्ब्य धृत्वा तत्सहायं गृहीत्वेत्यर्थः। तत्र तस्यां शाखायां शिशुं बालं निधाय संस्थाप्य नदीवेगेन जलरंहसोह्यमाना बलान्नीयमाना।

---

१ 'उत्सृज्य' ब.

भोगिनाहमदंशि। मदवलम्बीभूतो भूरुहोऽयमस्मिन्देशे तीरमगमत्। गरलस्योद्दीपनतया मयि मृतायामरण्ये कश्चन शरण्यो नास्तीति मया शोच्यते' इति। ततो विषमविषज्वालावलीढावयवा सा धरणीतले न्यपतत्। दयाविष्टहृदयोऽहं मन्त्रबलेन विषव्यवस्थामपनेतुमक्षमः समीपकुञ्जेष्वौषधिविशेषमन्विष्य प्रत्यागतो व्युत्क्रान्तजीवितां तां व्यलोकयम्। तदनु तस्याः पावकसंस्कारं विरच्य शोकाकुलचेता बालमेनमगतिमादाय सत्यवर्मवृत्तान्तश्रवणवेलायां तन्निवासाग्रहारनामधेयस्याश्रुततया तदन्वेषणमशक्यमित्यालोच्य भवदमात्यतनयस्य भवानेवाभिरक्षितेति भवन्तमेनमनयम्' इति। तन्निशम्य सत्यवर्मस्थितेः सम्यगनिश्चिततया खिन्नमानसो

तरौ लग्नः संसक्तस्तेन कालभोगिना कृष्णसर्पेणाहमदंशि। दंशेः कर्मणि लुङ्। ममावलम्बीभूत आश्रयीभूतोऽयं पुरो दृश्यमानो भूरुहो वृक्षोऽस्मिन्देशे यत्र त्वं तिष्ठसि तत्र तीरमगमत्कूलं प्रापत्। गरलस्य सर्पविषस्योद्दीपनतया प्रखरतया मृतायां विषपीडया परलोकं गतायां कश्चन कोपि शरण्योऽस्य बालस्य रक्षको नास्तीति मया शोच्यते रुद्यते इदं मम रोदनकारणम्। इति शब्दस्तद्भाषणसमाप्तिद्योतकः। तत इति। विषममसह्यं यद्विषं सर्पगरलं तस्य ज्वालाभिरवलीढा व्याप्ता अवयवा इन्द्रियाणि यस्याः सा धरण्यास्तले भुवः पृष्ठे न्यपतत् विषव्याप्ततया स्वशरीरधारणेऽप्यसमर्था मोहमुपगतेत्यर्थः। दयया करुणयाविष्टं व्याप्तं हृदयं यस्य सः। मन्त्रबलेन मन्त्रसामर्थ्येन विषस्य व्यवस्थां तच्छरीरे जायमानं परिणाममपनेतुं रोद्धुमक्षमोऽसमर्थः समीपकुञ्जेषु निकटवर्तिलतागहनेष्वौषधिविशेषं विषहरणक्षमं वनस्पतिविशेषमन्विष्य मार्गयित्वा प्रत्यागतः प्रतिनिवृत्तः व्युत्क्रान्तं गतं जीवितं प्राणा यस्यास्तां मृतामित्यर्थः व्यलोकयमपश्यम्। तदनु ततः पश्चात्। तस्या मृतायाः स्थविरायाः पावकसंस्कारं विरच्य तामग्निसात्कृत्वा। शोकेन तस्या वृद्धाया मरणजेन दुःखेनाकुलं व्याप्तं चेतो मानसं यस्य सः। अगतिं न गतिर्गमनं यस्य तमनाथमिति यावदेनं पुरोनिहितं बालं वत्समादाय गृहीत्वा। सत्यवर्मणोऽस्य बालस्य जनकस्य वृत्तान्तश्रवणं वार्ताकर्णनं तस्य वेलायां तस्य सत्यवर्मणो निवासो वसतिस्थानं योऽग्रहारो राजदत्तभूप्रदेशस्तस्याऽश्रुततयाऽनाकर्णितत्वेन। तस्यान्वेषणं मार्गणमशक्यं दुष्करमित्यालोच्य विचार्य। भवतस्तेऽमात्यतनयस्य सचिवपुत्रस्य भवानेव त्वमेवाभिरक्षिता रक्षणकर्ता इतिशब्दो हेतौ भवन्तं त्वत्समीपमित्यर्थः एनं कुमारमनयं गृहीत्वाऽऽगच्छम्। तत् मुनिभाषितं निशम्य श्रुत्वा सत्यवर्मणः स्थितेस्तद्विषये सम्यक् सुष्ठु। अनिश्चिततया स कुत्रास्ति कथं चेति सम्यक् ज्ञानाभावेन खिन्नं दुःखि मानसं यस्य स नरपती राजहंसः सुमतये सत्यवर्मणो ज्यायसे भ्रात्रे। सोमदत्तं नाम सोमदत्त इति तन्नाम कृत्वाऽनन्तरमि-

नरपतिः सुमतये मन्त्रिणे सोमदत्तं नाम तदनुजतनयमर्पितवान्। सोऽपि सोदरमागतमिव मन्यमानो विशेषेण पुपोष।

14 एवं मिलितेन कुमारमण्डलेन बालकेलीरनुभवन्नधिरूढानेकवाहनो राजवाहनोऽनुक्रमेण चौलोपनयनादिसंस्कारजातमलभत। ततः सकललिपिज्ञानं निखिलदेशीयभाषापाण्डित्यं षडङ्गसहितवेदसमुदायकोविदत्वं काव्यनाटकाख्यानकाख्यायिकेतिहासचित्रकथासहितपुराणगणनैपुण्यं धर्मशब्दज्योतिस्तर्कमीमांसादिसमस्तशास्त्रनिकरचातुर्यं कौटिल्यकामन्दकीयादिनीतिपटलकौशलं वीणाद्यशेषवाद्यदाक्ष्यं संगी-

---

त्यर्थः। तस्यानुजस्य भ्रातुस्तनयं पुत्रमर्पितवान्। सोऽपि सुमतिरपि सोदरं भ्रातरमागतमिव प्राप्तमिव मन्यमानस्तत्पुत्रलाभेन तमिव प्रत्यागतं तर्कयमाणः। विशेषेणातीवादरेण पुपोष वर्धयामास।

एवमिति। एवमनया रीत्या मिलितैरेकीभूतेन कुमारमण्डलेन प्रमति, मित्रगुप्त, मन्त्रगुप्त, विश्रुत, उपहारवर्म, अपहारवर्म, पुष्पोद्भव, अर्थपाल, सोमदत्त संज्ञकानां बालानां मण्डलेन समूहेन सह बालकेलीः बाल्यक्रीडा अनुभवन्। अधिरूढान्यनेकानि वाहनानि रथादीनि येन सः। अनुक्रमेण योग्यक्रमेण चौलं संस्कारविशेषः। तदुक्तं प्रयोगपारिजाते 'जाताधिकाराज्जन्मादि तृतीयेऽब्दे तु चौलकम्। आद्येऽब्दे कुर्वते केचित्पञ्चमेऽब्दे द्वितीयके। उपनीत्या सहैवेति विकल्पाः कुलधर्मतः' इति। उपनयनं चापि गुरुसमीपनयनरूपसंस्कारविशेषः। इत्येतौ संस्कारौ आदी प्रधानौ येषां तेषां संस्काराणां जातं समूहमलभत प्राप्तवान्। **तत इति।** ततः संस्कारोत्तरं सकलानां सर्वासां लिपीनामक्षरविन्यासानां ज्ञानम्। निखिलासु देशीयभाषासु प्राकृतासु देशविशेषेषु प्रचरन्तीषु भाषासु पाण्डित्यं प्राविण्यम्। षड्भिरङ्गैः सहितानां वेदानामृग्यजुःसामाथर्वणां समुदाये कोविदत्वं पाण्डित्यम्। 'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः। ज्योतिषामयनं चैव षडङ्गो वेद उच्यते' इति। कोर्वेदस्य विदो ज्ञातेति व्युत्पत्त्या कोविदशब्दो वेदज्ञ स च 'कोविदो बुधः' इति कोशात्पण्डितवाचकः। कुपूर्वकाद्विदेः 'इगुपज्ञे' ति कः। काव्यानि रघुवंशादीनि नाटकानि कालिदासादिकृतानि शाकुंतलादीनि आख्यानानि गद्यमया वृत्तान्तविशेषाः आख्यायिका वासवदत्तादयः इतिहासो भारतादिः चित्रा रम्याः कथाः कादम्बर्यादयस्ताभिः सहितः पुराणगणः पुराणानामष्टादशमहापुराणानामुपपुराणानां च गणः समूहस्तत्र नैपुण्यं कौशल्यम्। पुराणानि तु 'ब्राह्मं पाद्मं वैष्णवं च वायवीयं तथैव च। भागवतं नारदीयं मार्कण्डेयं च कीर्तितम्। आग्नेयं च भविष्यं च ब्रह्मवैवर्तलिङ्गके। वाराहं च तथा स्कान्दं वामनं कूर्मसंज्ञकम्। मात्स्यं च गारुडं तद्वद्ब्रह्माण्डाख्यमिति त्रिषट्' इति नारदीये। अष्टादशोपपुराणानि तु 'आद्यं सनत्कुमारोक्तं नार-

तत्साहित्यहारित्वं मणिमन्त्रौषधादिमायाप्रपञ्चचुञ्चुत्वं मातङ्गतुरङ्गादिवाहनारोहपाटवं विविधायुधप्रयोगचणत्वं चौर्यदुरोदरादिकपटकलाप्रौढत्वं च तत्तदाचार्येभ्यः सम्यग्लब्ध्वा यौवनेन विलसन्तं कृत्येष्वनलसं तं कुमारनिकरं निरीक्ष्य महीवल्लभः सः

सिंहमथापरम्। तृतीयं वायवीयं च कुमारेण च भाषितम्। चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्। दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम्। नन्दिकेश्वरयुग्मं च तथैवोशनसेरितम्। कापिलं वारुणं शाम्बं कालिकाह्वयमेव च। माहेश्वरं तथा कल्की दैवं सर्वार्थसिद्धिदम्। पराशरोक्तमपरं मारीचं भास्कराह्वयम्' इति कौर्मे। धर्मशास्त्रं मन्वादिस्मृतय आचारव्यवहारप्रायश्चित्तप्रतिपादकाः शब्दशास्त्रं व्याकरणं ज्योतिःशास्त्रं ग्रहादिगतिनिरूपणशास्त्रम् 'पञ्चस्कन्दमिदं शास्त्रं होरागणितसंज्ञितम्। केरलिः शकुनं चैव' इति प्रश्नरत्नटीकायाम्। पूर्वत्र वेदाङ्गत्वेन ज्योतिषो ग्रहणादत्र पुनः कथनं पुनरुक्तमथवा पूर्वत्र कालगणनारूपमत्र फलज्योतिषं ग्राह्यम्। तर्को न्यायशास्त्रं मीमांसा पूर्वोत्तररूपा इति आदयो येषां तेषां समस्तानां शास्त्राणां निकरे समूहे चातुर्यं कौशल्यम्। कौटिल्यश्चाणक्यस्तत्कृतं कामन्दकीयं तदाख्यया प्रसिद्धं चादिनी मुख्ये यासां तासां नीतीनां नीतिशास्त्राणां पटले समूहे कौशलं कुशलता वीणा वल्लकी तन्तुवाद्यविशेषः आदिर्येषां तेष्वशेषेषु दाक्ष्यं तद्वादने दक्षता। संगीतं प्रेक्षणार्थं नृत्यगीतवाद्यं तदुक्तं हेमचन्द्रेण 'गीतवाद्यनृत्यत्रयं नाट्यं तौर्यत्रिकं च यत्। संगीतं प्रेक्षणार्थे' इति पूर्वं वाद्यकौशल्यस्य वर्णनादत्र संगीते तद्भिन्नं ग्राह्यम्। साहित्यमलंकारशास्त्रं ताभ्यां हारित्वं मनोहारित्वं तत्र रसिकतेत्यर्थः। मणिः वन्हिदाहप्रतिबंधकादिः मन्त्रः विषहरणादिः औषधं रसायनं चादीनि यस्य स मायाप्रपञ्चः कपटप्रबन्धस्तेन वित्तस्तभावः। 'तेन वित्तश्चञ्चुप्०' इत्यनेन चञ्चुप्। मातङ्गो गजस्तुरङ्गोऽश्व आदी प्रमुखौ येषां तेषु वाहनेषु आरोहणं तत्र पाटवं कौशल्यम्। 'इगन्ताश्च लघुपूर्वाद्' इत्यनेन भावेऽण् विविधानामनेकेषामायुधानां शस्त्राणां प्रयोगैर्वित्तः प्रसिद्धो विविधायुधप्रयोगचणस्तस्य भावः। पूर्ववदेव 'तेन वित्त०' इत्यनेन चणप्। चौर्यं स्तेयं दुरोदरं द्यूतमादिनी मुख्ये यासां तासु कपटकलासु प्रौढत्वं नैपुण्यम्। 'दुरोदरः पुनर्द्यूते द्यूतकारे पणेऽपि च' इति हेमचन्द्रः। तत्तदाचार्येभ्यस्तेषु शास्त्रेषु पण्डितेभ्यो गुरुभ्यः सम्यक् समाधानतया लब्ध्वा प्राप्य यौवनेन तारुण्येन विलसन्तं शोभमानं कृत्येषु स्वकर्तव्येष्वनलसं निरलसं तं पूर्वोक्तं कुमाराणां राजवाहनादीनां निकरं समू-

---

१. 'चाढवम्' ब. 'चुञ्चुत्वम्' ब. २. 'चरणत्वम्' ब.

‘ अहं शत्रुजनदुर्लभः ’ इति परमानन्दममन्दमविन्दत ॥

इति श्रीदाण्डिनः कृतौ दशकुमारचरिते कुमारोत्पत्तिर्नाम प्रथम उच्छ्वासः ।

द्विजोपकृतिर्नाम द्वितीयोच्छ्वासः ।

15 अथैकदा वामदेवः सकलकलाकुशलेन कुसुमसायकसंशयितसौन्दर्येण कल्पितसोदर्येण साहसापहसितकुमारेण सुकुमारेण जयध्वजातपवारणकुलिशाङ्कित-करेण कुमारनिकरेण परिवेष्टितं राजानमानतशिरसं समभिगम्य तेन तां कृतां परि-

---

निरीक्ष्य दृष्ट्वा महीवल्लभो राजहंसः । अहं पूर्वं शत्रुभिर्निर्जितोऽपीति द्योत्यतेऽत्राहंपदेन । शत्रुजनदुर्लभः शत्रूणां जनेन समूहेन दुर्लभः जेतुमशक्य इति यावत् । परमं श्रेष्ठमानन्दं अमन्दमतिशयमविन्दतालभत ।

इति श्रीदशकुमारचरितपूर्वपीठिकाव्याख्यायां बालबोधिन्यां कुमारोत्पत्तिर्नाम प्रथम उच्छ्वासः ।

श्रीवेङ्कटेशो विजयते ।

श्रीवेङ्कटेशं देवेशं नत्वा सर्वार्थसिद्धिदम् ।
कुमारचरितव्याख्यां कुर्वेहं बालबोधिनीम् ॥

अथेति । अथ कुमाराणां यौवनोद्गमानन्तरमेकदा कस्मिंश्चित्समये । सकलासु सर्वासु चतुःषष्टिमितास्वित्यर्थः कलासु कुशलः प्रवीणस्तेन । कुसुमसायकेन मदनेन संशयितं संशययुतं सौन्दर्यं यस्य तेन । अयं मदनो न वेति जनमोहमापादयता सौन्दर्येण विराजमानस्तेनेत्यर्थः । कल्पितं रचितं कृतमिति यावत्सोदर्यं परस्परबन्धुता येन तेन । ‘सोदराद्यः’ इत्यनेन यः । बन्धुभावेन वर्तमानेनेत्यर्थः । साहसेन बलात्कारकृतकार्येणापहसितो धिक्कृतः कुमारः स्कन्दो येन तेन । स्कन्दादप्याधिकं साहसमाचरतेत्यर्थः । ‘साहसं तु बलात्कारकृतकार्ये’ इति मेदिनी । सुकुमारेण मनोहरेण । जयध्वजो जयपताका आतपवारणं छत्रं कुलिशं वज्रमायुधविशेषस्तैरङ्कितश्चिन्हितः करो हस्तो यस्य तेन कुमाराणां निकरेण समूहेन रेखामया जयध्वजादयः कुमाराणां हस्तेष्वासन्नित्यर्थः । हस्ते च जय-

---

१ ‘ कलशाङ्कित ’ व.

चर्यामङ्गीकृत्य निजचरणकमलयुगलमिलन्मधुकरायमाणकाकपक्षं विदलिष्यमाणविपक्षं कुमारचयं गाढमालिङ्ग्य मितसत्यवाक्येन विहिताशीरभ्यभाषत—' भूवल्लभ, भवदीयमनोरथफलमिव समृद्धलावण्यं तारुण्यं नुतमित्रो भवत्पुत्रोऽनुभवति । सहचरसमेतस्य नूनमेतस्य दिग्विजयारम्भसमय एषः । तदस्य सकलक्लेशसहस्य राजवाहनस्य दिग्विजयप्रयाणं क्रियताम् ' इति । कुमारा माराभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन यानेनाभ्युदयाशंसं राजानम-

ध्वजादिचिन्हं सुलक्षणम् । परिवेष्टितं परिवृतम् । आनतं नम्रं शिरो मस्तकं यस्य तं प्रणमन्तमित्यर्थः । राजानं राजहंसं समभिगम्य तत्समीपं गत्वा । तेन राजहंसेन कृतामनुष्ठितां तां मुनियोग्यां परिचर्यां पूजामङ्गीकृत्य स्वीकृत्य । निजचरणयुगे स्वपदद्वये मिलन्तः समागच्छन्तो मधुकरायमाणाः कृष्णवर्णत्वाद्भ्रमरा इवाचरन्तः काकपक्षा शिखण्डका यस्य तम् । पादद्वयस्य कमलसादृश्येन समागता भ्रमरा इव रेजुर्नतिवेलायां तदुपरिपतिताः शिखण्डका इति तात्पर्यम् । विदलिष्यमाणा हनिष्यमाणा विपक्षाः शत्रवो येन तं शत्रुध्वंसकमिति भावः । कुमारचयं राजवाहनादिकुमारसमूहं गाढं दृढमालिङ्ग्याश्लिष्य मितेन परिमितेन सत्येन यथार्थेन वाक्येन सुभिङ्चयेन विहिता कृता आशीराशीर्वचनं येन सः । आशीर्वचनस्य मितत्वेन दक्षिणार्थी भिक्षुक इव नायं वाचाट इति व्यज्यते । **भूवल्लभेति** । अनेनामन्त्रणेन तद्राज्यलाभोऽचिरादिति सूच्यते । भवदीयं त्वदीयं मनोरथानां मनीषितानां फलमिव समृद्धं परिपूर्णं लावण्यं सौन्दर्यं यस्मिंस्तत्तारुण्यं यौवनम् । नृपेप्सितानां संपादयितृ कुमारयौवनमतस्तस्य मनोरथफलोत्प्रेक्षा । नुतानि स्तुतानि मित्राणि येन यस्य वा । प्रथमपक्षे स्तुतिकर्तृत्वमेतन्निष्ठमन्यत्र च तदन्यनिष्ठमिति भेदः । भवत्पुत्रो राजवाहनः । सहचरैः सुहृद्भिः समेतस्य युक्तस्यैतस्य राजवाहनस्य दिशां विजयस्यारम्भः समयः काल एषः । नूनमिति निश्चये । तत् तस्माद् सकलानां सर्वेषां क्लेशानां त्रासानां सहस्य [१] बलसंपन्नोऽयं दिग्विजयाय प्रेषितोऽपि तत्क्लेशान् सहेतासंशयमतस्तत्प्रेषणे न विचारः कार्यः इति तात्पर्यम् । दिशां विजयाय प्रयाणं गमनं क्रियतां संपाद्यताम् । कुमारा राजवाहनादयः मार इव मदन इवाभिरामाः सुन्दराः । रामः परशुरामो दाशरथिर्वा आद्यःप्रधानो येषां तेषामिव पौरुषं पराक्रमो येषां ते । रामास्त्रपौरुषा इति पाठे रामस्येवास्त्रेऽस्त्रविद्यायां पौरुषं येषां ते । रुषा क्रोधेन भस्मीकृता दग्धा अरयः शत्रवो यैस्ते । भस्मीकृतेत्यत्र क्त आदिकर्मणि ज्ञातव्योऽद्यापि शत्रुनाशस्याविहितत्वेन भूतत्वाभावात् । रयेन वेगेनोपहसितो धिक्कृतः समीरणो वायुर्यैस्ते । रणं संग्राममभियाति लक्ष्यीकृत्य गच्छति तादृशेन यानेन वाहनेन । अभ्युदयस्योदयस्य शत्रुविजयपूर्वकं स्वराज्या-

१. ' गलन् ' ब.

कार्षुः। तत्साचिव्यमितरेषां विधाय समुचितां बुद्धिमुपदिश्य शुभे मुहूर्ते सपरिवारं कुमारं विजयाय विससर्ज।

16 राजवाहनो मङ्गलसूचकं शुभशकुनं विलोकयन्देशं कंचिदतिक्रम्य विन्ध्याटवीमध्यमविशत्। तत्र हेतिहतिकिणाङ्कं कालायसकर्कशकायं यज्ञोपवीतेनानुमेयविप्रभावं व्यक्तकिरातप्रभावं लोचनपरुषं कमपि पुरुषं ददर्श। तेन विहितपूजनो राजवाहनोऽभाषत—'ननु मानव, जनसङ्गरहिते मृगहिते घोरप्रचारे कान्तारे विन्ध्याटवीमध्ये भवानेकाकी किमिति निवसति। भवदंसोपनीतं यज्ञोपवीतं भूसु-

---

धिगमस्याशंसा विद्यते यस्य तं राजानमकार्षुः कृतवन्तः। करोतेर्लुङि प्रथमस्य बहुवचनम्। रणयोग्ये वाहने विराजितान् कुमारान् प्रेक्ष्यासंशयमेते शत्रूनुन्मूलयिष्यन्तीति नृपस्य मतिरासीदिति तात्पर्यार्थः। तस्य साचिव्यममात्यादीतरेषां राजवाहनभिन्नानां विधाय कृत्वा। राजवाहनभिन्नान्कुमारांस्तत्सचिवपदे नियुज्येत्यर्थः। समुचितां योग्यां बुद्धिं ज्ञानमुपदिश्य कथयित्वा। दिग्विजयकाले कथं वर्तितव्यं तदपि कथयित्वेत्यर्थः। शुभे शोभने मुहूर्ते काले। अनेन भावी विजयः सूचितः। परिवारेण सेनया सहितं कुमारं राजवाहनं विजयाय विजयं संपादयितुमित्यर्थः। तुमर्थाच्चेति चतुर्थी। विससर्ज प्रेषयामास।

राजवाहन इति। मङ्गलस्य शुभस्य भाविनो विजयस्येति यावत्सूचकं कथकं शुभशकुनं गमनकाले गवादीनामग्र आगमनं विलोकयन् पश्यन् कंचित्स्वल्पमिति यावद्देशमतिक्रम्य प्रदेशमुल्लङ्घ्य विन्ध्याटव्या विन्ध्यारण्यस्य मध्यं मध्यभागमविशत् प्रविष्टवान्। **तत्रेति**। हेतिभिः शस्त्रैर्हतयः प्रहारास्तासां किणा व्रणजान्यङ्कानि चिन्हानि यस्य तं कालायसमिव लोहविशेष इव कर्कशः कठोरः कायो देहो यस्य तम्। 'अनोऽश्मायःसरसां जातिसंज्ञयोः' इत्यनेन साधुः। यज्ञोपवीतेन द्विजधार्येण कार्पाससूत्रमयेनानुमेयस्तर्क्यमाणो विप्रभावो ब्राह्मणत्वं यस्य तं व्यक्तः सहजज्ञायमानः किरातप्रभावो भिल्लबलं यस्य तं लोचनयोर्नेत्रयोः परुषं कठोरं ईक्षणे त्रासजनकमिति यावत् कमप्यज्ञातनामधेयं पुरुषं जनं ददर्श दृष्टवान्। तेन पुरुषेण विहितं कृतं पूजनं यस्य सः। मानवेत्यज्ञातनामत्वात्संबोधनम्। जनानां सङ्गः सम्बन्धस्तेन रहिते वर्जिते। मृगेभ्यः पशुभ्यो हिते हितकरे। 'चतुर्थी तदर्थार्थहिते' त्यनेन समासः। घोरो भयानकः प्रचारो गमनं यस्मिंस्तस्मिन् कान्तारे विपिने विन्ध्याटव्यां विन्ध्याचलस्य मध्ये एकाकी असहायः। 'एकादाकिनिच्चासहाय' इत्यनेन साधुः। किमिति केन कारणेन। भवतस्तेंऽसे स्कन्धे उपनीतं गतं स्थितमिति यावत् यज्ञोपवीतं यज्ञसूत्रं भूसुरभावं विप्रत्वं द्योतयति

रभावं द्योतयति हेतिहतिभिः किरातरीतिरनुमीयते । कथय किमेतत्' इति । 'तेजोमयोऽयं मानुषमात्रपौरुषो नूनं न भवति' इति मत्वा स पुरुषस्तद्वयस्यमुखाशामजनने विज्ञाय तस्मै निजवृत्तान्तमकथयत्—'राजनन्दन, केचिदस्यामटव्यां वेदादिविद्याभ्यासमपहाय निजकुलाचारं दूरीकृत्य सत्यशौचादिधर्मव्रातं परिहृत्य किल्बिषमन्विष्यन्तः पुलिन्दपुरोगमास्तदन्नमुपभुञ्जाना बहवो ब्राह्मणब्रुवा निवसन्ति। तेषु कस्यचित्पुत्रो निन्दापात्रचारित्रो मातङ्गो नामाहं सह किरातबलेन जनपदं प्रविश्य ग्रामेषु धनिनः स्त्रीबालसहितानानीयाटव्यां बन्धने निधाय तेषां सकलधनमपहरन्नुद्धृत्य वीतदयो व्यचरम् । कदाचिदेकस्मिन्कान्तारे मदीयसहचरगणेन जिघां-

---

सूचयति । त्वदीयेनानेनोपवीतेन त्वं ब्राह्मणोऽसीति ज्ञायते । हेतिहतिभिः शस्त्रप्रहारैः किरातरीतिः पुलिन्दपद्धतिरनुमीयते तर्क्यते । एतद्वृत्तिद्वयं कथमेकनिष्ठं तदित्यर्थः कथयोपवर्णयेति राजवाहनप्रश्नः । तेजोमयः तेजःप्रचुरोऽयं पुरोवर्ती । 'तत्प्रकृतवचने मयट्' इत्यनेन मयट् । मानुषं मनुष्यसंबन्धि प्रमाणं यस्य तन्मानुषमात्रं 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इत्यनेन मात्रच् । तथाभूतं मानुष्यकनिष्ठमिति यावत्पौरुषं पराक्रमो यस्य स नूनमसंशयं न भवति । अस्य तेजसैवास्यालौकिकत्वं ज्ञायत इत्यर्थः । इति मत्वैवं ज्ञात्वा स पुरुषोऽरण्यस्थो जनः तस्य राजवाहनस्य वयस्यमुखात्सुहृद्वदनान्नामाभिधानं जननमुत्पत्तिं पित्रादिनाम च विज्ञायाधिगम्य तस्मै राजवाहनाय निजवृत्तान्तं स्ववृत्तान्तमकथयदवर्णयत् । राजनन्दन नृपपुत्र । अस्यामटव्यामस्मिन्नरण्ये वेदा आदयो यासां तासां विद्यानां चतुर्दशविद्यानामभ्यासमध्ययनमपहाय त्यक्त्वा निजकुलस्य स्वकुलस्याचारं दूरीकृत्योत्सार्य सत्यं सत्यभाषित्वं शौचं शुचित्वं चादिनी येषां तेषां धर्माणामहिंसादीनां व्रातं समूहं परिहृत्य वर्जयित्वा किल्बिषं पापमन्विष्यन्तो मार्गयन्तः पुलिन्दा भिल्लाः पुरोगमा अग्रयायिनो नेतार इति यावद्येषां ते तेषां पुलिन्दानामन्नमुपभुञ्जाना भक्षयन्तो बहवोऽनेके ब्राह्मणब्रुवा ब्राह्मणाधमाः । ब्रुवशब्दो निन्दाद्योतकः । तेष्विति । तेषु तत्र निवसत्सु ब्राह्मणब्रुवेषु । निन्दायै पात्रं योग्यं चारित्रं वर्तनक्रमो यस्य सः । किरातबलेन पुलिन्दसेनया सह जनपदं लोकनिवासस्थानं नगरादिकं प्रविश्य ग्रामेषु वर्तमानान् इति शेषः । स्त्रीभिर्बालैश्च सहितान् युक्तान् धनिनः संपन्नान् पुरुषान् अटव्यामरण्य आनीय लोभादिकमुत्पाद्य तीर्थयात्रादिमिषेण वाऽरण्यं तानानीयेत्यर्थः । बन्धने कारागृहे निधाय संस्थाप्य तेषां श्रीमतां सकलं सर्वं धनं द्रव्यमपहरन् बलाद्गृह्णन् । उध्दृत्य गृहीतं द्रव्यं दूरं स्वनिवासस्थानं नीत्वा । अथवोध्दृत्येत्यस्य तान् बंधनाद्विमुच्येत्यर्थः वीता नष्टा दया यस्य सः । व्यचरं कालमत्यवाहयम् । कदाचिदेति । एकस्मिन्कान्तारे क-

स्यमानं भूसुरमेकमवलोक्य दयायत्तचित्तोऽब्रवम्—'ननु पापाः, न हन्तव्यो ब्राह्मणः' इति । ते रोषारुणनयना मां बहुधा निरभर्त्सयन् । तेषां भाषणपारुष्यमसहिष्णुरहमवनिसुररक्षणाय चिरं प्रयुध्य तैरभिहतो गतजीवितोऽभवम् । ततः प्रेतपुरीमुपेत्य तत्र देहधारिभिः पुरुषैः परिवेष्टितं सभामध्ये रत्नखचितसिंहासनासीनं शमनं विलोक्य तस्मै दण्डप्रणाममकरवम् । सोऽपि मामवेक्ष्य चित्रगुप्तं नाम निजामात्यमाहूय तमवोचत्—'सचिव, नैषोऽमुष्य मृत्युसमयः । निन्दितचरितोऽप्ययं महीसुरनिमित्तं गतजीवितोऽभूत् । इतः प्रभृति विगलितकल्मषस्यास्य पुण्यकर्मकरणे रुचिरुदेष्यति । पापिष्ठैरनुभूयमानमत्र यातनाविशेषं विलोक्य पुनरपि

स्मिंश्चिदरण्ये ममेमे मदीया ये सहचरा सुहृदस्तेषां गणेन समुदायेन जिघांस्यमानं हन्तुमिष्यमाणं । हन्तेः सन्नन्तात्कर्मणि शानच् । भूसुरं ब्राह्मणम् । अवलोक्य दृष्ट्वा । दयया आयत्तं परतन्त्रीकृतं चित्तं मानसं यस्य सः अब्रवमवोचम् । नन्विति निश्चये पापाः ब्राह्मणवधरूपपातकमाचरन्तः न हन्तव्यो ब्राह्मणो ब्राह्मणवधजं पापं न कर्तव्यमित्यर्थः । ते मम सहचरा रोषेण व्यवसायप्रतिबंधजेन क्रोधेनारुणे रक्ते नयने नेत्रे येषां ते । बहुधाऽनेकप्रकारैः । 'बहुगणवतु०' इत्यनेन बहोः संख्यासंज्ञायां 'संख्याया विधार्थे धे' त्यनेन धा । निरभर्त्सयन् अतर्जयन् । कठोरैः शब्दैः समतक्ष्णुवन्नित्यर्थः । भर्त्सधातोराकुस्मीयत्वात् परस्मैपदप्रयोगश्चिन्त्यः । अथवा ततो हेतुमण्णौ हेतोरविवक्षया प्रयोगः । अत एव कौमुद्यां भट्टोजिदीक्षितः 'वाग्भिः संतक्षति भर्त्सयतीत्यर्थे' इत्याह । तेषां मत्सहचराणां भाषणस्य वचनस्य पारुष्यं कठोरतामसहिष्णुरसहमानः।'अलंकृञ्निराकृञ्०'त्यनेन सहतेरिष्णुच् । अवनिसुरस्य ब्राह्मणस्य रक्षणाय चिरं बहुकालं प्रयुध्य युद्धं कृत्वा तैर्मत्सहचरैरभिहतस्ताडितो गतं नष्टं जीवितं जीवो यस्य तथाभूतोऽभवं मृतोऽभवमित्यर्थः । ततो मृत्यनन्तरं प्रेतपुरीं यमनगरीमुपेत्य प्राप्य तत्र यमपुर्यां देहधारिभिः शरीरवद्भिः पुरुषैः सेवकैरिति यावत् परिवेष्टितं परिवृतं रत्नैर्हीरकादिभिः खचिते युक्ते सिंहासने आसीनं स्थितं शमनं यमं विलोक्य दृष्ट्वा । 'शमनो यमराड्यम' इत्यमरः । तस्मै यमाय दण्डप्रणामं दण्डवद्भूमौ पतित्वा नमस्कारमकरवं कृतवान् । सोपि यमोपि । अवेक्ष्य विलोक्य चित्रगुप्तं नाम तत्संज्ञकं निजामात्यं स्वसचिवमाहूयाकार्य । तं चित्रगुप्तमवोचदुक्तवान् । सचिवेति मन्त्रिण आमन्त्रणम् । एषोऽयतनः । अमुष्य पुरोवर्तिनो मनुजस्य । मृत्युसमयो जीवितावसानवेला । निन्दितं गर्ह्यं चरितं वर्तनक्रमो यस्य तथाभूतोप्ययं महीसुरनिमित्तं द्विजस्य कृते गतं नष्टं जीवितं प्राणा यस्य तथाभूतोऽभूत् जातः । इतः प्रभृत्यस्मात्कालादारभ्य विगलितं नष्टं कल्मषं पापं यस्य तस्यास्य ब्राह्मणस्य । पुण्यकर्मणः पवित्रकार्यस्य करण आचरणे रुचिः प्रीतिरुदेष्यत्युद्भविष्यति । अतिशयेन पापाः पापिष्ठास्तैः 'अतिशायिने तमबिष्ठनौ' इत्यनेन तमप् । अनुभूयमानमास्वाद्यमानं यात-

पूर्वशरीरमनेन गम्यताम्' इति। चित्रगुप्तोऽपि तत्रतत्र संतप्तेष्वायसस्तम्भेषु बध्यमानान्, अत्युष्णीकृते विततशरावे तैले निक्षिप्यमाणान्, लगुडैर्जर्जरीकृतावयवान्, निशितटङ्कैः परितक्ष्यमाणानपि दर्शयित्वा पुण्यबुद्धिमुपदिश्य माममुञ्चत्। तदेव पूर्वशरीरमहं प्राप्तो महाटवीमध्ये शीतलोपचारं रचयता महीसुरेण परीक्ष्यमाणः शिलायां शयितः क्षणमतिष्ठम्। तदनु विदितोदन्तो मदीयबन्धुगणः[१] सहसागत्य मन्दिरमानीय मामपक्रान्तव्रणमकरोत्। द्विजन्मा कृतज्ञो मह्यमक्षरशिक्षां विधाय विविधागमतन्त्रमाख्याय कल्मषक्षयकारणं सदाचारमुपदिश्य ज्ञानेक्षणगम्यमानस्य

नाविशेषं पीडाधिक्यादिकं विलोक्य दृष्ट्वा। पूर्वशरीरं भूतलवर्ति ब्राह्मणदेहः। गम्यतां प्रविश्यताम्। इतिशब्दो यमभाषणसमाप्तिद्योतकः। चित्रगुप्तोऽपि यमसचिवोऽपि। तत्र तत्र तेषु तेषु क्लेशदानस्थानेषु। अयसो लोहस्येमे आयसा लोहमयाःस्तम्भास्तेषु। 'तस्येदम्' इत्यनेनाण्। बध्यमानान् रुध्यमानान्। अत्युष्णीकृतेऽतितप्ते विततशरावे विस्तीर्णे पात्रे तैले स्नेहे निक्षिप्यमाणांस्त्यज्यमानान्। लगुडैः काष्ठैः जर्जरीकृताः छिन्नप्राया अतिपीडिता इति यावदवयवा गात्राणि येषां तान्। निशितस्तीक्ष्णैः टङ्कैः पाषाणभेदनैः परितक्ष्यमाणांस्तनूक्रियमाणान्। पुण्यबुद्धिं शोभनां धियं सन्मार्गेण गन्तव्यमित्याकारकमुपदेशमित्यर्थः। उपदिश्य कथयित्वा। अमुञ्चदधो व्यसर्जयत्। तदेव भूमौ पतितं पूर्वशरीरं मम पुरातनं देहं प्राप्तो गतः। महाटवीमध्ये महारण्यस्य मध्ये। शीतलोपचारं मूर्छानाशार्थं मुखे वारिप्रक्षेपादिकं हिमोपचारं रचयता कुर्वता महीसुरेण यदर्थं मत्सहचरैस्ताडितोऽहं तेन ब्राह्मणेन परीक्ष्यमाणोऽवलोक्यमानः शिलायां पाषाणे शयितः स्थितः क्षणं स्वल्पकालम्। अत्यन्तसंयोगे द्वितीया। तदनु ततोऽनन्तरं विदितो ज्ञात उदन्तो येन सः। मदीयो मम बन्धुगण आप्तवर्गः सहसाऽतर्कितमागत्य मत्संनिधिमेत्य मन्दिरं गृहमानीय नीत्वा। अपक्रान्ता नष्टा औषधलेपनादिना चिकित्सिता व्रणाः क्षतानि यस्य तम्। द्विजन्मा स मया रक्षितो ब्राह्मणः कृतं मया विहितमुपकारं जानाति तथाभूतः। अक्षराणां मातृकाणां शिक्षां विधाय कृत्वा दत्त्वेति यावत्। विविधानामनेकप्रकाराणामागमानां शास्त्राणां तन्त्रं सिद्धान्तमाख्याय कथयित्वा। 'तन्त्रं कुटुम्बकृत्ये स्यात्सिद्धान्ते चौषधोत्तमे' इति मेदिनी। तन्त्रमित्यस्य 'तन्त्रं प्रधान' इत्यमरानुसारेण प्रधानमित्यर्थकथनं न चारु। कल्मषस्य पापस्य क्षयो नाशस्तस्य कारणं हेतुमुपदिश्य कथयित्वा। ज्ञानेक्षणेन ज्ञानचक्षुषा गम्यमानस्य ज्ञायमानस्य। अब्भक्षो वायुभक्ष इतिवत्सावधारणार्थमेतत्। तेन चर्मचक्षुषा कदाप्यदृश्यमानस्येत्यर्थः। शशिखण्डश्चन्द्रकला

---

१ 'मदीयवंशबन्धुगणः' न.

शशिखण्डशेखरस्य पूजाविधानमभिधाय पूजां मत्कृतामङ्गीकृत्य निरगात् । तदारभ्याहं किरातकृतसंसर्गं बन्धुकुलवर्गमुत्सृज्य सकललोकैकगुरुमिन्दुकलावतंसं चेतसि स्मरन्नस्मिन्कानने दूरीकृतकलङ्को वसामि । देव, भवते विज्ञापनीयं रहस्यं किंचिदस्ति । आगम्यताम्' इति । स वयस्यगणादपनीय रहसि पुनरेनमभाषत—'राजन् अतीते निशान्ते गौरीपतिः स्वप्नसंनिहितो निद्रामुद्रितलोचनं विबोध्य प्रसन्नवदनकान्तिः प्रश्रयानतं मामवोचत्—'मातङ्ग, दण्डकारण्यान्तरालगामिन्यास्तटिन्यास्तीरभूमौ सिद्धसाध्याराध्यमानस्य स्फटिकलिङ्गस्य पश्चादद्रिपतिकन्यापदपङ्क्तिचिह्नितस्याश्मनः सविधे विधेराननमिव किमपि बिलं विद्यते । तत्प्रविश्य तत्र

शेखरः शिरोभूषणं यस्य तस्य शंकरस्येत्यर्थः पूजाया विधानं विधिमभिधायोक्त्वा मया कृतां पूजां सपर्यामङ्गीकृत्य स्वीकृत्य निरगान्निरगच्छत् । इण् धातोर्लुङ् । तदारभ्य द्विजगमनदारभ्य किरातैः पुलिन्दैः कृतः संबन्धो येन तं बन्धुकुलानां बान्धवगृहाणां वर्गं समूहमुत्सृज्य त्यक्त्वा सकलानाम् लोकानां भुवनानामेकं मुख्यं गुरुम् । 'एकं संख्यान्तरे श्रेष्ठ' इति मेदिनी । इन्दुकला चन्द्रकलाऽवतंसः शिरोभूषणं यस्य तं शिवं चेतस्यन्तरात्मनि स्मरन् ध्यायन् । काननेऽरण्ये दूरीकृतो नाशितः कलङ्कः पापं येन तथाभूतो वसामि निवसामि । एवं निजवृत्तान्तं निवेद्य कथनीयं कथयितुं राजकुमारं पुनरप्यामन्त्रयते । **देवेति** । विज्ञापनीयं कथनीयं किंचित्स्वल्पं रहस्यं गुह्यं स मातङ्गो वयस्यगणान्मित्रसंघादपनीय दूरं नीत्वा रहस्येकान्ते । एवं पूर्वोक्तं राजकुमारम् । पुनर्भूयोऽभाषतोक्तवान् । **राजन्निति** । अतीतेऽतिक्रान्ते निशान्ते निशाया रात्रेरन्तेऽवसाने उषसीत्यर्थः । तेन स्वप्नस्यावश्यंभावित्वं द्योतितम् । गौरीपतिः शङ्करः स्वप्ने संनिहितः समीपमागतः प्रकटीभूत इति यावत् निद्रया मुद्रिते मुकुलिते लोचने नेत्रे यस्य तं विबोध्योत्थाप्य प्रसन्ना वदनस्य मुखस्य कान्तिः शोभा यस्य सः । अनेनेशागमनं कल्याणायेति सूच्यते । प्रश्रयेण विनयेनानतं नम्रं मामवोचदुक्तवान् । **मातङ्गेति** । दण्डकारण्यस्यान्तरालं मध्यभागस्तत्र गच्छति तस्याः । 'सुप्यजाता' विइनेन णिनिः तटिन्या नद्यास्तीरभूमौ तटभुवि । सिद्धा देवयोनिविशेषाः विश्वावसुप्रभृतयः साध्या द्वादशसंख्याका गणविशेषाश्च तैराराध्यमानस्य पूज्यमानस्य स्फटिकलिङ्गस्य शुभ्रमणिविशेषनिर्मितशिवलिङ्गस्य । 'स्फटिकं सितरत्नं स्यात्' इति कमलाकरः । पश्चात्पृष्ठभागे । अद्रिपतेर्हिमाचलस्य कन्या पार्वती तस्याः पदपङ्क्तिः चरणन्यासपरंपरा तया चिह्नितस्य युक्तस्याश्मन प्रस्तरस्य सविधे समीपे विधेर्भागधेयस्य मुखमिवोदयमिव ब्रह्मणो वदनमिव वा किमप्यनिर्वचनीयं बिलं गुहा । 'बिलं छिद्रे गुहायां च' इति विश्वः । बिलस्य विधिमुखोप्रेक्षणेन तत्र भाग्योदयो भविष्यतीति सूचितम् । तत्प्रविश्य तदन्तर्गत्वा । निक्षिप्तं

निक्षिप्तं ताम्रशासनं शासनं विधातुरिव समादाय विधिं तदुपदिष्टं दिष्टविजयमिव विधाय पाताललोकाधीश्वरेण भवता भवितव्यम्। भवत्साहाय्यकरो राजकुमारोऽद्य श्वो वा समागमिष्यति ' इति तदादेशानुगुणमेव भवदागमनमभूत्। साधनाभिलाषिणो मम तोषिणो रचय साहाय्यम् ' इति। ' तथा ' इति राजवाहनः साकं मातङ्गेन नमितोत्तमाङ्गेन विहायार्धरात्रे निद्रापरतन्त्रं मित्रगणं वनान्तरमवाप। तदनु तदनुचराः कल्ये साकल्येन राजकुमारमनवलोकयन्तो विषण्णहृदयास्तेषु तेषु

निवेशितं ताम्रशासनं ताम्रपट्टिकायां लिखितो आदेशविशेषस्तम्। विधातुर्ब्रह्मणः शासनं तत्संपादकं लेखमिव समादाय गृहीत्वा तेन शासनेनोपदिष्टं कथितं विधिं विधानं दिष्टविजयमिव भाग्यविजयमिव विधायानुष्ठाय । पाताललोकस्य रसातलस्याधीश्वरोऽधिपस्तेन। भवतस्ते साहाय्यकरः साहाय्यसंपादको राजकुमारो नृपपुत्रोऽद्यास्मिन्नहनि श्वः परस्मिन्नहनि वा समागमिष्यत्यत्र प्राप्स्यति। तस्य शिवास्यादेश आज्ञा तस्यानुगुणमनुरूपमेव भवतस्ते आगमनमत्र प्राप्तिरभूज्जाता । साधनमभीप्सितस्योपायमभिलषतीच्छति तस्य। सुप्यजातौविल्यनेन ताच्छील्ये णिनिः तेन च सिद्ध्युपायभूतस्य कुमारागमनस्य प्रतीक्षणमद्य यावन्मे स्वभाव इति द्योतितम्। तोष आनन्दो विद्यते यस्य तस्य। ' अत इनिठनौ ' इत्यनेन मत्वर्थीय इनिः। साहाय्यं ' सहायाद्वा ' त्यनेन वुञो वैकल्पिकत्वाद्भावे ष्यञ्। तथेत्यङ्गीकारे। ' तथाऽभ्युपगमे ' इति मेदिनी । साकं मातङ्गेन मातङ्गेन सह । ' सहयुक्तेऽप्रधाने ' इत्यनेन तृतीया। ' सहेनाप्रधाने ' इत्यनेनैव सिद्धौ युक्तग्रहणादर्थग्रहणं तेन साकं सार्धमित्यादियोगेऽपि तृतीया। नमितं नम्रीकृतमुत्तमाङ्गं शीर्षं येन तेन। अर्धरात्रे रात्रेरर्धमर्धरात्रं तस्मिन्। सर्वोप्येकदेशः कालेन षष्ठ्यन्तेन समस्यते ' संख्याविसाये० ' ति ज्ञापकस्य सामान्यापेक्षत्वात्। ' रात्राह्नाहा० ' इत्यनेन पुंस्त्वम्। ' अहःसर्वैकदेश० ' त्यनेन रात्रेरच्। निद्रया परतन्त्रं पराधीनं मित्रगणं सुहृद्वर्गं विहाय त्यक्त्वा। वनान्तरमन्यद्वनम्। मयूरव्यंसकादित्वात्समासः। तदनु कुमारगमनानन्तरं तदनुचरा कुमारसहायास्तत्सचिवाः। ' सहायश्चानुचर ' इत्यमरः। कल्ये प्रभाते ' कल्यं प्रभाते क्लीबं स्याद् ' इति मेदिनी। साकल्येन सर्वत्रापीत्यर्थः। राजकुमारं राजवाहनमनवलोकयन्तोऽनवेक्षमाणा विषण्णं कुमाराऽनुपलब्ध्या खिन्नं हृदयं मानसं येषां ते तेषु तेषु वनेषु तत्र तत्र सर्वत्रापि वनभागेष्वित्यर्थः। सम्यक् समीचीनतयाऽन्विष्य मार्गयित्वा। अनवेक्षमाणा अपश्यन्तः। एतदन्वेषणं राजपुत्रस्य गवेषणं तस्य मनीषयेच्छया देशान्तरं भिन्नं देशं चरिष्णवश्च-

वनेषु सम्यगन्विष्यान्वेक्षमाणा एतदन्वेषणमनीषया देशान्तरं चरिष्णवोऽतिसहिष्णवो निश्चितपुनःसंगमसंकेतस्थानाः परस्परं वियुज्य ययुः ।

17 लोकैकवीरेण कुमारेण रक्ष्यमाणः संतुष्टान्तरङ्गो मातङ्गोऽपि बिलं शशिशेखरकथिताभिज्ञानपरिज्ञातं निःशङ्कं प्रविश्य गृहीतताम्रशासनो रसातलं पथा तेनैवोपेत्य तत्र कस्यचित्पत्तनस्य निकटे केलीकाननकासारस्य विततसारसस्य समीपे नानाविधेनेशशासनविधानोपपादितेन हविषा होमं विरच्य विघ्नपरिहारिणि सविस्मयं विलोकयति राजवाहने समिदाज्यसमुज्ज्वलिते ज्वलने पुण्यगेहं देहं मन्त्रपूर्वकमाहुतीकृत्य तडित्समानकान्तिं दिव्यां तनुमलभत । तदनु मणिमयमण्डनमण्डलमण्डिता सकललोकललनाकुलललामभूता कन्यका काचन विनीतानेकसखी-

---

रितुमनसः । ' अलंकृञ्० ' इत्यनेनेष्णुच् । अतिसहिष्णवोऽत्यन्तं सहनाः । ' सहिष्णुः सहनः ' इत्यमरः । निश्चितं निर्णीतं पुनःसंगमः पुनर्मेलनं तस्य संकेतस्थानं यैस्ते । परस्परं वियुज्य अन्योऽन्यतः पृथक् भूत्वा ययुः निर्जग्मुः । या प्रापणे लिट् ।

लोकैकेति । एकश्चासौ वीरश्चैकवीरः प्रधानयोधो लोकेष्वेकवीरस्तेन । 'पूर्वकालैक०' इत्यनेन समासः । कुमारेण राजवाहनेन रक्ष्यमाणः पाल्यमानः सन्तुष्टं प्रमुदितमन्तरङ्गमन्तःकरणं यस्य सः । शशिशेखरेण शिवेन कथितमुक्तमभिज्ञानं चिन्हं तेन परिज्ञातमधिगतं बिलं गर्तं निःशङ्कं संशयवर्जितं यथा तथा । गृहीतमात्मसात्कृतं ताम्रशासनं ताम्रपट्टिका येन सः । रसातलं पातालं तेनव पथा बिलमार्गेणैवोपेत्य गत्वा तत्र पाताले । पत्तनस्य नगरस्य निकटे समीपे । केलीकाननं क्रीडायै कृतमुपवनं तस्य कासारः सरस्तस्य । वितता बहवः सारसाः पक्षिविशेषा यस्मिंस्तस्य । विगतेति पाठे नष्टसारसस्येत्यर्थः । परं स पाठो न चारुः । न हि कवेरत्र सरसि सारसाभावप्रतिपादने किमपि कारणं पश्यामः । नानाविधेनानेकप्रकारेणेशशासनं शिवाज्ञा तस्य विधानं तयाज्ञया प्रतिपादिता कृतिस्तेनोपपादितं निष्पादितं तेन हविषा यज्ञीयद्रव्येण । जात्यामेकत्वम् । होमं यज्ञं विरच्य कृत्वा । प्रत्यूहं विघ्नं परिहरति दूरीकरोति तस्मिन् राजवाहने सविस्मयं साश्चर्यं विलोकयति सति पश्यति सति । समिधो यज्ञीयकाष्ठानि आज्यं घृतं च तैः समुज्ज्वलित उद्दीपिते ज्वलने वन्हौ । पुण्यगेहं पावित्र्यस्य गृहं देहं शरीरं मन्त्रपूर्वकं मन्त्रोच्चारणपूर्वकमाहूतीकृत्य देवतोद्देशेन क्षिप्त्वा । तडिता सौदामिन्या समाना तुल्या कान्तिः शोभा यस्यास्तां दिव्यां दिवि स्वर्गे भवां दिगादित्वाद्भवार्थे यत् । तनुं शरीरमलभत प्राप्तवान् । तदनु दिव्यदेहप्राप्त्यनन्तरं । मणिमयानां मणिनिर्मितानां मण्डनानामलंकाराणां मण्ड-

---

१ ' सम्यगन्विष्यान्वेक्षमाणा ' न. २ ' विगत ' व–ब.

जनानुगम्यमाना कलहंसगत्या शनैरागत्यावनिसुरोत्तमाय मणिमेकमुज्ज्वलाकारमुपायनीकृत्य तेन 'का त्वम्' इति पृष्टा सोत्कण्ठा कलकण्ठस्वनेन मन्दंमन्दमुदञ्जलिरभाषत—'भूसुरोत्तम, अहमसुरोत्तमनन्दिनी कालिन्दी नाम। मम पितास्य लोकस्य शासिता महानुभावो निजपराक्रमासहिष्णुना विष्णुना दूरीकृतामरे समरे यमनगरातिथिरकारि। तद्वियोगशोकसागरमग्नां मामवेक्ष्य कोऽपि कारुणिकः सिद्धतापसोऽभाषत—'बाले, कश्चिद्दिव्यदेहधारी मानवो नवो वल्लभस्तव भूत्वा सकलं रसातलं

लेन समूहेन मण्डिता भूषिता सकलानां सर्वेषां लोकानां ललनाकुलं युवतिसमूहस्तस्य ललामभूता भूषणभूता रूपेण सर्वमपि रमणीवर्गमतिशयानेत्यर्थः। कन्यकाऽजातविवाहा। विनीता नम्रा अनेकाः सख्यः सहचर्यस्तासां जनेन समूहेनानुगम्यमानाऽनुस्रियमाणा कलहंसस्य हंसस्य गत्या गमनेन मन्थरमिति यावत्। तेन शनैर्गमनं व्यज्यते। अवनिसुरा भूदेवास्तेषूत्तमः श्रेष्ठस्तस्मै। एकमेकसंख्याकमद्वितीयं वा। उज्ज्वलो दीप्त आकारो यस्य तं मणिं रत्नमुपायनीकृत्योपहारमिति निवेद्य। सोत्कण्ठोत्कण्ठया युक्ता। कलकण्ठ इव स्वनः कोकिलसदृशस्वरस्तेन मन्दं मन्दं लज्जापरतन्त्रत्वाच्छब्दोच्चारणे विलम्बः। उदञ्जलिः बद्धकरसम्पुटा। भूसुरोत्तम द्विजश्रेष्ठ। असुरोत्तमस्य राक्षसश्रेष्ठस्य नन्दिनी सुता। तव भूसुरोत्तमत्वेन मम चासुरोत्तमपुत्रीत्वादुभयोः सम्बन्धार्हतेति ध्वनिः। अस्य लोकस्य पातालस्य शासिता पालकः। महाननुभावः प्रभावो यस्यः सः। निजपराक्रमः स्ववीर्यं तेनासहिष्णुः कस्याप्यन्यस्य पराक्रममसहमानः। अथवा निजपरः स्वभिन्नस्तस्याक्रमोऽयोग्याचरितमसहमानेनेत्यर्थः। विष्णुना नारायणेन। दूरीकृताः पराजिता अमरा देवा यत्र तादृशे समरे युद्धे। एतेन युद्धविशेषणेन विष्णोर्युद्धे आगमनस्य कारणत्वं व्यज्यते स्वपितुश्च सामर्थ्यं प्रकटितं भवति। पराजितदेवत्राणार्थमेव भगवान् विष्णुरागत इति भावः। यमनगरस्यातिथिः प्राघूर्णिकोऽकारि कृतो मृत इत्यर्थः। वस्तुतो राक्षसस्य युद्धे विष्णुहस्तान्मरणेन न यमनगरगामित्वं युक्तं रणे मृतः स्वर्गमेव गच्छतीति सिद्धान्तादतो यमनगरातिथिरिति पदं शब्दालंकारं साधयितुं मृत इत्यर्थे प्रयुक्तमिति ज्ञेयम्। तद्वियोगः पितुर्वियोगस्तज्जः शोक एव सागरः समुद्रस्तत्र मग्नाम्। निमज्जन उदकावश्यंभाव्यतानियमाच्छोकस्य महत्वं द्योतयितुं वा सागररूपकम्। कारुणिको दयाशीलः। 'शीलम्' इत्यनेन तदस्येत्यर्थे ठक्। सिद्धतापसः सिद्धविशेषस्तपश्चर्यायुक्तश्च। दिव्यदेहं स्वर्गीयं शरीरं धारयति तथा भूतः। अनेन दिव्यत्ववर्णनेनानुरूपत्वं तस्य व्यज्यते। मानवो मनुष्यः। नवो दिव्यदेहधारी वल्लभो रमणः। रसातलं पातालं पालयिष्यति रक्षिष्यति। तस्य सिद्धस्यादेशमाज्ञां निशम्य श्रुत्वा। घनशब्दो मेघगर्जितं तत्रोन्मुखी ऊर्ध्वमवलोकयन्ती उत्कण्ठिता च। चातक-

पालयिष्यति ' इति । तदादेशं निशम्य घनशब्दोन्मुखी चातकी वर्षागमनमिव तवालोकनकाङ्क्षिणी चिरमतिष्ठम् । मन्मनोरथफलायमानं भवदागमनमवगम्य मद्राज्यावलम्बभूतामात्यानुमत्या मदनकृतसारथ्येन मनसा भवन्तमागच्छम् । लोकस्यास्य राज्यलक्ष्मीमङ्गीकृत्य मां तत्सपत्नीं करोतु भवान् ' इति । मातङ्गोऽपि राजवाहनानुमत्या तां तरुणीं परिणीय दिव्याङ्गनालाभेन हृष्टतरो रसातलराज्यमुररीकृत्य परमानन्दमाससाद ।

18 वञ्चयित्वा वयस्यगणं समागतो राजवाहनस्तदवलोकनकौतूहलेन भुवं गमिष्णुः कालिन्दीदत्तं क्षुत्पिपासादिक्लेशनाशनं मणिं साहाय्यकरणसंतुष्टान्मातङ्गाल्लब्ध्वा कंचनाध्वानमनुवर्तमानं तं विसृज्य बिलपथेन तेन निर्ययौ । तत्र च मित्रगणमनवलोक्य भुवं बभ्राम । भ्रमंश्च विशालोपशल्ये कमप्याक्रीडमासाद्य तत्र वि-

---

पक्षिणो हि मेघोदरान्निर्गतमेवोदकं प्राश्नन्त्यत उन्मुखत्वं चातक्यास्तदागमप्रतीक्षयेति ज्ञेयम् । आलोकनं दर्शनमाकाङ्क्षति प्रतीक्षते सा । चिरं बहुकालम् । मम मनोरथो मनीषितं तस्य फलवदाचरत् मन्मनोरथफलायमानम् । 'उपमानादाचारे' इत्यनेन क्यङि शानच् । भवतस्ते आगमनमत्र प्राप्तिः । अवगम्य ज्ञात्वा । मम राज्यस्यावलम्बभूता आश्रयभूता अमात्याः सचिवास्तेषामनुमत्याऽनुमोदनेन । मदनेन कृतं सारथ्यं मार्गोपदेश इति यावत् यस्य तेन मनसा । अनेन मदनपरतन्त्रतया मनसो मे धाष्टर्यं न त्वङ्गनाजनविरुद्धगुणदर्शकमिति ज्ञातव्यम् । भवन्तमागच्छं त्वत्समीपमागतास्मि । अस्य लोकस्य पातालस्य राज्यलक्ष्मीमङ्गीकृत्य स्वीकृत्य तत्सपत्नीं तस्या राज्यलक्ष्म्याः सपत्नीं करोतु विदधातु । राजवाहनस्यानुमत्याऽनुमोदनेन तां तरुणीं राक्षसकन्यां कालिन्दीं परिणीयोपयम्य । दिव्याङ्गना अमानुषप्रमदा तस्या लाभेन हृष्टतरोऽतिशयं प्रीतः रसातलस्य पातालस्य राज्यमुररीकृत्य स्वीकृत्य परमानन्दमानन्दस्य परां काष्ठामाससाद प्राप ।

वञ्चयित्वेति । वयस्यगणं सुहृद्वर्गं वञ्चयित्वा अतिसंधाय । तेषां वयस्यानामवलोकनमीक्षणं तस्य कौतुकेन भुवं पृथ्वीं गमिष्णुर्गन्तुमिच्छुः । 'भुवश्च' इति सूत्रस्थस्यचकारस्यानुक्तसमुच्चयार्थत्वेन गमधातोरिष्णुच् । कालिन्द्या पातालेश्वरदुहित्रा दत्तं स्वभर्त्रे उपायनीकृतं क्षुत् बुभुक्षा पिपासा तृषा च आदी येषां तेषां क्लेशानां नाशनं दूरीकरणे समर्थं मणिं रत्नं सहायकरणेन संतुष्टात् मातङ्गाल्लब्ध्वा प्राप्य । कंचनाध्वानं स्वल्पं मार्गमनुवर्तमानमनुसरन्तं तं मातङ्गं विसृज्य निवर्त्य तेन पूर्वोक्तेन बिलस्य पन्था बिलपथस्तेन । 'ऋक्पूरब्धूःपथाम्०' इत्यनेन समासान्तोऽच् । निर्ययौ बहिराजगाम । तत्र च यत्र सुहृद्वर्गं परित्यज्य गतस्तस्मिन् प्रदेशे । भुवं बभ्राम सुहृद-

शिश्रमिषुरान्दोलिकारूढं रमणीसहितमाप्तजनपरिवृतमुद्याने समागतमेकं पुरुषमपश्यत्। सोऽपि परमानन्देन पल्लवितचेता विकसितवदनारविन्दः 'मम स्वामी सोमकुलावतंसो विशुद्धयशोनिधी राजवाहन एषः महाभाग्यतयाकाण्ड एवास्य पादमूलं गतवानस्मि। संप्रति महानयनोत्सवो जातः' इति ससंभ्रममान्दोलिकाया अवतीर्य सरभसपदविन्यासविलासिहर्षोत्कर्षचरितस्त्रिचतुरपदान्युद्गतस्य चरणकमलयुगलं गलदुल्लसन्मल्लिकावलयेन मौलिना पस्पर्श। प्रमोदाश्रुपूर्णो राजा पुलकिताङ्गं तं गाढमालिङ्ग्य 'अये सौम्य सोमदत्त' इति व्याजहार। ततः कस्यापि पुंनागभूरुहस्य च्छायाशीतले तले संविष्टेन मनुजनाथेन सप्रणयमभाणि—

न्वेषणाय भुवनोपर्याटत्। विशालाया उज्जयिन्या उपशल्येऽन्तभागे। 'विशालोऽज्जयिनी सम' इति त्रिकाण्डशेषः 'ग्रामान्तमुपशल्यं स्यात्' इत्यमरः। आक्रीडमुद्यानमासाद्य गत्वा। 'पुमानाक्रीड उद्यानम्' इत्यमरः तत्रोद्याने विशिश्रमिषुर्विश्रमितुमिच्छुः। विपूर्वकाच्छ्राम्यतेः सन्नन्तात् 'सनाशंसभिक्ष उः' इत्यनेन उः। आन्दोलिकां दोलामधिरूढमधिष्ठितं रमण्या मनोहारिण्या युवत्या सहितं युक्तमाप्तजनेन बन्धुवर्गेण परिवृतं वेष्टितम् उद्याने तस्मिन्नेवोपवने प्राप्तन्। सोपि दोलाधिरूढः पुरुषः। परमः अधिक आनन्दस्तोषस्तेन पल्लवितं संजातपल्लवं चेतो मानसं यस्य सः। यथा वृक्षः पल्लवोद्गमेन शोभते तद्वद्राजकुमारदर्शनोद्भूतानन्देन शोभमान इति तात्पर्यम्। विकसितं प्रफुल्लं वदनारविन्दं मुखमेव कमलं यस्य सः। विकसनस्य पुष्पनिष्ठत्वाद्वदनमेवारविन्दमिति रूपकम्। सोमकुलस्य चन्द्रवंशस्यावतंसो भूषणम्। विशुद्धानां निर्मलानां यशसां निधिः। अथवा विशुद्धो निर्मलो यशसां निधिर्यस्य सः। एषः पुरो वर्तमानः। महाभाग्यतया दैवानुकूल्येनाकाण्ड एवानवसर एव सहसैवेति तात्पर्यम्। पादमूलं चरणसंनिधिं गतवानस्मि प्राप्तोस्मि। इति उक्त्वेति शेषः। ससंभ्रमं सत्वरमान्दोलिकाया दोलाया अवतीर्याध आगत्य। रभसेन वेगेन सहितः सरभसो यः पदविन्यासश्चरणविन्यासस्तत्र विलासी दृश्यमानः यो हर्षोत्कर्ष आनन्दाधिक्यं तेन चरितः प्रचलितः। त्रीणि चत्वारि वा त्रिचतुराणि। 'संख्ययाव्ययासन्न०' इत्यनेन समासः 'त्र्युपाभ्यां चतुरोजिष्यत' इत्यनेनाच् समासान्तः। उद्गतस्य सुहृत्स्वागतार्थमागतस्य राजवाहनस्येति शेषः। चरणकमलयुगलं पादपद्मद्वयं गलत् त्वरया पतदुल्लसन्तीनां विकसितानां मल्लिकानां पुष्पविशेषाणां बलयं यस्मात्तेन मौलिना शिरसा पस्पर्श स्पृष्टवान्। प्रमोदाश्रुभिरानन्दबाष्पैः पूर्णो व्याप्तो राजा। सुहृद्दर्शनान्नृपतोषः। पुलकिताङ्गं रोमाञ्चितशरीरं तं पुरुषं गाढमालिङ्ग्य दृढं परिष्वज्य। सौम्येति ब्राह्मणामन्त्रणे। सोमदत्तो हि राजसचिवस्य सितवर्मणः पौत्रः सत्यवर्मणः काल्यां जातः पुत्रो राजवाहनमित्रम्। तत इति। कस्यापि

' सखे, कालमेतावन्तं देशे कस्मिन्, प्रकारेण केनास्थायि भवता, संप्रति कुत्र गम्यते, तरुणी केयम्, एष परिजनः संपादितः कथम्, कथय ' इति । सोऽपि मित्रसंदर्शनव्यतिकरापगतचिंताज्वरातिशयो मुकुलितकरकमलः सविनयमात्मीयप्रचारप्रकारमवोचत्—

इति श्रीदण्डिनः कृतौ दशकुमारचरिते द्विजोपकृतिर्नाम द्वितीय उच्छ्वासः ।

सोमदत्तचरितं नाम तृतीयोच्छ्वासः ।

19 ' देव, भवच्चरणकमलसेवाभिलाषीभूतोऽहं भ्रमन्नेकस्यां वनावनौ पिपासाकुलो लतापरिवृतं शीतलं नदसलिलं पिबन्नुज्ज्वलाकारं रत्नं तत्रैकमद्राक्षम् । तदादाय गत्वा कंचनाध्वानमम्बरमणेरत्युष्णतया गन्तुमक्षमो वनेऽस्मिन्नेव किमपि

समीपवर्तिन इत्यर्थः । पुंनागभूरुहस्य नागकेशरवृक्षस्य छायया शीतले तले संविष्टेनोपविष्टेन मनुजनाथेन नरनाथेन सप्रणयं सप्रेमाभाण्युक्तम् । प्रकारेण केन कया रीत्या । संप्रत्यधुना कुत्र कस्मिन्प्रदेशे गम्यते । तरुणी केयं ललनाया अस्यास्तव च कः सम्बन्धः । कथं केन प्रकारेणैष पुरो दृश्यमानः परिजनो भृत्यसमूहःसंपादितः । सोपि सोमदत्तोपि । मित्रस्य राजवाहनस्य संदर्शनव्यतिकर ईक्षणव्यापारस्तेनापगतो नष्टश्चिन्ता एव ज्वरस्तस्यातिशय आधिक्यं यस्य सः । मुकुलितकरकमलः बद्धाञ्जलिः सविनयं नम्रतया । आत्मीयप्रचारस्य स्वभूभ्रमणस्य प्रकारमवोचदकथयत् ।

॥ इति श्रीदशकुमारचरितपूर्वपीठिकाव्याख्यायां बालबोधिन्यां द्वितीय उच्छ्वासः ॥

श्रीवेङ्कटेशो विजयते ।

अथ सोमदत्तो राजवाहनं वृत्तान्तश्रवणायाभिमुखीकर्तुमामन्त्रयते । देवेति । भवतश्चरणकमलस्य पादपद्मस्य सेवाया अभिलाष आकाङ्क्षा । अनभिलाषः अभिलाषः संपद्यमानः अभिलाषीभूतः । एतेन अभिलाषस्य उत्कटत्वं द्योत्यते । अथ वा भवच्च... भिलाषी भूत इति पदद्वयम् । अभिलाषो विद्यते यस्य सोऽभिलाषी तथा भूतः संजातः । भ्रमन्नाहिण्डमानो वनावनौ अरण्यभुवि । पातुमिच्छा पिपासा । पिबतेः सन्नन्ताद् ' अः प्रत्ययादि ' त्यनेनाकारः । तयाकुलः पीडितः लताभिः परिवृतं वेष्टितम् । अनेन विशेषणेन प्रवासपीडितानां विश्रमणयोग्यत्वं तस्य प्रदेशस्य व्यज्यते । शीतलं हिमं नदस्य सलिलमुदकं पिबन् प्राश्नन् । उज्ज्वलो दीप्त आकारो यस्य तद्रत्नं मणिं तत्र

देवतायतनं प्रविष्टो दीनाननं बहुतनयसमेतं स्थविरमहीसुरमेकमवलोक्य कुशलमुदितदयोऽहमपृच्छम् । कार्पण्यविवर्णवदनो महदाशापूर्णमानसोऽवोचदग्रजन्मा— 'महाभाग, सुतानेतान्मातृहीनाननेकैरुपायै रक्षन्निदानीमस्मिन्कुदेशे भैक्षं संपाद्य ददद्देतेभ्यो वसामि शिवालयेऽस्मिन्' इति । 'भूदेव, एतत्कटकाधिपती राजा कस्य देशस्य, किंनामधेयः, किमत्रागमनकारणमस्य' इति पृष्टोऽभाषत महीसुरः— 'सौम्य, मत्तकालो नाम लाटेश्वरो देशस्यास्य पालयितुर्वीरकेतोस्तनयां वामलोचनां नाम तरुणीरत्नमसमानलावण्यं श्रावं श्रावमवधूतदुहितृप्रार्थनस्य तस्य पाटलीं

नदसमीपेऽद्राक्षं दृष्टवान् । दृशेर्लुङ् । तद्रत्नमादाय गृहीत्वा कंचनाध्वानं स्वल्पं मार्गं गत्वाऽतिक्रम्याम्बरमणेः सूर्यस्यात्युष्णतयातिप्रखरतया गन्तुं गमनेऽक्षमोऽसमर्थः । अस्मिन्नेव वनेऽरण्ये । देवतायतनं देवगृहं । दीनं खेदयुक्तमाननं मुखं यस्य तं बहुभिरनेकैस्तनयैः पुत्रैः समेतं युक्तं स्थविरमहीसुरं वृद्धब्राह्मणमवलोक्य दृष्ट्वा । उदितोत्पन्ना दया करुणा यस्य तथाभूतोऽहं कुशलमपृच्छं मङ्गलं पृष्टवान् । तथा च मनुः 'ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम् । वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च'। कार्पण्येन दीनतया विवर्णं वर्णरहितं कान्तिहीनमिति यावत् वदनं यस्य सः । महती चासावाशा च तया पूर्णं परिपूर्णं व्याप्तमिति यावन्मानसं मनो यस्य सः । महदाशेत्यसाधुः । 'आन्महतः समानाधिकरणे०' त्यात्वेन भाव्यम् । अथवा महं तेजो ददाति सा महदा चासावाशेति विग्रहः । अस्मिन् पक्षे महपूर्वाद्ददातेः 'आतोऽनुपसर्गे कः' इत्यनेन कः । अग्रजन्मा ब्राह्मणः । महाभाग दैवशालिन् । एतान् तवाग्रे स्थितान् मातृहीनान् जनन्या त्यक्तान् मृतमातृकानिति यावत् । सुतान् पुत्रान् अनेकैर्बहुप्रकारैरुपायैः साधनैः रक्षन् पालयन् । इदानीमधुना । कुदेशे कुत्सितश्चासौ देशस्तस्मिन् । 'कुगतिप्रादयः' इत्यनेन समासः । भैक्षं भिक्षाणां समूहः । भिक्षादिभ्योऽण् । अस्मिन् शिवालये अस्मन्निवासभूते शिवस्यायतने । एतस्य पुरोदृश्यमानस्य कटकस्य सैन्यस्याधिपतिः स्वामी कस्य देशस्य किंनामधेयस्य प्रदेशस्य राजा । किं नामधेयं यस्य सः । अत्रास्मिन्प्रदेशे । आगमनस्य कारणं हेतुः । इत्येवं पृष्टो मयेति शेषः । महीसुरो ब्राह्मणोऽभाषतावदत् । सौम्येति । कोमलामन्त्रणम् । लाटानां तत्संज्ञकानां देशानामीश्वरः स्वामी । 'लाटो देशान्तरेंऽशुके' इति मेदिनी । पालयितुः रक्षितुः तरुणीरत्नं स्वसौंदर्येण तरुणीवर्गस्य शोभादायकामित्यर्थः । 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते' इति । न समानं सदृशं लावण्यं यस्य तदनन्यसाधारणसौन्दर्यमित्यर्थः । श्रावं श्रावं वारंवारं श्रुत्वा । 'आभीक्ष्ण्ये णमुल्' इत्यनेन णमुल् 'नित्यवीप्सयोः' रनेन द्विरुक्तं च । अवधूता तिरस्कृता दुहितृप्रार्थना कन्यावि-

---

१ 'भैक्ष्यं' न-क. २ 'पाटलीं नाम्ना' इत्यतन्नास्ति न–क-पुस्तकयोः.

नाम्ना नगरीमरौत्सीत्। वीरकेतुरपि भीतो महदुपायनमिव तनयां मत्तकालायप्रदात्। तरुणीलाभहृष्टचेता लाटपतिः 'परिणेया निजपुर एव' इति निश्चित्य गच्छन्निजदेशं प्रति संप्रति मृगयादरेणात्र वने सैन्यवासमकारयत्। कन्यासारणे[1] नियुक्तो मानपालो नाम वीरकेतुमन्त्री मानधनश्चतुरङ्गबलसमन्वितोऽन्यत्ररचितशिबिरस्तं निजनाथावमानखिन्नमानसोऽन्तर्बिभेद[2]' इति। 'विप्रोऽसौ बहुतनयो विद्वान्निर्धनः स्थविरश्च दानयोग्यः' इति तस्मै करुणापूर्णमना रत्नमदाम्। परमाह्लादविकसिताननोऽभिहितानेकाशीः कुत्रचिदग्रजन्मा जगाम। अध्वश्रमखिन्नेन

षयिणी याञ्चा येन तस्य। तस्य वीरकेतोः नगरीं राजधानीमरौत्सीत् आवृणोत्। रुधिधातोर्लुङ्। भीतः आत्मार्थे जायमानात्प्रजानाशाद्भीत इत्यर्थः। अथवा स्वप्राणनाशाद्भीत इत्यर्थः। महदुपायनमिति भिन्नं पदद्वयम्। महान्तमुपहारमिव तनयां कन्यकाम्। मत्तकालाय लाटेश्वरायादादर्पयामास। तरुण्या युवत्या लाभेन प्राप्त्या हृष्टं सन्तुष्टं चेतो मानसं यस्य सः निजपुरे स्वराजधान्यामेव परिणेया विवाह्या। परिपूर्वकान्नयतेः 'अचो यत्' इत्यनेन यत्। इति निश्चित्यैवं निर्णीय। निजदेशं प्रति लाटान् प्रति। संप्रत्यधुना मृगयादरेण मृगयाया आसक्त्या अभिलाषेणेत्यर्थः। अत्र वनेऽस्मिन्नरण्ये सैन्यस्य वासं निवासस्थानं शिबिरमिति यावदकारयदकल्पयत्। कन्याया वामलोचनायाः सारणे प्रापणे। वामलोचनां लाटपुरं प्रापयितुमित्यर्थः। नियुक्तोऽधिकृतः। वीरकेतोर्मन्त्री सचिवः। मान एव धनं यस्य सः। चत्वार्यङ्गानि हस्त्यश्वरथपदातिरूपाणि यस्य तादृशेन बलेन सैन्येन समन्वितो युक्तोऽन्यत्रान्यस्मिन् प्रदेशे रचितं कल्पितं शिबिरं सैन्यनिवेशो येन सः। 'हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्' 'निवेशः शिबिरम्' इति चामरः। निजनाथस्य स्वस्वामिनोऽवमानः कन्यापहरणपराजयरूपोऽपमानस्तेन खिन्नं दुःखि मानसं मनो यस्य सः। तं मत्तकालमन्तर्बिभेदान्तर्द्वैधं चकार। स्वस्वामिनार्पितं कन्योपहारमसहमानो मन्त्री मानपालो मत्तकालनाशार्थं भेदप्रयोगं प्रयुयोजेत्यर्थः। विप्रो ब्राह्मणो बहवस्तनयाः पुत्रा यस्येत्यनेन सपरिवारोऽयमिति दानकारणत्वं प्रदर्शितमेवमग्रेऽपि। विद्वान् पण्डितः। पाण्डित्यं चास्य पृष्टप्रश्नोत्तरदानादेवानुमितमन्यथा कथमवलोकनमात्रतस्तस्य विद्वत्त्वं ज्ञायेत। निर्धनो धनरहितः स्थविरो वृद्धोऽतएव दानयोग्य इति भावः। इतिशब्दो हेत्वर्थकः। तस्मै विप्राय। करुणया दयया पूर्णं व्याप्तं मनो यस्य सः रत्नं नदतीरे लब्धं मणिमदाम्। ददातेर्लुङ्। परमाल्हादेनात्यानन्देन विकसितं प्रफुल्लमाननं वदनं यस्य स ब्राह्मणः अभिहिता उक्ता अनेका आशिष आशीर्वचनानि येन सः। कुत्रचिदज्ञाते प्रदेशे। अध्वनो मार्गस्य श्रमेण खिन्नः पीडितस्तेन मया तत्र शिवायतने निद्रायाः स्वापस्य सुखं निरवे-

१ 'कन्यासारेण' व-क न. २ 'तन्निजनाथावमान०' व-ब.

मया तत्र निरवेशि निद्रासुखम्। तदनु पश्चान्निगडितबाहुयुगलः स भूसुरः कशाघातचिह्नितगात्रोऽनेकनैस्त्रिंशिकानुयातोऽभ्येत्य माम् 'असौ दस्युः' इत्यदर्शयत्। परित्यक्तभूसुरा राजभटा रत्नावाप्तिप्रकारं मदुक्तमनाकर्ण्य भयरहितं मां गाढं नियम्य रज्जुभिरानीय कारागारम् 'एते तव सखायः' इति निगडितान्कांश्चिन्निर्दिष्टवन्तो मामपि निगडितचरणयुगलमकार्षुः। किंकर्तव्यतामूढेन निराशक्लेशानुभवेनावोचि मया—'ननु पुरुषा वीर्यपरुषाः, निमित्तेन केन निर्विशथ कारावासदुःखं दुस्तरम्। यूयं वयस्या इति निर्दिष्टमेतैः, किमिदम्' इति। तथाविधं मामवेक्ष्य भूसुरान्मया श्रुतं लाटपतिवृत्तान्तं व्याख्याय चोरवीराः पुनरवोचन्—'महाभाग, वीरकेतुमन्त्रिणो मानपालस्य किंकरा वयम्। तदाज्ञया लाटेश्वरमार-

---

श्यन्वभावि निर्विशतेः कर्मणि लुङ्। तदनु मयि सुप्त इत्यर्थः। पश्चात्पृष्ठभागे निगडितं शृङ्खलादिना बद्धं बाहुयुगलं करद्वयं यस्य सः। स यस्मै रत्नं दत्तं सः भूसुरो ब्राह्मणः कशा चर्ममयी तुरगादिताडनरज्जुस्तस्या आघातैश्चिह्नितं संजातव्रणं गात्रं शरीरं यस्य सः। अनेकैः निस्त्रिंशः खड्गः प्रहरणं येषां तैरनुयातोऽनुसृतः। 'प्रहरणम्' इत्यनेन तदस्येत्यर्थे निस्त्रिंशाट्ठक्। अभ्येत्य समीपमेत्य असौ दस्युरयं चोर इति मामदर्शयन्निर्दिष्टवान्। परित्यक्तो मुक्तो भूसुरो ब्राह्मणो यैस्ते राजभटा नृपयोधा मयोक्तं कथितं रत्नस्यावाप्तिः प्राप्तिस्तस्याः प्रकारमनाकर्ण्याश्रुत्वा भयरहितं निर्भयं मां गाढं दृढं रज्जुभिर्बन्धनदोरकैः। नियम्य बद्ध्वा कारागारं बन्धनागारमानीय नीत्वा। एतेऽत्र स्थापिताः सखायः सुहृदः। निगडितान् शृङ्खलया बद्धान् निर्दिष्टवन्तो दर्शयन्तो निगडितं बद्धं चरणयुगलं पदद्वयं यस्य तथाभूतमकार्षुः कृतवन्तः। करोतेर्लुङ्। किंकर्तव्यतायां किमाचरितव्यमित्यस्मिन् विषये मूढोऽज्ञानी तेन। निर्गता आशा मोचनविषयिणी यस्मात्तादृशः क्लेशानुभवः पीडानुभवो यस्य तेन मयाऽवाचि उक्तम्। अवोचीत्यसाधुरिति पूर्वमेवोक्तम्। वीर्येण पराक्रमेण परुषाः कठोराः पुरुषाः केन निमित्तेन कस्मात्कारणात्। दुस्तरं दुस्त्यजं कारा बन्धनागारं तत्र वासो निवासस्तस्य दुःखं पीडां निर्विशथानुभवथ। वयस्या इति सुहृद इत्येतै राजपुरुषैर्निर्दिष्टमुक्तमिदं किम् कथं भवतो मित्रत्वं मयीति प्रश्नावकाशः। तथाविधं कारागृहे क्षिप्तमवेक्ष्य दृष्ट्वा। भूसुराद्ब्राह्मणात् श्रुतमाकर्णितं लाटपतेर्वृत्तान्तं व्याख्याय कथयित्वा। चोराश्च ते वीराः। वीरकेतोरत्रत्यनृपस्य मन्त्रिणः सचिवस्य किंकराः सेवकाः। तदाज्ञया मन्त्रिण आदेशेन। लाटेश्वरस्य मारणाय नाशाय सुरङ्गाद्वारेण भूविवरमार्गेण तदगारं लाटेश्वरगृहं तत्र तस्मिन्गृहे राजाभावेन राज्ञोऽस्थित्या विषण्णाः

---

१ 'अवोचि' व॰क॰न.

णाय रात्रौ सुरङ्गाद्वारेण तदगारं प्रविश्य तत्र राजाभावेन विषण्णा बहुधनमपहृत्य महाटवीं प्राविशाम। अपरेद्युश्च पदान्वेषिणो राजानुचरा बहवोऽभ्येत्य धृतधनचयानस्मान्परितः परिवृत्य दृढतरं बद्ध्वा निकटमानीय समस्तवस्तुशोधनवेलायामेकस्यानर्घ्यरत्नस्याभावेनास्मद्वधाय माणिक्यादानायास्मान्किलाशृङ्खलयन्' इति। श्रुतरत्नरत्नावलोकनस्थानोऽहम् 'इदं तदेव माणिक्यम्' इति निश्चित्य भूदेवदाननिमित्तां दुरवस्थामात्मनो जन्म नामधेयं युष्मदन्वेषणपर्यटनप्रकारं चाभाष्य समयोचितैः संलापैर्मैत्रीमकार्षम्। ततोऽर्धरात्रे तेषां मम च शृङ्खलाबन्धनं निर्भिद्य तैरनुगम्यमानो निद्रितस्य द्वाःस्थगणस्यायुधजालमादाय पुररक्षान्पुरतोऽभिमुखागतान्पटुपराक्रमलीलयाभिद्राव्य मानपालशिबिरं प्राविशम्। मानपालो निजकिंक-

---

खिन्ना बहुधनं प्रभूतं द्रव्यमपहृत्य चोरयित्वा महाटवीं घोरमरण्यम्। अपरेद्युरुत्तरेऽह्नि पदान्वेषिणः पदचिह्नानि मार्गयन्तो राजानुचरा नृपसेवकाः बहवो बहुसंख्याका अभ्येत्य समीममेत्य। धृतो समीपे स्थापितो धनचयो द्रव्यसंग्रहो यैस्तान्। अस्मान्परितः। 'अभितःपरितः०' इत्यनेन द्वितीया। परिवृत्य संवेष्ट्य। निकटं समीपं राज्ञोऽधिकारिणो वा। समस्तानां वस्तूनां पदार्थानां शोधनं गवेषणं तस्य वेलायाम्। अनर्घ्यममूल्यं यद्रत्नं मणिस्तस्याभावेनानुपलब्ध्या। अस्माकं वधाय नाशाय माणिक्यस्यादानाय ग्रहणाय। अत्रैकश्चशब्दोऽपेक्षितः परं स नास्ति। अशृङ्खलयन् शृङ्खलाभिरबध्नन्। 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' त्यनेन णिचि लङ्। इष्ठवद्भावादन्त्याकारलोपश्च। तदानीमेव हननमविधाय कारानिक्षेपणस्य हेतुरस्माभिर्मणेः प्रत्यर्पणं कार्यमिति। श्रुतमाकर्णितं रत्नं रत्नावलोकनस्य रत्ननिरीक्षणस्य स्थानं च नदतीररूपं येन सः। रत्नवृत्तान्तं यत्र तल्लब्धं तत्स्थाने तत्कथमागतं तच्च येन ज्ञातमित्यभिप्रायः। तदेव यद्ब्राह्मणायार्पितं तद्। भूदेवाय ब्राह्मणाय दानं समर्पणं निमित्तं कारणं यस्यास्तां दुरवस्थां कारागृहवासरूपां दुःखदात्रीं स्थितिम्। आत्मनः स्वस्य जन्मोत्पत्तिः नामधेयमभिधानं। युष्मदन्वेषणं राजवाहनमार्गणं तत्र पर्यटनमाहिण्डनं तस्य प्रकारं चाभाष्य कथयित्वा। समयः कारागृहे स्थितिकालस्तस्योचिता योग्यास्तैः संलापैः मिथ उक्तिप्रयुक्तिरूपैर्भाषणैः 'संलापो भाषणं मिथ' इत्यमरः। मैत्रीं सौहार्दमकार्षं कृतवान्। ततो मैत्र्युत्पादानन्तरमर्धरात्रे निशीथे तेषां पूर्वं तत्र स्थापितानाम्। शृङ्खलानां बन्धनं बन्धं निर्भिद्योन्मोच्य। तैरनुगम्यमानोऽनुस्रियमाणः। निद्रितस्य सुप्तस्य द्वाःस्थगणस्य द्वाररक्षकसेवकवर्गस्यायुधानां शस्त्राणां जालं समूहमादाय। अभिमुखं संमुखमागतान् प्राप्तान्। पुरतोऽग्रे। अस्य सिद्धिप्रकारः प्रथमोच्छ्वास एव निरूपितः। पटोः समीचीनस्य पराक्रमस्य लीला क्रीडा तयाऽभिद्राव्य पलाय्य मानपालस्य शिबिरं सेनानिवा-

रेभ्यो मम कुलाभिमानवृत्तान्तं तत्कालीनं विक्रमं च निशम्य मामार्चयत्। परेद्युर्मत्तकालेन प्रेषिताः केचन पुरुषा मानपालमुपेत्य 'मन्त्रिन्, मदीयराजमन्दिरे सुरङ्गया बहुधनमपहृत्य चोरवीरा भवदीयं कटकं प्राविशन्। तानर्पय। नो चेन्महाननर्थः संभविष्यति' इति क्रूरतरं वाक्यमब्रुवन्। तदाकर्ण्य रोषारुणितनेत्रो मन्त्री 'लाटपतिः कः, तेन मैत्री का, पुनरस्य वराकस्य सेवया किं लभ्यम्' इति तान्निरभर्त्सयत्। ते च मानपालेनोक्तं विप्रलापं मत्तकालाय तथैवाकथयन्। कुपितोऽपि लाटपतिर्दोर्वीर्यगर्वेणाल्पसैनिकसमेतो योद्धुमभ्यगात्। पूर्वमेव कृतरणनिश्चयो मानी मानपालः संनद्धयोधो युद्धकामो भूत्वा निःशङ्कं निरगात्। अहमपि सबहुमानं मन्त्रिदत्तानि बहुलतुरंगमोपेतं चतुरसारथिं रथं च दृढतरं कवचं मदनु-

---

सस्थानम्। निजकिंकरेभ्यो मया सहैव कारात आगतेभ्यः स्वभृत्येभ्यः। कुलस्याभिमानस्य च वृत्तान्तं वार्ताम्। तत्कालीनं निर्गमकाले कृतं विक्रमं पराक्रमं निशम्य श्रुत्वा। आर्चयदपूजयन्मत्सत्कारमकरोदित्यर्थः। परेद्युः परेऽहनि मत्तकालेन लाटेश्वरेण। मदीये मत्संबधिनि राजमन्दिरे राजगृहे सुरङ्गया भूविवरमार्गेण बहुधनं प्रभूतं द्रव्यमपहृत्य चोरयित्वा। भवदीयं त्वदीयं 'भवतष्ठक्छसौ' वित्यनेन छस्। कटकं सैन्यम्। तान् तत्रागतांश्चोरानर्पय प्रत्यर्पय नो चेत्तथा न करोषि चेत्। महाननर्थोऽतीव संकटं संभविष्यत्युत्पत्स्यते। तेषामसमर्पणे तव शासनं विधास्यामीति ध्वनिः। क्रूरतरं कठोरतरं वाक्यं संदेशम्। तन्मत्तकालसेवकवचनमाकर्ण्य श्रुत्वा रोषेण कोपेनारुणिते ताम्रे नेत्रे नयने यस्य सः। मन्त्री मानपालः। लाटपतिः कः किमर्थं स मामाज्ञापयति ममादेशकरणे को वा तस्याधिकारः। तेन दुष्टेन मैत्री सौहार्दं का कीदृक्। वराकस्य नीचस्य सेवया शुश्रूषया किं लभ्यं प्राप्यं न किमपीत्यर्थः। तान् लाटाधिपसेवकान् निरभर्त्सयदतर्जयत। भर्त्सधातोराकुस्मीयत्वेन परस्मैपदं कथमिति तु प्रथमोच्छ्वासे निरूपितम्। ते च मत्तकालभृत्या मानपालेनोक्तं कथितं विप्रलापं विरुद्धं भाषितं तथैव यथोक्तं तथैवाकथयन् न्यवेदयन्। 'विप्रलापो विरोधोक्ति' रित्यमरः। कुपितो क्रुद्धो लाटपतिर्मत्तकालः अपि। दोर्वीर्यं बाहुबलं तस्य गर्वेण। 'भुजबाहू प्रवेष्टो दोः' इत्यमरः। अल्पैः सैनिकैर्योधैः समेतो युक्तो योद्धुं संग्रामायाभ्यगादभ्यगच्छत्। पूर्वमेव प्रागेव कृतो रणनिश्चयो येन स मानी मानयुक्तः संनद्धाः सज्जा योधा वीरा यस्य सः। युद्धे संग्रामे काम इच्छा यस्य तथा भूत्वा निःशंकं शंकारहितं यथा तथा निरगाच्छिबिराद्बहिरागच्छत्। सबहुमानं सम्मानपुरःसरं मन्त्रिणा मानपालेन दत्तान्यर्पितानि। अस्यायुधानीत्यत्रान्वयः। बहुला अनेके तुरङ्गमा अश्वास्तैरुपेतं युक्तं चतुरः कुशलः सारथिर्यन्ता यस्य तं रथम्। दृढतरमतिकं-

रूपं चापं च विविधबाणपूर्णं तूणीरद्वयं रणसमुचितान्यायुधानि गृहीत्वा युद्धसंनद्धो मदीयबलविश्वासेन रिपूद्धरणोद्युक्तं मन्त्रिणमन्वगाम्। परस्परमत्सरेण तुमुलसंगरकरमुभयसैन्यमतिक्रम्य समुल्लसद्भुजाटोपेन बाणवर्षं तदङ्गे विमुञ्चन्नरातिं[1] प्राहरम्। ततोऽतिरयतुरंगमं मद्रथं तन्निकटं नीत्वा शीघ्रलङ्घनोपेततदीयरथोऽहमरातेः शिरःकर्तनमकार्षम्। तस्मिन्पतिते तदवशिष्टसैनिकेषु[2] पलायितेषु नानाविधहयगजादिवस्तुजातमादाय परमानन्दसंनतो मन्त्री ममानेकविधां संभावनामकार्षीत्। मानपालप्रेषितात्तदनुचरादेनमखिलमुदन्तजातमाकर्ण्य संतुष्टमना राजाभ्युद्गतो मदीयपराक्रमे विस्मयमानः समहोत्सवममात्यबान्धवानुमत्या शुभदिने निजतनयां मह्य-

---

ठिनं कवचं वर्म ' चिलखत ' इति प्रसिद्धम्। ममानुरूपं योग्यं मत्सामर्थ्यानुगुणमित्यर्थः। चद्वयेन समुच्चयो द्योत्यते। चापं धनुः। विविधैरनेकप्रकारैर्बाणैःशरैः पूर्णं व्याप्तं तूणीरद्वयमिषुधियुगलमिति रणस्य युद्धस्य समुचितानि योग्यान्यायुधानि शस्त्राणि गृहीत्वा। युद्धाय संनद्धः सज्जः। मदीयस्य बलस्य सामर्थ्यस्य विश्वासेन प्रत्ययेन रिपोः शत्रोर्लाटेश्वरस्योद्धरणं विनाशस्तत्रोद्युक्तमुद्यतं मन्त्रिणं मानपालमन्वगामन्वसरम्। परस्परस्यान्योऽन्यस्य मत्सरेण द्वेषेण तुमुलः संकुलः संगरो युद्धं तस्य करं विधायकं नात्र संगरं करोतीति विग्रहोऽणापत्तेः। उभयसैन्यमस्मत्सैन्यं तदीयसैन्यं चातिक्रम्योल्लङ्घ्य। समुल्लसन् शोभमानो भुजयोः बाह्वोराटोपो गर्वस्तेन बाणवर्षं शरवृष्टिं तदङ्गे शत्रुशरीरे विमुञ्चन् विसृजन्। अरातिं शत्रुं मत्तकालमित्यर्थः। प्राहरमताडयम्। ततः शत्रुताडनानन्तरम्। अत्यन्तं रयो वेगो येषां तथा भूतास्तुरंगमा अश्वा यस्य तं मद्रथं मम स्यन्दनं तन्निकटं मत्तकालसमीपं नीत्वाऽऽनीय शीघ्रं त्वरितं लङ्घनमाक्रमणं तेनोपेतः प्राप्तस्तदीयरथस्तस्य स्यन्दनो येन तथाभूतोऽहमरातेर्मत्तकालस्य शिरःकर्तनं मस्तकच्छेदमकार्षं कृतवान्। तस्मिन् मत्तकाले पतिते भूमौ शयिते सति। तस्यावशिष्टा उर्वरितास्तेषु सैनिकेषु योधेषु प्राणनाशभीत्या धावमानेषु। नानाविधा अनेकप्रकारा हया अश्वा गजाःकरिण आदयो येषां तेषां वस्तूनां जातं समूहमादायात्मसात्कृत्वा। परमेणातिशयेनानन्देन संनतो युक्तः। मन्त्री मानपालः। अनेकविधामनेकप्रकारां संभावनां सत्कारम्। मानपालेन प्रेषितात्प्रहितात्तदनुचरान्मानपालसेवकादखिलं संपूर्णमुदन्तं वृत्तान्तमाकर्ण्य श्रुत्वा संतुष्टं प्रमुदितं मनो यस्य सः। राजा वीरकेतुः अभ्युद्गतो मत्संमानाय प्रत्युद्गतः मदीयेन पराक्रमेण विस्मयमान आश्चर्ययुक्तः महोत्सवेन सहितं यथा तथेति क्रियाविशेषणं तेन महान्तमुत्सवं विधायेति तदर्थः। अमात्यानां सचिवानां बान्धवानामस्मानां चानुमत्याऽनुमोदनेन शुभे मङ्गले दिने दिवसे। निजतनयां स्वकन्याम्।

---

१ ' अरातीन् ' व-ब-क-न. २ ' तद्वावशिष्ट '.

सदात् । ततो यौवराज्याभिषिक्तोऽहमनुदिनमाराधितमहीपालचित्तो वामलोचनयानया सह नानाविधं सौख्यमनुभवन्भवद्विरहवेदनाशल्यसुलभवैकल्यहृदयः सिद्धादेशेन सुहृज्जनावलोकनफलं प्रदेशं महाकालनिवासिनः परमेश्वरस्याराधनाय पत्नीसमेतः समागतोऽस्मि । । भक्तवत्सलस्य गौरीपतेः कारुण्येन त्वत्पदारविन्ददर्शनानन्दसंदोहो मया लब्धः ' इति ।

20 तन्निशम्याभिनन्दितपराक्रमो राजवाहनस्तन्निरपराधदण्डे दैवमुपालभ्य तस्मै क्रमेणात्मचरितं कथयामास । तस्मिन्नवसरे पुरतः पुष्पोद्भवं विलोक्य ससंभ्रमं निजनिटिलतटस्पृष्टचरणाङ्गुलिमुदञ्जलिममुं गाढमालिङ्ग्यानन्दबाष्पसंकुलफुल्ललोचनः ' सौम्य सोमदत्त, अयं स पुष्पोद्भव ' इति तस्मै तं दर्शयामास । तौ च चिरविरहदुःखं विसृज्यान्योन्यालिङ्गनसुखमन्वभूताम् । ततस्तस्यैव महीरुहस्य च्छायायामु-

---

ततो विवाहानन्तरं यौवराज्ये युवराजपदेऽभिषिक्तः स्थापितः। अनुदिनं प्रत्यहम् । आराधितं तोषितं महीपालस्य वीरकेतोश्चित्तं येन सः । वामलोचनया शोभननयनयाऽनया पुरोवर्तिन्या सह । अत्र तन्नामाग्रहणेन ' आत्मनाम गुरोर्नाम नामातिकृपणस्य च । श्रेयस्कामो न गृण्हीयाज्ज्येष्ठापत्यकलत्रयोः ' इति स्मृतिः संमानिता भवति । नानाविधमनेकप्रकारं । भवतस्ते विरहो वियोगस्तस्य वेदनैव शल्यं तेन सुलभं सहजं वैकल्यं विकलता यस्य तथाभूतं हृदयं मनो यस्य । सिद्धस्य भूतभविष्यद्वर्तमानज्ञस्यादेशेनाज्ञया सुहृदस्ते दर्शनमवलोकनमेव फलं यस्य तथाभूतं प्रदेशमिदमुपवनमिति यावत् । महाकाले तत्संज्ञक प्रदेशे निवसति तस्य परमेश्वरस्य शंकरस्याराधनाय पूजनाय पत्न्या भार्यया समेतो युक्तः समागतोऽस्मि प्राप्तोऽस्मि । भक्तेषु वत्सलो दयावान् तस्य गौरीपतेरीशस्य कारुण्येन दयया । तव पादारविन्दं चरणकमलं तस्य दर्शनमवलोकनं तेन य आनन्दः तस्य संदोहोऽतिशयो लब्धः प्राप्तः ।

तदिति । तत्सोमदत्तभाषणं निशम्य श्रुत्वाऽभिनन्दितः पराक्रमः येन सः । तस्य निरपराधोऽपराधराहित्यं तस्य दण्डे कारावासादिरूपे दैवं भागधेयमुपालभ्य निन्दित्वा । तस्मै सोमदत्ताय । क्रमेण द्विजकार्यार्थं गमनादारभ्यात्रागमनपर्यन्तमात्मचरितं स्ववृत्तान्तम् । तस्मिन्नवसरे काले पुरतोऽग्रतः । पुष्पोद्भवं रत्नोद्भवतनयमात्मसुहृदं विलोक्य दृष्ट्वा । ससंभ्रमं सत्वरं निजनिटिलतटः स्वभालस्य प्रान्तस्तेन स्पृष्टाश्चरणाङ्गुलयः पादाग्राणि येन तममुं स्वचरणे पतितमित्यर्थः । पुष्पोद्भवं गाढं दृढमालिङ्ग्याश्लिष्य । आनन्दबाष्पैः प्रमोदजाश्रुभिः संकुले व्याप्ते संफुल्ले विकसिते च लोचने नयने यस्य सः । तस्मै सोमदत्ताय तं पुष्पोद्भवम् । तौ सोमदत्तपुष्पोद्भवौ । चिरं बहुकालं विरहो वियोगस्तस्य दुःखं विसृज्य त्यक्त्वा । अन्योऽन्यस्य परस्परस्यालिङ्गनं तस्य सुखम् । तस्यैव

प्रविश्य राजा सादरहासमभाषत—'वयस्य, भूसुरकार्यं करिष्णुरहं मित्रगणो विदितार्थः सर्वथान्तरायं करिष्यतीति निद्रितान्भवतः परित्यज्य निरगाम्। तदनु प्रबुद्धो वयस्यवर्गः किमिति निश्चित्य मदन्वेषणाय कुत्र गतवान्। भवानेकाकी कुत्र गतः' इति। सोऽपि ललाटतटचुम्बदञ्जलिपुटः सविनयमलपत्—

इति श्रीदण्डिनः कृतौ दशकुमारचरिते सोमदत्तचरितं नाम तृतीय उच्छ्वासः।

पुष्पोद्भवचरितं नाम चतुर्थोच्छ्वासः।

21 'देव, महीसुरोपकारायैव देवो गतवानिति निश्चित्यापि देवेन गन्तव्यं देशं निर्णेतुमशक्नुवानो मित्रगणः परस्परं वियुज्य दिक्षु देवमन्वेष्टुमगच्छत्। अहमपि देवस्यान्वेषणाय महीमटन्कदाचिदम्बरमध्यगतस्याम्बरमणेः किरणमसहिष्णु-

---

पुंनागसंज्ञकस्य महीरुहस्य वृक्षस्य। आदरो हासश्च ताभ्यां सह यथा तथाऽभाषतावदत्। वयस्येति पुष्पोद्भवामन्त्रणं सोमदत्ताय वृत्तान्तस्य पूर्वमेव कथितत्वात्। भूसुरकार्यं ब्राह्मणसहायं। विदितार्थो ज्ञातार्थो मित्रगणः सुहृद्वर्गः सर्वथा सर्वप्रकारेणान्तरायं विघ्नं करिष्यत्याचरिष्यतीति हेतोः। निद्रितान् सुप्तान् भवतः सर्वान् परित्यज्य वने एव विसृज्य निरगां निरगच्छम्। तदनु मद्गमनान्तरं प्रबुद्धो जागरितो वयस्यवर्गः सुहृत्समूहः। किमिति निश्चित्य किं वा मनसि कृत्वा ममान्वेषणाय मार्गणाय कुत्र कस्मिन्प्रदेशे। एकाक्यसहायः। गतः। गत्यर्थत्वात्कर्तरि क्तः। सोपि पुष्पोद्भवोपि। ललाटं चुम्बन् स्पृशन् अञ्जलिपुटः करसंपुटो यस्य सः। सविनयं नम्रतयाऽलपदभाषत।

इति श्रीदशकुमारचरितपूर्वपीठिकाव्याख्यायां बालबोधिन्यां तृतीय उच्छ्वासः।

श्रीवेङ्कटेशो विजयते।

देवेति राजवाहनामन्त्रणम्। महीसुरो ब्राह्मणस्तस्योपकाराय तस्मिन्नुपकारं विधातुमेवेत्यर्थः। देवस्त्वं गतवानिति निश्चित्यापि निर्णीयापि। देवेन गन्तव्यं देशं भवता गमनीयं प्रदेशं निर्णेतुं निश्चेतुमशक्नुवानोऽसमर्थः। अशक्नुवान इति हि 'ताच्छील्यवयोवचनशक्तिषु चानश्' इत्यनेन चानशि न तु शानचि। अस्य परस्मैपदित्वात्। मित्रगणः सुहृत्संघः परस्परमन्योऽन्यं वियुज्य त्यक्त्वा। दिक्षु सर्वासु दिशास्वित्यर्थः। अन्वेष्टुं मार्गयितुम्। कदाचिदेकस्मिन् दिवसे। अम्बरस्याकाशस्य मध्यं मध्यभागं

रेकस्य गिरितटमहीरुहस्य प्रच्छायशीतले तले क्षणमुपाविशम् । मम पुरोभागे दिनमध्यसंकुचितसर्वावयवां कूर्माकृतिं मानुषच्छायां निरीक्ष्योन्मुखो गगनतलान्महारयेण पतन्तं पुरुषं कंचिदन्तराल एव दयोपनतहृदयोऽहमवलम्ब्य शनैरवनितले निक्षिप्य दूरापातवीतसंज्ञं तं शिशिरोपचारेण विबोध्य शोकातिरेकेणोद्गतबाष्पलोचनं तं भृगुपतनकारणमपृच्छम् । सोऽपि कररुहैरश्रुकणानपनयन्नभाषत—' सौम्य, मगधाधिनाथामात्यस्य पद्मोद्भवस्यात्मसंभवो रत्नोद्भवो नामाहम् । वाणिज्यरूपेण कालयवनद्वीपमुपेत्य कामपि वणिक्कन्यकां परिणीय तया सह प्रत्यागच्छन्नम्बुधौ तीरस्या-

---

गतस्य प्राप्तस्याम्बरमणेः सूर्यस्य किरणं मयूखं जात्यै एकत्वम् । असहिष्णुः सोढुमशक्नुवन् । गिरितटः पर्वततटस्तस्य महीरुहो वृक्षस्तस्य । प्रकृष्टा छाया यस्य तत्प्रच्छायं तच्च शीतलं च तस्मिन् तलेऽधोभागे । नात्र प्रकृष्टा छाया तया शीतले इति समासः । तथा सति प्रच्छायाशीतल इति स्यात् । छायाबाहुल्य इत्यस्य विभाषा सेनासुरेत्यस्य च कर्मधारयेऽप्रवृत्तेः । ' तत्पुरुषोऽनञ्कर्मधारय ' इत्यधिकारसत्वादित्यलम् । क्षणमत्यन्तसंयोगे द्वितीया । पुरोभागेऽग्रभागे । दिनमध्ये दिवसस्य मध्ये । सूर्यस्य शीर्षोपरि स्थित्या छायायाश्चरणतलस्थितिरत एव संकुचिता आकुञ्चिताः सर्वेऽवयवा गात्राणि यस्यास्तां कूर्मस्येवाकृतिराकारो यस्यास्तां मानुषच्छायां मनुष्यप्रतिबिम्बं यथा कूर्मस्य छाया तस्याधोभाग एवास्ति तथेत्यर्थः । अत एव मध्याह्नवर्णने मुरारिः ' स्थलकमठवद्देहच्छाया जनस्य विचेष्टते' इत्याह । निरीक्ष्यावलोक्योन्मुख ऊर्ध्ववदनः । गगनतलादाकाशपृष्ठान्महारयेण महता वेगेन पतन्तमध आगच्छन्तं पुरुषमन्तराल एवाभ्यन्तर एव । दयया करुणयोपनतमार्द्रीभूतमिति यावद्धृदयं यस्य सोऽवलम्ब्य धृत्वा । शनैर्मन्दमवनितले भूपृष्ठे निक्षिप्य संस्थाप्य । दूरादत्युन्नतस्थानादापातः पतनं तेन वीता नष्टा संज्ञा चेतना यस्य तम् । शिशिरोपचारेण शीतलोपचारेण विबोध्य प्रकृतिमानीय । शोकस्यातिरेकेणाधिक्येनोद्गतमुत्पन्नं बाष्पं जलं ययोस्तथा भूते लोचने नयने यस्य तम् । भृगोः पर्वततटात्पतनस्य जीवत्यागस्येति यावत्कारणं हेतुमपृच्छं पृष्टवान् । सोऽपि स पुरुषोऽपि कररुहैः कराभ्याम् । बहुत्वं चिन्त्यम् । अश्रुकणान् बाष्पबिन्दूनपनयन् प्रमृजन् । सौम्येति । मगधाधिनाथो राजहंसस्तस्यामात्यस्य सचिवस्य । आत्मसंभवः पुत्रः । वाणिज्यं रूपं यस्य तेन हेतुनेति शेषः । कालयवनद्वीपं तत्संज्ञकान्तरीपम् । ' द्व्यन्तरुपसर्गेभ्योऽप ईत् ' इतीकारः । वणिक्कन्यकां वणिजः पुत्रीं परिणीय विवाह्य । तया सह मद्भार्यया सह प्रत्यागच्छन् स्वदेशं निवर्तमानः । अम्बुधौ

---

१ ' दिनमध्यसमयसंकुचित० ' ब. २ ' शूर्पाकृतिं कूर्माकृतिं ' ब. ३ ' अम्बुतीरस्य ' ब.

नातिदूर एव प्रवहणस्य भग्नतया सर्वेषु निमग्नेषु कथं कथमपि दैवानुकूल्येन तीरभूमिमभिगम्य निजाङ्गनावियोगदुःखार्णवे प्लवमानः कस्यापि सिद्धतापसस्यादेशाद्रेण षोडशहायनानि कथंचिन्नीत्वा दुःखस्य पारमनवेक्षमाणो गिरिपतनमकार्षम्' इति। तस्मिन्नेवावसरे किमपि नारीकूजितमश्रावि—'न खलु समुचितमिदं यत्सिद्धादिष्टे पतितनयामिलने विरहमसहिष्णुर्वैश्वानरं विशसि' इति। तन्निशम्य मनोविदितजनकभावं तमवादिषम्—'तात, भवते विज्ञापनीयानि बहूनि सन्ति। भवतु। पश्चादखिलमाख्यातव्यम्। अधुना नारीकूजितमनुपेक्षणीयं मया। क्षणमात्रमत्र भवता स्थीयताम्' इति। तदनु सोऽहं त्वरया किंचिदन्तरमगमम्। तत्र पुरतो भयंकरज्वालाकुलहुतभुगवगाहनसाहसिकां मुकुलिताञ्जलिपुटां वनितां कांचिदव-

---

समुद्रे। तीरस्य तटस्यानतिदूर एव समीप एव प्रवहणस्य नौकाया भग्नतया द्वैधीभावतया सर्वेषु नौकास्थितेषु जनेषु निमग्नेषु समुद्रेण निगीर्णेषु। दैवानुकूल्येन भागधेयस्यानुकूलत्वात् कथं कथमपि महता कष्टेन तीरभूमिं तटभुवमभिगम्य प्राप्य। निजाङ्गना स्वभार्या तस्या वियोग एव दुःखार्णवो दुःखोदधिस्तत्र प्लवमानो निमज्जन् एकस्मादुदधेरुत्तीर्णोऽपि पुनरन्यस्मिन्विरहोदधौ मग्न इत्यर्थः। कस्याप्यज्ञातनामधेयस्य सिद्धश्चासौ तापसस्तस्यादेशे आज्ञायामादरस्तेन। हायनानि वर्षाणि अङ्गनावियोगदुःखात् कथंचित्कष्टेन नीत्वाऽतिवाह्य। पारमन्तमनवेक्षमाणोऽनवलोकयन् गिरिपतनं पर्वततटात्प्राणत्यागमकार्षं कृतवानस्मि। तस्मिन्नेवावसरे तत्कथनवेलायामेव नारीकूजितं स्त्रीभाषितमश्रावि श्रुतम्। शृणोतेः कर्मणि लुङ्। खलुः अनुनये। समुचितं योग्यम्। सिद्धेनादिष्टे आज्ञापिते पतिर्भर्ता तनयः सूनुस्तयोर्मिलनं मेलनं संयोगस्तस्मिन्। मिल श्लेषण इत्यस्माद्भावे ल्युट्। गुणाभावो बाहुलकात्। विरहं वियोगमसहिष्णुरसहमाना वैश्वानरं वह्निं विशसि प्रविशसि। तन्नारीभाषितं निशम्याकर्ण्य। मनसाऽन्तरात्मना विदितो ज्ञातो जनकभावः पितृत्वं यस्य सः। संदेहावस्थायामन्तःकरणप्रवृत्तीनामेव प्रामाण्यं तदुक्तं कालिदासेन। 'सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः' इति। अवादिषमवोचं वदतेर्लुङ्। 'वदव्रजे' ति वृद्धिः। तात जनक। बहूनि विज्ञापनीयान्यनेकानि कथनीयानि। भवतु तत्तथैव तिष्ठतु। पश्चादनन्तरमखिलं सर्वमाख्यातव्यं कथनीयम्। अधुनाऽस्मिन्नवसरे नारीकूजितं स्त्रीभाषितमनुपेक्षणीयमुपेक्षितुं न योग्यम्। त्वरया जवेन किंचित् स्वल्पमन्तरमगममतिक्रान्तवान्। तत्र स्तोकान्तरातिक्रमणानन्तरं प्राप्ते स्थले पुरतोऽग्रतः भयंकराः प्रचण्डा ज्वालाः शिखास्ताभिराकुलो हुतभुगग्निस्तस्मिन्नवगाहनं निमज्जनं प्रक्षेप इति यावत्। तत्र साहसिकां साहसमाचरन्तीमित्यर्थः। साहसशब्दात् 'शीलम्' इत्यधिकारेण ठक्। मुकुलितो बद्धोऽञ्जलि

लोक्य संसंभ्रममनलादपनीय कूजन्त्या वृद्धया सह मत्पितुरभ्यर्णमभिगमय्य स्थविरामवोचम्—'वृद्धे, भवत्यौ कुत्रत्ये। कान्तारे निमित्तेन केन दुरवस्थानुभूयते। कथ्यताम्' इति। सा सगद्गदमवादीत्–'पुत्र, कालयवनद्वीपे कालगुप्तनाम्नो वणिजः कस्यचिदेषा सुता सुवृत्ता नाम रत्नोद्भवेन निजकान्तेनागच्छन्ती जलधौ मग्ने प्रवहणे निजधात्र्या मया सह फलकमेकमवलम्ब्य दैवयोगेन कूलमुपेतासन्नप्रसवसमया कस्यांचिदटव्यामात्मजमसूत। मम तु मन्दभाग्यतया बाले वनमातङ्गेन गृहीते मद्द्वितीया परिभ्रमन्ती 'षोडशवर्षानन्तरं भर्तृपुत्रसंगमो भविष्यति' इति सिद्धवाक्यविश्वासादेकस्मिन्पुण्याश्रमे तावन्तं समयं नीत्वा शोकमपारं सोढुमक्षमा समुज्ज्वलिते वैश्वानरे शरीरमाहुतीकर्तुमुद्युक्तासीत्' इति। तदाकर्ण्य निजजननीं ज्ञात्वा तामहं दण्डवत्प्रणम्य तस्यै मदुदन्तमखिलमाख्याय धात्रीभाषणफुल्लवदनं

पुटो हस्तसंपुटो यया तां वनितां प्रमदामवलोक्य दृष्ट्वा। ससंभ्रमं सत्वरमनलाद्वह्नेरपनीय दूरं नीत्वा कूजन्त्या जल्पन्त्या वृद्धया स्थविरया। मम पितुर्जनकस्याभ्यर्णं निकटमभिगमय्य प्रापय्य। भवत्यौ युवामुभे कुत्रत्ये कुत्र जाते। 'अव्ययात्त्यप्' इत्यनेन त्यप्। भवत्योर्निवासस्थानं कुत्रेति प्रश्नार्थः। कान्तारे विपिने केन निमित्तेन कारणेन दुरवस्था कष्टा स्थितिः। सगद्गदं गद्गदस्वरेण सहितं यथा तथा। पुत्रेति। कालयवनसंज्ञके द्वीपे कालगुप्त इति नाम यस्य तस्य। सुता कन्या। रत्नोद्भवेन तत्संज्ञकेन निजकान्तेन स्वभर्त्राऽऽगच्छन्ती भर्तृगृहमायान्ती। प्रवहणे यानपात्रे जलधौ सागरे मग्ने निमग्ने सति। निजधात्र्या स्वोपमात्रा। फलकमेकं नौकाया भागमेकं दारुमयमवलम्ब्याश्रित्य। दैवयोगेन भागधेयस्यानुकूलतया। कूलमुपेता तीरं प्राप्ता। आसन्नः समीपागतः प्रसवसमयः प्रसूतिकालो यस्याः सा। कस्यांचिदटव्यां कुत्रापि वने। आत्मजं पुत्रमसूताजनयत्। मन्दभाग्यतया दैवस्य वैपरीत्यात्। बाले पुत्रे वनमातङ्गेन वन्येन गजेन गृहीते। अहं द्वितीया यस्याः सा मद्द्वितीया। षोडशानां वर्षाणामनन्तरं पश्चात् भर्ता पुत्रश्च तयोः संगमो मेलनं भविष्यतीति। सिद्धस्य त्रिकालज्ञानिनो वाक्यस्य विश्वासात्प्रत्ययात्। पुण्ये पावन आश्रमे। तावन्तं समयं तत् षोडशवर्षरूपं परिमाणमस्य स तावान् तं समयं कालम्। 'यत्तदेतेभ्यः परिमाणे वतुप्' इत्यनेन वतुप्। नीत्वाऽतिवाह्य। अपारमनन्तं शोकं सोढुमक्षमाऽसमर्था। समुज्ज्वलिते प्रदीप्ते वैश्वानरेऽग्नौ शरीरं देहमाहुतीकर्तुं बलिरिति प्रक्षेप्तुमित्यर्थः। उद्युक्ता तत्परा। तद्वृद्धाया भाषितमाकर्ण्य श्रुत्वा। निजजननीं स्वमातरं ज्ञात्वा बुद्ध्वा। दण्डवत् काष्ठवत् साष्टांगमित्यर्थः। प्रणम्य नमस्कृत्य। ममोदन्तं वृत्तान्तमखिलं सर्वमाख्याय कथयित्वा। धात्र्या उपमातुर्भाषणेन फुल्लं विकसितं

१ 'तस्मै' न.

विस्मयविकसिताक्षं जनकमदर्शयम् । पितरौ तौ साभिज्ञानमन्योन्यं ज्ञात्वा मुदितान्तरात्मानौ विनीतं मामानन्दाश्रुवर्षेणाभिषिच्य गाढमाश्लिष्य शिरस्युपाघ्राय कस्यांचिन्महीरुहच्छायायामुपाविशताम् । 'कथं निवसति महीवल्लभो राजहंसः' इति जनकेन पृष्टोऽहं तस्य राज्यच्युतिं त्वदीयजननं सकलकुमारावाप्तिं तव दिग्विजयारम्भं भवतो मातङ्गानुयानमस्माकं युष्मदन्वेषणकारणं सकलमभ्यधाम् । ततस्तौ कस्यचिदाश्रमे मुनेरस्थापयम् ।

22 ततो देवस्यान्वेषणपरायणोऽहमखिलकार्यनिमित्तं वित्तं निश्चित्य भवदनुग्रहाल्लब्धस्य साधकत्वस्य साहाय्यकरणदक्षं शिष्यगणं निष्पाद्य विन्ध्यवनमध्ये पुरातनपत्तनस्थानान्युपेत्य विविधनिधिसूचकानां महीरुहाणामधोनिक्षिप्तान्व-

---

वदनमाननं यस्य तं विस्मयेन भार्यापुत्रलाभजाश्चर्येण विकसिते अक्षिणी नेत्रे यस्य तं जनकं पितरमदर्शयं निरदिशम् । पितरौ माता च पिता च । 'पिता मात्रा' इत्यनेनैकशेषः । तौ अनया रीत्यैकत्र समागतौ स च सा च । 'त्यदादितः शेषे पुंनपुंसकत०' इत्यनेन पुंस्त्वावशेषः । साभिज्ञानमभिज्ञानेन प्रत्यभिज्ञया सहितं यथा तथाऽन्योऽन्यं परस्परं ज्ञात्वाऽवगम्य मुदितः संतुष्टोऽन्तरात्मा ययोस्तौ । विनीतं नम्रं मामानन्दाश्रूणां प्रमोदजबाष्पाणां वर्षेण वृष्ट्याऽभिषिच्य स्नपयित्वा गाढमाश्लिष्य दृढमालिङ्गय शिरस्युपाघ्रायायुर्वृद्ध्यर्थमवघ्राणं शिरसः कृत्वा । कस्यां चित्समीपवर्तिन्यां महीरुहस्य वृक्षस्य छायायामुपाविशतां न्यषीदताम् । महीवल्लभः पृथ्वीपतिः कथं कया रीत्या निवसति सुखी वर्तते न वेति प्रश्नार्थः । जनकेन पित्रा । तस्य राजहंसस्य राज्याच्च्युतिं भ्रंशं त्वदीयं तव राजवाहनस्य जननमुत्पत्तिं सकलानां कुमाराणां मन्त्रिपुत्राणामवाप्तिं लाभं तव राजवाहनस्य दिग्विजयो दिशां जयस्तस्यारम्भं प्रारम्भं । मातङ्गस्य तन्नामकब्राह्मणस्यानुयानं पश्चाद्गमनम् । युष्माकमन्वेषणं गवेषणं तस्य कारणं हेतुम् । सकलं सर्वमभ्यधामकथयम् । ततो वृत्तान्तकथनानन्तरं तौ पितरौ कस्यचिन्मुनेराश्रमेऽस्थापयं न्यवेशयम्।

तत इति । पितृस्थापनानन्तरमित्यर्थः । देवस्य भवतोऽन्वेषणे मार्गणे परायणः समासक्तः । अखिलानां सर्वेषां कार्याणां निमित्तं कारणं प्रधानहेतुमिति यावद्वित्तं धनं निश्चित्य धनाद्विना किमपि कार्यं न सिध्यतीति ज्ञात्वेत्यर्थः । भवतोऽनुग्रहात्कृपाया लब्धस्याधिगतस्य साधकत्वस्य साधको नामालौकिकसामर्थ्यवांस्तन्निष्ठो धर्मश्च साधकत्वं तस्य साहाय्यकरणं साहाय्यसंपादनं तत्र दक्षः कुशलस्तं शिष्यगणं छात्रसमूहं निष्पाद्य संपाद्य। विन्ध्यवनस्य विन्ध्यारण्यस्य मध्ये मध्यभागे पुरातनानां प्राचीनानां पत्तनानां नगराणां

---

२ 'अमन्दाश्रु' व.

सुपूर्णान्कलशान्सिद्धाञ्जनेन ज्ञात्वा रक्षिषु परितः स्थितेषु खननसाधनैरुत्पाद्य दीनारानसंख्यान्राशीकृत्य तत्कालागतमनतिदूरे निवेशितं वणिक्कटकं कंचिदभ्येत्य तत्र बलिनो बलीवर्दान्गोणीश्च क्रीत्वान्यद्रव्यमिषेण वसु तद्गोणीसंचितं तैरुह्यमानं शनैः कटकमनयम्। तदधिकारिणा चन्द्रपालेन केनचिद्वणिक्पुत्रेण विरचितसौहृदोऽहममुनैव साकमुज्जयिनीमुपाविशम्। मत्पितरावपि तां पुरीमभिगमय्य सकलगुणनिलयेन बन्धुपालनाम्ना चन्द्रपालजनकेन नीयमानो मालवनाथदर्शनं विधाय तदनुमत्या गूढवसतिमकरवम्। ततः काननभूमिषु भवन्तमन्वेष्टुमुद्युक्तं मां परममित्रं बन्धु-

---

स्थानान्युपेत्य प्राप्य। पुराशब्दात् 'सायंचिरम्' इत्यनेन ट्युस्तुट् च। विविधानामनेकप्रकाराणां निधीनां धनसंचयानां सूचकाः कथकास्तेषां महीरुहाणां वृक्षाणामधोऽधस्तात्। तरुतलानामधस्तान्निधयः सन्ति ते च तद्विकारविशेषैर्ज्ञायन्त इति प्रसिद्धम्। तथा च हर्षचरिते 'निधिस्तरुविकारेण सन्मणिः स्फुरता धाम्ना। शुभागमो निमित्तेन स्पष्टमाख्यायते लोके' इति। निक्षिप्तान् स्थापितान् वसुभिर्धनैः पूर्णान् कलशान् घटान्। सिद्धं निधिज्ञापकमञ्जनं कज्जलं तेन। विशेषक्रियया सम्पादितेन कज्जलविशेषेण। अथवा सिद्धेन सिद्धपुरुषेण दत्तमञ्जनं तेन ज्ञात्वाऽभिगम्य। रक्षिषु रक्षकेषु छात्रेषु परित आसमन्तात् स्थितेषु रक्षणायेति शेषः। खननस्यावदारणस्य साधनैः खनित्रादिभिः। उत्पाद्योद्धृत्य। असंख्यानगण्यान् दीनारान् तत्संज्ञकसुवर्णनाणकानि राशीकृत्यैकीकृत्य। तत्काले मद्द्रव्योद्धरणकाल आगतं प्राप्तम्। अनतिदूरे समीपे निवेशितं स्थापितं वणिक्कटकं वणिक्समाजमभ्येत्य प्राप्य। तत्र तस्मिन्वणिक्समाजे बलिनो समर्थान् बलीवर्दान् वृषभान् गोणीः धान्यादिस्थापनार्थं निर्मिता वस्त्रमयीः 'पोते' इति प्रसिद्धाः। जानपदेत्यनेन ङीष् आवपनार्थे। अन्यद्रव्यमिषेण धान्यादीदमिति कथयित्वा वसु धनं तासु गोणीषु संचितमेकीकृतं तैः वृषभैरुह्यमानं धार्यमाणं कटकं वणिक्समाजमनयम्। तदधिकारिणा कटकमुख्येन। चन्द्रपालेन तन्नाम्ना वणिक्पुत्रेण विरचितं संपादितं सौहृदं मैत्री येन सः। अमुनैव साकं तेनैव सह। उज्जयिनीं विशालामुपाविशं प्रापम्। तां पुरीमुज्जयिनीमभिगमय्य प्रापय्य। तस्मान्मुनेराश्रमात्तावानीयेत्यर्थः। सकलानां सर्वेषां गुणानां निलय आगारं तेन चन्द्रपालस्य मत्सुहृदो वणिजस्य जनकेन पित्रा नीयमानस्तेन सह गच्छन् राजदर्शनार्थमिति यावत्। मालवनाथस्य मालवाधीशस्य दर्शनं विधाय कृत्वा तस्य राज्ञोऽनुमत्याऽनुमोदनेन गूढवसतिं गुप्तवासमकरवं कृतवान्। तत इति। काननभूमिषु वनस्थलीषु भवन्तं त्वां राजवाहनमन्वेष्टुं मार्गयितुमुद्युक्तं

---

१ 'उत्पाद्य' ग. २ 'तत्कालगत' ग. ३ 'संमितम्' घ.

पालो निशम्यावदत्—'सकलं धरणीतलमपारमन्वेष्टुमक्षमो भवान्मनोग्लानिं विहाय तूष्णीं तिष्ठतु। भवन्नायकालोकनकारणं शुभशकुनं निरीक्ष्य कथयिष्यामि' इति। तल्लपितामृताश्वासितहृदयोऽहमनुदिनं तदुपकण्ठवर्ती कदाचिदिन्दुमुखीं नवयौवनावलीढावयवां नयनचन्द्रिकां बालचन्द्रिकां नाम तरुणीरत्नं वणिङ्मन्दिरलक्ष्मीं मूर्तामिवावलोक्य तदीयलावण्यावधूतधीरभावो लतान्तबाणबाणलक्ष्यतामयासिषम्। चकितबालकुरङ्गलोचना सापि कुसुमसायकसायकायमानेन कटाक्षवीक्षणेन मामसकृन्निरीक्ष्य मन्दमारुतान्दोलिता लतेवाकम्पत। मनसाभिमुखैः समाकुञ्चितै

व्यापृतम् परममित्रं प्रियवयस्यो बन्धुपालश्चन्द्रपालजनकः। मां निशम्येत्यत्र मत्कर्मकश्रवणस्यासंभवात् 'सविशेषणौ हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे' इति न्यायेनान्वेषणोद्यमे मत्संबन्धिन्यन्वयः। सकलं सर्वं धरणीतलं भूपृष्ठमपारमनन्तमन्वेष्टुं मार्गयितुमक्षमोऽसमर्थः। मनोग्लानिं मानसं खेदं विहाय त्यक्त्वा तूष्णीं किमप्यकुर्वाणः। न हि बहु प्रयतमानोपि त्वं सकलं भूतलं विचरितुं समर्थः। अतस्तदुद्यमं त्यक्त्वात्रैव तन्मार्गं परिपालयन् आमुहूर्तनिरीक्षणं वसेति तदुपदेशतात्पर्यम्। भवतो नायकः स्वामी तस्यावलोकनस्य कारणं हेतुं शुभशकुनं शुभं मुहूर्तं निरीक्ष्यावलोक्य। तस्य बन्धुपालस्य लपितं भाषितं तेनाश्वासितं सान्त्वितं हृदयं यस्य सः। अनुदिनं वीप्सायामव्ययीभावः। तस्योपकण्ठो निकटस्तत्र वर्तते तथाभूतः। कदाचिदेकस्मिन्समये इन्दुरिव चन्द्र इव मुखं यस्यास्ताम्। 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इत्यनेन ङीष्। नवयौवनेन नूतनतारुण्येनावलीढा व्याप्ता अवयवा यस्यास्तां नयनयोर्नेत्रयोश्चन्द्रिका चन्द्रिकेव नेत्रसुखदायिनी ताम्। तरुणीरत्नं तरुणीषु सौन्दर्येण श्रेष्ठाम्। 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते'। मूर्तामिव शरीरिणीमिव वणिजो मन्दिरस्य गृहस्य लक्ष्मीं श्रियम्। तदीयेन तत्संबन्धिना लावण्येनावधूतस्तिरस्कृतो धीरभावो धैर्यं यस्य सः। लतान्ताः पुष्पाणि बाणा यस्य स मदनस्तस्य बाणानां सायकानां लक्ष्यतां शरव्यत्वम्। अयासिषमादन्तत्वादिट्सकौ। चकितो भीतो बालकुरङ्गो बालमृगस्तस्येव लोचने नयने यस्याः सा। अत्र बालशब्देनातिभीरुत्वं कोमलत्वाधिक्यं च व्यज्येते। कुसुमसायकस्य मदनस्य सायको बाण इवाचरति तेन। मदनबाणेनेव पीडोत्पादकेनेत्यर्थः। 'उपमानादाचारे' इति क्यङि शानच्। कटाक्षवीक्षणेनापाङ्गावलोकनेन। 'कटाक्षोऽपाङ्गदर्शने' इत्यमरः। असकृद्वारं वारं निरीक्ष्यावलोक्य। मन्देनाल्पेन मारुतेन वायुनाऽऽन्दोलिता प्रेङ्खोलिता लतेव वल्लीव। मनसा चित्तेनाभिमुखैः संमुखैः। अनेन स्वाभिप्रायप्रकटने महतीच्छाऽऽसीत्परं युवतिजनसुलभया लज्जया न पारितं तयेति भावः। लज्जाधिक्यादेव कटाक्षाणां न विस्तृतत्वमित्याह। समाकुञ्चितैः सम्यगाकुञ्चितैर्वक्रीकृतैः।

रागलज्जान्तरालवर्तिभिः साङ्गभङ्गिभिरीक्षणविशेषैर्निजमनोवृत्तिमकथयत्। चतुरगूढचेष्टाभिरस्या मनोनुरागं सम्यग्ज्ञात्वा सुखसंगमोपायमचिन्तयम्। अन्यदा बन्धुपालः शकुनैर्भवद्गतिं प्रेक्षिष्यमाणः पुरोपान्तविहारवनं मया सहोपेत्य कस्मिंश्चिन्महीरुहे शकुन्तवचनानि शृण्वन्नतिष्ठत्। अहमुत्कलिकाविनोदपरायणो वनान्तरे परिभ्रमन्सरोवरतीरे चिन्ताक्रान्तचित्तां दीनवदनां मन्मनोरथैकभूमिं बालचन्द्रिकां व्यलोकयम्। तस्याः ससंभ्रमलज्जाकौतुकमनोरमं लीलाविलोकनसुखमनुभवन्सुदत्या

लज्जावती हि न संमुखतोऽवलोकतेऽपि तु तिरश्चीनया दृष्ट्येति भावः। रागः 'सुखमप्यधिकं सुखत्वेनैव रज्यते। यस्तु वै प्रणयोत्कर्षोत्स राग इति कीर्त्यते' इत्युज्ज्वलनीलमण्युक्तः प्रेमा लज्जा च तयोरन्तराले मध्ये वर्तन्ते तैः। प्रेम्ण आधिक्यादवलोकनीयमिति मनीषा स्त्रीसुलभा लज्जा च तत्प्रतिबन्धिकाऽतः कटाक्षाणां प्रेर्या न वेति तूर्णं निर्णयाभावादुभयमध्यस्थत्वमिति भावः। अङ्गभङ्गिभिः रचनाविशेषैः सहितास्तैः। साङ्गवर्तिभिरिति पाठे सा अङ्गवर्तिभिरितिपदच्छेदः अवयवेषु नायकस्य प्रेरितैरिति तत्पाठेऽर्थः। ईक्षणविशेषैर्विशिष्टावलोकनैः। निजमनोवृत्तिं स्वमनोव्यापारं स्वाभिलाषमिति यावदकथयन्न्यवेदयत्। चतुराः सम्यक् कृताः गूढा गुप्ता याश्चेष्टा इन्द्रियव्यापारास्ताभिरस्या बालचन्द्रिकाया मनोऽनुरागं मनसोऽनुरागं प्रेमाणं सम्यक् सुष्ठु ज्ञात्वाऽवगम्य। सुखेनानायासेन संगमः संयोगस्तस्योपायं मार्गमचिन्तयं मनसा व्यभावयम्। अन्यदाऽन्यस्मिन् काले। शकुनैः शुभशंसिनिमित्तैः। 'शुभशंसिनिमित्तं च शकुनं स्यान्नपुंसकम्' इति मेदिनी। भवतो गतिं दशां स्थितिमिति यावत्। 'गतिर्मार्गे दशायां च' इति विश्वः। प्रेक्षिष्यमाणो ज्ञास्यमानः। पुरस्य नगरस्योपान्ते समीपे विहारवनं क्रीडार्थं निर्मितमुपवनम्। उपेत्य प्राप्य। शकुन्तवचनानि पक्षिविशेषभाषितानि शृण्वन्नाकर्णयन्। उत्कलिकायाः उत्कण्ठाया विनोदोऽपनयनं तत्र परायण आसक्तः वनान्तरेऽन्यस्मिन्वने। परिभ्रमन्नाहिण्डमानः। सरोवरस्य सरसस्तीरे तटे। चिन्तया आक्रान्तं व्याप्तं व्याकुलमिति यावच्चित्तं मानसं यस्यास्ताम्। दीनं खिन्नं वदनं मुखं यस्यास्ताम्। मन्मनोरथस्य ममेप्सितस्यैकभूमिं मुख्यं स्थानम्। व्यलोकयं दृष्टवान्। तस्या बालचन्द्रिकायाः ससंभ्रमं त्वरया युक्तं यत्प्रेम लज्जा च ताभ्यां कौतुकमभिलषणीयमत एव मनोरमं मनोज्ञम् 'कौतुकं त्वभिलाषे स्यात्' इति मेदिनी। लीलायाः शृङ्गारचेष्टाया विलोकनं प्रेक्षणं तस्य सुखम्। 'लीला केलिविलासयोः। शृंगारभावचेष्टायाम्' इति मेदिनी। संभ्रमः प्रेम लज्जा च ताभिः सहितं यत्कौतुकमित्यपव्याख्यानं बहुव्रीहित्वाल्लज्जाशब्दस्योपसर्जनत्वेन पुंवद्भावापत्तेः। 'अङ्गवैशैरलङ्कारैः प्रेमभिर्वचनै-

---

१ 'साङ्गवर्तिभिः' घ-न; 'अपाङ्गवर्तिभिः' ब. २ वनान्ते' व-ब.

वदनारविन्दे विषण्णभावं मदनकदनखेदानुभूतं ज्ञात्वा तन्निमित्तं ज्ञास्यंल्लीलया तदुपकण्ठमुपेत्यावोचम्—'सुमुखि, तव मुखारविन्दस्य दैन्यकारणं कथय' इति। सा रहस्यसंजातविश्रम्भतया विहाय लज्जाभये शनैरभाषत।

23 'सौम्य, मानसारो मालवाधीश्वरो वार्द्धकस्य प्रबलतया निजनन्दनं दर्पसारमुज्जयिन्यामभ्यषिञ्चत्। स कुमारः सप्तसागरपर्यन्तं महीमण्डलं पालयिष्यन्निजपैतृष्वस्रेयावुद्दण्डकर्माणौ चण्डवर्मदारुवर्माणौ धरणीभरणे नियुज्य तपश्चरणाय

रपि। प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः' इति विश्वनाथः। सुष्ठु दन्ता यस्यास्तस्याः। 'वयसि दन्तस्य दतृ' इत्यनेन दत्रादेश उगित्वान् ङीप् च। अरविन्दमिवकमलमिव वदनं मुखं तस्मिन्। विषण्णभावं खिन्नतां मदनस्य कदनं पीडा तस्य खेदेन दुःखेनानुभूतमिति विषण्णभावविशेषणं नात्र कदनशब्दस्य सुरतरूपोऽर्थो योग्यः। दारुवर्मणा न सोपभुक्ताऽपि तूपभोक्तुमारब्धा तेन च सा दुःखिता। तद्धस्ताच्च तदा सा केनाप्यपदेशेन निर्गतेति तर्क्यमग्रिमकथानुरोधात्। तस्य विषण्णत्वस्य निमित्तं कारणं ज्ञास्यन् ज्ञातुमभिलषन् तदुपकण्ठं तत्समीपं लीलया क्रीडयोपेत्य प्राप्य। अवोचमवदम्। अवोचिषमित्यपपाठस्तथारूपानिष्पत्तेः। सुष्ठु मनोहरं मुखं यस्यास्तत्संबुद्धौ। अनेनामन्त्रणेन तन्मुखलावण्याकृष्टत्वं स्वस्य द्योत्यते। वदनारविन्दस्य मुखकमलस्य दैन्यकारणं दीनताया हेतुं कथय वद। सेति। रहस्येनैकान्तेन संजात उत्पन्नो विश्रम्भो विश्वासो यस्यास्तस्या भावस्तया। एकान्ततया विश्वासस्योत्पन्नत्वादित्यर्थः। लज्जाऽन्यावेक्षणजा त्रपा रक्षकस्य समीपत्वाद्भयं च विहाय त्यक्त्वा। शनैर्मन्दम्। शनैरित्यनेनैकान्ते लज्जात्यागेपि न सा समूलं गतेति व्यज्यते।

सौम्येति। मानसारो राजहंसविजेता मालवानामधीश्वरः स्वामी। वार्द्धकस्य वृद्धत्वस्य। 'वार्द्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणी' ति विश्वः। मनोज्ञादित्वाद्वुञ्। प्रबलतया प्राबल्यात्। निजनन्दनं स्वपुत्रं दर्पसारं तन्नामकमुज्जयिन्यां स्वराजधान्यामभ्यषिञ्चत्। राज्ये स्थापयामासेत्यर्थः। स कुमारो दर्पसारः। कुमार इत्यनेनोत्साहधिक्यं व्यज्यते। सप्तसागरपर्यन्तं सप्तसागरान्तर्वर्तिनमित्यर्थः। महीमण्डलं भूवलयं 'लवणेक्षुसुरासर्पिर्दधिदुग्धपयोधयः' इति सप्तसागराः। पालयिष्यन् शासिष्यन्। निखिलभूवलयजयेच्छयेत्यर्थः। निजपितुः स्वजनकस्य स्वसुः भगिन्या अपत्ये पुत्राविति यावत्। 'पितृष्वसुश्छण्' इति छण् 'मातृपितृभ्यां स्वसे' ति षत्वं च। उद्दण्डं प्रचण्डं कर्म कृतिर्ययोस्तौ। धरणीभरणे भुवः पोषणे स्वराज्यपालन इत्यर्थः। तपश्चरणाय तपश्चर्यायै राजराजस्य कुबेरस्य

---

१ 'अवोचिषम्' ब–न. २ 'राजगिरिम्' ब.

राजराजगिरिमभ्यगात्। राज्यं सर्वमसपत्नं शासति चण्डवर्मणि दारुवर्मा मातुलाग्रजन्मनोः शासनमतिक्रम्य पारदार्यपरद्रव्यापहरणादि दुष्कर्म कुर्वाणो मन्मथसमानस्य भवतो लावण्यायत्तचित्तां मामेकदा विलोक्य कन्यादूषणदोषं दूरीकृत्य बलात्कारेण रन्तुमुद्युङ्क्ते। तच्चिन्तया दैन्यमगच्छम्' इति। तस्या मनोगतम्, मयि रागोद्रेकम्, मन्मनोरथसिद्ध्यन्तरायं च निशम्य बाष्पपूर्णलोचनां तामाश्वास्य दारुवर्मणो मारणोपायं च विचार्य वल्लभामवोचम्—'तरुणि, भवदभिलाषिण दुष्टहृदयमेनं निहन्तुं मृदुरुपायः कश्चिन्मया चिन्त्यते। यक्षः कश्चिदधिष्ठाय बालचन्द्रिकां निवसति। तदाकारसंपदाशाशृङ्खलितहृदयो यः संबन्धयोग्यः साहसिको रति-

---

गिरिं कैलासम्। सर्वं निखिलमसपत्नं शत्रुरहितं राज्यं शासति पालयति सति। मातुलस्य मानसारस्य। मातुर्भ्राता मातुलः 'मातुर्डुलच्' इत्यनेन डुलच्। अग्रजन्मा ज्येष्ठे भ्राता चण्डवर्मा च तयोः शासनमाज्ञामतिक्रम्योल्लङ्घ्य। पारदार्यं परकलत्रगमनं परद्रव्यस्य परकीयधनस्यापहरणं चादिः प्रमुखं यस्य तथाभूतं दुष्कर्म असत्कर्म कुर्वाण आचरन्। मन्मथेन मदनेन समानस्य भवतस्ते लावण्येन कान्त्या आयत्तं स्वाधीनीकृतं चित्तं यस्यास्ताम्। एकदैकास्मिन् काले। विलोक्य दृष्ट्वा कन्याऽजातविवाहा तस्या दूषणं संभोग एव दोषः पातकं दूरीकृत्यामानयित्वा। बलात्कारेण हठात् रन्तुमुपभोक्तुमुद्युङ्क्ते तत्परो भवति। तच्चिन्तया स मां दूषयेदिति भीत्या दैन्यं विक्लवतामगच्छं प्रापम्। तस्या बालचन्द्रिकाया मनोगतं मनसि स्थितमभिलषितमिति यावत्। रागोद्रेकं प्रेमाधिक्यं मम मनोरथस्तल्लाभरूपस्तस्य सिद्धेरन्तरायं विघ्नं दारुवर्माणं निशम्य श्रुत्वा। बाष्पैः पूर्णे लोचने नयने यस्यास्तामाश्वास्य सान्त्वयित्वा। मरणस्य हननस्येत्यर्थ उपायं साधनं विचार्य चिन्तयित्वा। वल्लभां मत्प्रेयसीमवोचमवदम्। तरुणीति। अनेनामन्त्रणेन अतिक्रान्तबाल्यायास्तस्याः कथ्यमानोपायज्ञाने योग्यताऽस्तीति व्यज्यते। भवतीं त्वामभिलषतीच्छति तम्। सुप्यजाताविति णिनिः। 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव' इत्यनेन पुंवत्त्वं च। दुष्टं हृदयं यस्य तं निहन्तुं मारयितुं मृदुः कोमलः पेशल इति यावत्। उपायः साधनं चिन्त्यते आलोच्यते। कश्चित्कोपि यक्षो देवयोनिविशेषः कुबेरानुचरः। अनेन तस्यामानुषशक्तित्वं द्योत्यते। बालचन्द्रिकाम् 'अधिशीङ्स्थासां कर्म' ति द्वितीया। अधिष्ठाय निवसति तां कामयमानः सदैव तत्समीपे वर्तमान आस्त इत्यर्थः। तस्या बालचन्द्रिकाया आकार एव संपत् संपत्तिस्तस्या आशयेच्छया शृङ्खलितं निगडितं बद्धमिति यावद्धृदयं यस्य सः संबन्धयोग्य इत्यनेनाकुलीनत्वादिकं परिहृतम्। साहसिकः

---

१ 'राजगिरिम्' घ.

मन्दिरे तं यक्षं निर्जित्य तयैकसखीसमेतया मृगाक्ष्या संलापामृतसुखमनुभूय कुशली निर्गमिष्यति, तेन चक्रवाकसंशयाकारपयोधरा विवाहनीयेति सिद्धेनैकेनावादीति पुरजनस्य पुरतो भवदीयैः सत्यवाक्यैर्जनैरसकृत्कथनीयम् । तदनु दारुवर्मा वाक्यानीत्थंविधानि श्रावंश्रावं तूष्णीं यदि भिया स्थास्यति तर्हि वरम् । यदि वा दौर्जन्येन त्वया सङ्गमङ्गीकरिष्यति, तदा स भवदीयैरित्थं वाच्यः—'सौम्य, दर्पसारवसुधाधिपामात्यस्य भवतोऽस्मन्निवासे साहसकरणमनुचितम् । पौरजनसाक्षिकं भवन्मन्दिरमानीतया तोयजाक्ष्या सह क्रीडन्नायुष्मान्यदि भविष्यसि तदा परिणीय तरुणीं मनोरथान्निर्विश' इति । सोऽप्येतदङ्गीकरिष्यति । त्वं सखीवेषधारिणा

बलात्कारकर्मशीलः 'साहसं तु बलात्कारकृतकार्ये' इति मेदिनी । रतिमन्दिरे केलिगृहे तं पूर्वोक्तं निर्जित्य पराजित्य । एकया सख्या सहचर्या समेता युक्ता तया मृगस्येवाक्षिणी नयने यस्यास्तया बालचन्द्रिकया सह । संलापो मिथोभाषणमेवामृतं तस्य सुखमनुभूयोपभुज्य । कुशल्यक्षतशरीरो निर्गमिष्यति केलिसदनाद्बहिरागमिष्यति । तेन साहसिकेन । तेनेत्यस्य हेतुनेत्यपव्याख्यानम् । चक्रवाकस्य तदाख्यपक्षिणः संशयो यस्मिन् तादृश आकारो ययोस्तथाभूतौ पयोधरौ स्तनौ यस्याः सा । चक्रवाकसदृशस्तनीत्यर्थः । विवाहनीया परिणेयेति सिद्धेन भविष्यज्ञेनावादयुक्तमिति । सिद्धभाषितान्यथाकरणे कर्तुरमङ्गलं सिद्धशापादिति सूचितम् । पुरजनस्य पौराणां पुरतोऽग्रतः भवदीयस्त्वत्संबन्धिभिः सत्यं वाक्यं भाषितं येषां तैः । अनेन तेष्वाश्वासो भवेज्जनानामिति सूचितम् । असकृत् पुनः पुनः । तदेव वारंवारं कथितं तत्र विश्वासदार्ढ्यं जनयति । तदनु त्वदाप्तभाषणादनन्तरम् । इत्थंभूतान्येतादृशानि । श्रावं श्रावं श्रुत्वा श्रुत्वा । आभीक्ष्ण्ये णमुल् द्वित्वंच । भिया भीत्या तूष्णीं मूकतया स्थास्यति त्वदभिलाषान्निवर्त्स्यति तर्हि तदानीं वरं श्रेयः । दौर्जन्येन दुष्टतया त्वया सङ्गममङ्गीकरिष्यति स्वीकरिष्यति । भवदीयैस्त्वदाप्तैरित्थम् अग्रे कथितप्रकारेण वाच्यो बोधनीयः । सौम्येति । दर्पसारश्चासौ वसुधाधिपः पृथ्वीपतिस्तस्यामात्यः सचिवस्तस्य । नृपामात्यसाहसकरणमपि स्वगृहेऽनुचितं किमु दर्पसारसदृशस्य बलवतो नृपस्येति द्योतयितुं दर्पसारपदमुद्धृतम् । अस्मन्निवासेऽस्मद्गृहे साहसकरणं बलात्कारकृतकार्यानुष्ठानमनुचितमयोग्यम् । पौरजनसाक्षिकं नागरिकसमक्षं भवन्मन्दिरं तव गृहमानीतयाऽनया बालचन्द्रिकया तोयजाक्ष्या तोयजमिव कमलमिवाक्षिणी यस्यास्तया क्रीडन् रममाण आयुष्मान् सजीवो यदि भविष्यसि यदि तेन यक्षेण न घानिष्यसे तदा तरुणीमेनां बालचन्द्रिकां परिणीय विवाह्य मनोरथान् स्वाभिलषितानि निर्विशोपभुंक्ष्व । सोपि दारुवर्मापि । एतदुपर्युक्तमङ्गीकरिष्यत्युररीकरिष्यति । सख्याःसहचर्या वेषं नेपथ्यं धरति

मया सह तस्य मन्दिरं गच्छ । अहमेकान्तनिकेतने मुष्टिजानुपादाघातैस्तं रभसान्निहत्य पुनरपि वयस्यामिषेण भवतीमनु निःशङ्कं निर्गमिष्यामि । तदेनमुपायमङ्गीकृत्य विगतसाध्वसलज्जा भवज्जनकजननीसहोदराणां पुरत आवयोः प्रेमातिशयमाख्याय सर्वथास्मत्परिणयकरणे ताननुनयेः । तेऽपि वंशसंपल्लावण्याढ्याय यूने मह्यं त्वां दास्यन्त्येव । दारुवर्मणो मारणोपायं तेभ्यः कथयित्वा तेषामुत्तरमाख्येयं मह्यम्' इति । सापि किंचिदुत्फुल्लसरसिजानना मामब्रवीत्—'सुभग, क्रूरकर्माणं दारुवर्माणं भवानेव हतुन्मर्हति । तस्मिन्हते सर्वथा युष्मन्मनोरथः फलिष्यति । एवं क्रियताम् । भवदुक्तं सर्वमहमपि तथा करिष्ये' इति मामसकृद्विवृत्तवदना विलोकयन्ती मन्दंमन्दमगारमगात् । अहमपि बन्धुपाल-

---

तेन । तस्य दारुवर्मणो मन्दिरं गृहम् । अहमिति । एकान्तनिकेतने रतिगृहे मुष्टयो रुद्धहस्ता जानुः ऊरुजङ्घयोः सन्धिभागः पादश्चैषां प्राण्यङ्गत्वात्समाहारस्तस्याघातैस्ताडनैः तं दारुवर्माणं रभसाद्वेगेन निहत्य व्यापाद्य । भवतीमनु त्वत्पश्चात् वयस्यामिषेण सखीमिषेण निःशंकं शंकारहितं यथा तथा निर्गमिष्यामि तद्गृहाद्बहिरागमिष्यामि । तदिति । तत् तस्मात् एनमुपर्युक्तमुपायं साधनमङ्गीकृत्य स्वीकृत्य । विगते नष्टे साध्वसं भयं लज्जा च यस्याः सा । जनकः पिता जननी माता सहोदराः भ्रातरश्च तेषाम् । 'पितृतोऽपि शतं माता गौरवादतिरिच्यत' इति न्यायतो जनन्या अभ्यर्हितत्वेन 'अभ्यर्हितं च' इत्यनुशासनेन पूर्वनिपातस्यावश्यंभाव्यत्वेऽपि 'लक्षणहेत्वोः' इति ज्ञापकादस्य प्रकरणस्यानित्यत्वेन जनकस्य पूर्वनिपातः । अत एव 'सौष्ठवौदार्यविशेषशालिनीम्' इति भारविप्रयोगः सङ्गच्छत इति दिक् । आवयोस्तव मम च । 'त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यत' इति वार्तिकादस्मदःशेषः । प्रेमातिशयं प्रेम्णः आधिक्यम् । सर्वथा सर्वप्रकारेण । आवयोः परिणयो विवाहस्तस्य करणे संपादने तान् पित्रादीन् अनुनयेरनुमोदयेथाः । तेऽपि तव पित्रादयोऽपि । वंशः कुलं संपद्धनं लावण्यं कान्तिश्च तैराढ्यः संपन्नस्तस्मै यूने तरुणाय मह्यं पुष्पोद्भवाय । अनेन वरगुणानां सर्वेषां स्वस्मिन्नवस्थानमस्तीति द्योतितम् । मारणस्य नाशस्योपायं साधनं तेभ्यः पित्रादिभ्यः कथयित्वोक्त्वा । तेषामुत्तरं तैर्दत्तं प्रत्युत्तरमाख्येयं निवेदनीयम् । सेति । तद्भाषणेन परितुष्टत्वं वर्णयितुं तां विशिनष्टि । किंचिदिति । किंचित्स्वल्पमुत्फुल्लं विकसितं सरसिजं कमलमेवाननं मुखं यस्याः सा । सुभगेति । क्रूरं कर्म कृतिर्यस्य तम् । भवानेवेत्यनेनान्यस्यास्मिन् दुष्करे कर्मण्यसामर्थ्यं द्योत्यते । तस्मिन् दारुवर्मणि हते व्यापादिते सति । सर्वथा सकलप्रकारैर्युष्मन्मनोरथो भवदभीष्टं फलिष्यति सफलं भविष्यति । भवतोक्तं कथितम् । असकृद्वारंवारं विवृत्तं परावृत्तं वदनं

मुपेत्य शकुनज्ञात्तस्मात् ‘ त्रिंशद्दिवसानन्तरमेव भवत्सङ्गः संभविष्यति ’ इत्यशृणवम् । तदनु मदनुगम्यमानो बन्धुपालो निजावासं प्रविश्य मामपि निलयाय विससर्ज । मन्मायोपायवागुरापाशलग्नेन दारुवर्मणा रतिमन्दिरे रन्तुं समाहूता बालचन्द्रिका तं गमिष्यन्ती दूतिकां मन्निकटमभिप्रेषितवती । अहमपि मणिनूपुरमेखलाकङ्कणकटकताटङ्कहारक्षौमकज्जलं वनितायोग्यं मण्डनजातं निपुणतया तत्तत्स्थानेषु निक्षिप्य सम्यगङ्गीकृतमनोज्ञवेषो वल्लभया तया सह तदागारद्वारोपान्तमगच्छम् । द्वाःस्थकथितास्मदागमनेन सादरं विहिताभ्युद्गतिना तेन द्वारोपान्तनिवारिताशेषपरिवारेण मदन्विता बालचन्द्रिका संकेतागारमनीयत । नगरव्याकुलां यक्षकथां परीक्षन्नागरि-

---

यया सा । विलोकयन्ती पश्यन्ती । रमणीनां साधारणोऽयं धर्मो यतस्ता गमनकाले आदृष्टिपथं रमणं विवृत्तेन वदनेनेक्षन्ते । मन्दं मन्दं शनैः शनैः अनेन परित्यज्य रमणं गमनं दुष्करमिति व्यज्यते बन्धुपालं शकुनरुतश्रवणे समासक्तं मन्मित्रमुपेत्य प्राप्य । शकुनं जानाति तस्मात् । भवतस्ते राजवाहनस्य सङ्गः संयोगः । तदनु तच्छ्रवणानन्तरं मयाऽनुम्यमानोऽनुस्रियमाणः । निजावासं स्वगृहम् । निलयाय गृहं यातुं ‘तुमर्थाच्च भाववचनादि’ ति चतुर्थी । तदन्विति । मम मायोपायः कपटप्रबन्ध एव वागुरापाशो मृगबन्धनार्थं निर्मितः पाशस्तत्र लग्नःसमासक्तस्तेन । रतिमन्दिरे केलिगृहे रन्तुं क्रीडायै समाहूता मानपूर्वमाकारिता तं दारुवर्माणं गमिष्यन्त्यभियास्यन्ती । दूतिकां संदेशहारिकां दासीं मन्निकटं मत्समीपं प्रेषितवती विसृष्टवती । मणिनूपुरो रत्नमयो मञ्जीरः मेखला काञ्ची कङ्कणं करभूषणं कटकं वलयं ताटङ्कः कर्णभूषणं हारो मौक्तिकमाला क्षौमं दुकूलं कज्जलं नेत्रांजनं च । समाहारद्वन्द्वः । वनितायोग्यं प्रमदोचितं मण्डनजातं भूषणसमूहं तत्तत्स्थानेषु तेषु तेषूचितेषु स्थलेषु निपुणतया कौशल्येन निक्षिप्य संस्थाप्य । सम्यक् सुष्ठु । अङ्गीकृतो धृतो मनोज्ञो मनोहारी वेषो येन सः । दासीरूपधारिणोऽप्यस्यैतादृगलंकारधारणं बालचन्द्रिकायाः संपदाधिक्यद्योतनाय स्वपुंरूपगोपनाय चेति धेयम् । वल्लभया तया बालचन्द्रिकया प्रेयस्या सह तस्य दारुवर्मण आगारद्वारस्य गृहद्वारस्योपान्तं समीपमगच्छमयाम् । द्वाःस्थैर्द्वारपालैः कथितं निवेदितमावयोस्तस्या मम चागमनं प्राप्तिर्यस्मै तेन । सादरमादरातिशयेन सह विहिता कृताऽभ्युद्गतिरभ्युद्गमनं येन तेन । द्वारोपान्ते द्वारसमीपे निवारितः निरुद्धः अशेषः सकलः परिवारः सेवकवर्गो येन तेन । तेन दारुवर्मणा मयान्विता युक्ता । संकेतागारं सुरतगृहमनीयत प्रापिता । नगरे व्याकुलां प्रसृतां यक्षकथां चमत्कृतिजनिकां यक्षवार्तां परीक्षन् । परीक्षमाणः । ईक्षतेरनुदात्तेत्त्वादात्मनेपदेन भाव्यम् । अथवा तनादित्वादेव सिद्धे कृञो ग्रहणाद् सिद्धया ‘ अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम् ’ इति परिभाषयाऽस्य

कजनोऽपि कुतूहलेन दारुवर्मणः प्रतीहारभूमिमगमत्। विवेकशून्यमतिरसौ रागातिरेकेण रत्नखचितहेमपर्यङ्के हंसतूलगर्भशयनमानीय तरुणीं तस्यै मह्यं तमिस्रासम्यगनवलोकितपुंभावाय मनोरमस्त्रीवेषाय च चामीकरमणिमयमण्डनानि सूक्ष्माणि चित्रवस्त्राणि कस्तूरिकामिलितं हरिचन्दनं कर्पूरसहितं ताम्बूलं सुरभीणि कुसुमानीत्यादिवस्तुजातं समर्प्य मुहूर्तद्वयमात्रं हासवचनैः संलपन्नतिष्ठत्। ततो रागान्धतया सुमुखीकुचग्रहणे मतिं व्यधत्त। रोषारुणितोऽहमेनं पर्यङ्कतलान्निःशङ्को निपात्य मुष्टिजानुपादाघातैः प्राहरम्। नियुद्धरभसविकलमलंकारं पूर्ववन्मेलयित्वा भयक-

---

सिद्धिः। वस्तुतो भाष्ये कृञ्ग्रहणस्य प्रत्याख्यातत्वेन परिभाषाया अस्या अप्यनुक्तत्वेनाप्रामाण्यं प्रयोगाणां चैवंविधानामनादेयत्वमेव न च चक्षिङो ङित्करणं ज्ञापकं तस्येदित्वाभावसंपादनेन चारितार्थ्यादित्यास्तां तावत्। नागरिकजनः पौरसमूहः कुतूहलेन कौतुकेन। प्रतीहारभूमिं द्वारप्रदेशमगमत् प्रापत्। ङ्हदित्वादङ्। विवेकेन विचारेण शून्या रहिता मतिर्बुद्धिर्यस्य सः असौ दारुवर्मा। रागस्य प्रेम्णोऽतिरेकेणाधिक्यात्। रत्नैः खचितो युक्तो हेमपर्यङ्कः सुवर्णपर्यङ्कस्तास्मिन्। हंसतूलो हंसपक्षमयः कार्पासो गर्भे मध्ये यस्य तं शयनीयं शय्यामानीय नीत्वा। तस्यै बालचन्द्रिकायै मह्यं च तत्सखीभूताय पुष्पोद्भवाय। ननु तत्र तेन कथं न ज्ञातः पुंभावस्तदाह। तमिस्रेति। तमिस्रया तमःप्रधानरात्र्या सम्यक् समीचीनमनवलोकितोऽनिरीक्षितः पुंभावः पुंस्त्वं यस्य तस्मै। मनोरमो मनोहारी स्त्रीवेषो यस्य तस्मै। एतेन वेषस्य मनोहारित्वेनापि न ज्ञातो पुंभाव इत्यपि व्यज्यते। चामीकरमणिमयानि सुवर्णरत्नविकारास्तन्निर्मितानीति यावत् मण्डनानि भूषणानि सूक्ष्माणि तनूनि चित्राणि नैकवर्णानि वस्त्राणि वसनानि कस्तूरिकया मृगमदेन मीलितं मिश्रितं हरिचन्दनं चन्दनविशेषः कर्पूरेण सहितं युक्तं ताम्बूलं सुरभीणि सुगन्धीनि कुसुमानि पुष्पाणि। इत्येवं आदिः प्रधानं येषां तेषां वस्तूनां जातं समूहं समर्प्य दत्त्वा। मुहूर्तद्वयमात्रं स्वल्पकालं हासवचनैः परिहासभाषणैः संलपन् मिथो भाषमाणः। तत इति। ततः संलापानन्तरं रागान्धतया प्रेम्ण आधिक्यात्। सुमुख्याः सुन्दर्याः कुचग्रहणे स्तनपीडने मतिं व्यधत्त बुद्धिमकरोत्। रोषेण क्रोधेनारुणितस्ताम्रः। एनं दारुवर्माणं पर्यङ्कस्य तलात्पृष्ठात्। निःशङ्को विगतभीः निपात्य भूमौ पातयित्वा। मुष्टिजानुपादस्याघातैस्ताडनैः प्राहरमताडयम् विगतजीवितमकरवमित्यर्थः। नियुद्धस्य बाहुयुद्धस्य रभसेन वेगेन विकलं स्वस्थानाच्चलितमलंकारं भूषणं पूर्ववत् यथापूर्वं मेलयित्वा स्थापयित्वा। 'नियुद्धं बाहुयुद्धे स्याद्' इत्यमरः। भयेन भीत्या कम्पितां चलितां त्रस्तामिति यावत्।

---

१ 'कुसुमानि ललितं वस्तुजातम्' ब. २ 'सुमुखीकचग्रहणे' ब; 'सुमुख्यालिङ्गने' ब.

ल्पितां नताङ्गीमुपलालयन्मन्दिराङ्गणमुपेतः साध्वसकम्पित इवोच्चैरकूजमहम्— 'हा, बालचन्द्रिकाधिष्ठितेन घोराकारेण यक्षेण दारुवर्मा निहन्यते । सहसा समागच्छत । पश्यतेमम्' इति । तदाकर्ण्य मिलिता जनाः समुद्यद्बाष्पा हाहानिनादेन दिशो बधिरयन्तः 'बालचन्द्रिकामधिष्ठितं यक्षं बलवन्तं शृण्वन्नपि दारुवर्मा मदान्धस्तामेवायाचत । तदसौ स्वकीयेन कर्मणा निहतः । किं तस्य विलापेन', इति मिथो लपन्तः प्राविशन् । कोलाहले तस्मिंश्चटुललोचनया सह नैपुण्येन सहसा निर्गतो निजावासमगाम् । ततो गतेषु कतिपयदिनेषु पौरजनसमक्षं सिद्धादेशप्रकारेण विवाह्य तामिन्दुमुखीं पूर्वसंकल्पितान्सुरतविशेषान्यथेष्टमन्वभवम् । बन्धुपालशकुननिर्दिष्टे दिवसेऽस्मिन्निर्गत्य पुराद्बहिर्वर्तमानो नेत्रोत्सवकारि भवदवलोकनसुखमप्यनुभवामि ' इति ।

नतानि नम्राण्यङ्गानि गात्राणि यस्यास्तामुपलालयन् सान्त्वयन् । मन्दिरस्याङ्गणं सत्वरमुपेतः प्राप्तः । साध्वसेन भीत्या कम्पित इवोच्चैरकूजं महता स्वरेणावदम् । हेति । हेतिखेदे। 'हा विषादे च शोके च' ति मेदिनी । बालचन्द्रिकामधिष्ठितेन निवसता यक्षेण देवयोनिविशेषेण । निहन्यते व्यापाद्यते । सहसाऽतर्कितं तूर्णमिति यावत् समागच्छत तत्साहाय्यायागच्छतेत्यर्थः । इमं दारुवर्माणं पश्यतावलोकयत । तद् मद्भाषितमाकर्ण्य श्रुत्वा । मिलिताः प्राप्ताः समुद्यदुद्गच्छद्बाष्पं नेत्रोदकं येषां ते । हाहानिनादेन हाहेतिदुःखशब्देन दिशः ककुभो बधिरयन्तो व्याप्नुवन्तः । बधिरात्तत्करोतीति णिचि शतृप्रायः। बलवन्तं सामर्थ्ययुक्तं शृण्वन्नपि जानन्नपि मदेनान्धः कार्याकार्यविचारेऽसमर्थ इत्यर्थः । तामेव यक्षाधिष्ठितामेवायाचत प्रार्थयत । तत्तस्मात्स्वकर्मणा स्वाविनयेन निहतो मृतः । तस्य विलापेन किं तदर्थं शोकः किमिति कर्तव्यः । मिथो लपन्तोऽन्योन्यं भाषमाणाः प्राविशन्नन्तः समागच्छन् । तस्मिन्कोलाहले जनकृते कलकले सति । चटुले चञ्चले लोचने यस्यास्तया सह । नैपुण्येन कुशलतया । सहसाऽतर्कितं केनाप्यलक्षित इत्यर्थः । निर्गतो बहिरागतो निजावासं स्वगृहमगामगच्छम् । तत इति । कतिपयदिनेषु केषु चिद्दिवसेषु गतेष्वतिक्रान्तेषु सत्सु । पौरजनसमक्षं नागरिकाणामग्रतः । तामिन्दुमुखीं चन्द्रवदनां बालचन्द्रिकां सिद्धादेशस्य सिद्धाज्ञायाः प्रकारेण रीत्या विवाह्य परिणीय । पूर्वं विवाहात्प्राक् संकल्पितान् मनसा चिन्तितान् सुरतविशेषान् क्रीडाविशेषान् यथेष्टमातृप्ति। बन्धुपालस्य मत्सुहृदः शकुनेन शुभाशंसिपक्षिरुतादिना निर्दिष्टे कथिते। पुरान्नगरान्निर्गत्य निष्क्रम्य । बहिर्बहिर्भागे । नेत्रयोर्नयनयोरुत्सवं तोषं करोति तथाभूतं भवतो राजवाहनस्यावलोकनस्येक्षणस्य सुखम् । इति शब्दः पुष्पोद्भववृत्तान्तसमाप्तिं द्योतयति ।

24 एवं मित्रवृत्तान्तं निशम्याम्लानमानसो राजवाहनः स्वस्य च सोमदत्तस्य च वृत्तान्तमस्मै निवेद्य सोमदत्तम् ‘ महाकालेश्वराराधनानन्तरं भवद्वल्लभां सपरिवारां निजकटकं प्रापय्यागच्छ ’ इति नियुज्य पुष्पोद्भवेन सेव्यमानो भूस्वर्गायमाणमवन्तिकापुरं विवेश। तत्र ‘ अयं मम स्वामिकुमारः ’ इति बन्धुपालादये बन्धुजनाय कथयित्वा तेन राजवाहनाय बहुविधां सपर्यां कारयन्सकलकलाकुशलो महीसुरवर इति पुरि प्रकटयन्पुष्पोद्भवोऽमुष्य राज्ञो मज्जनभोजनादिकमनुदिनं स्वमन्दिरे कारयामास।

इति श्रीदाण्डिनः कृतौ दशकुमारचरिते पुष्पोद्भवचरितं नाम चतुर्थ उच्छ्वासः।

एवमिति। एवं पूर्वोक्तप्रकारं मित्रवृत्तान्तं सुहृद्वार्त्तां निशम्य श्रुत्वा। अम्लानं प्रमुदितं मानसं मनो यस्य सः। अस्मै पुष्पोद्भवाय निवेद्य कथयित्वा। महाकालेश्वरस्योज्जयिनीस्थमहादेवस्याराधनानन्तरं पूजनानन्तरं सपरिवारां दासीभिः सहितां। निजकटकं स्वसैन्यस्थानं प्रापय्य नीत्वाऽऽगच्छ प्रत्यावर्तस्व। सोमदत्तं नियुज्याज्ञाप्य। भूस्वर्ग इवाचरति तमवन्तिकापुरमुज्जयिनीम्। तत्रोज्जयिन्याम्। बन्धुपाल आदिः प्रमुखो यस्मिंस्तस्मै बन्धुजनायाप्तवर्गाय कथयित्वा निवेद्य। तेन बन्धुवर्गेण। बहुविधामनेकप्रकारां सपर्यां पूजाम्। सकलासु सर्वासु कलासु कुशलः प्रवीणो महीसुरवरो ब्राह्मणश्रेष्ठ इति पुरि नगरे प्रकटयन् प्रख्यापयन्। अमुष्य राज्ञो राजवाहनस्य। मज्जनं स्नानं भोजनं चादी यस्य तत। ‘ शेषे विभाषा ’ इत्यनेन कप्। अनुदिनं प्रत्यहं वीप्सायामव्ययीभावः। स्वमन्दिरे स्वगृहे।

इति श्रीदशकुमारचरितपूर्वपीठिकाव्याख्यायां बालबोधिन्यां चतुर्थ उच्छ्वासः।

---

१ ‘ अञ्जन ’ ब-ब.

अवन्तिसुन्दरीपरिणयो नाम पञ्चमोच्छ्वासः।

25 अथ मीनकेतनसेनानायकेन मलयगिरिमहीरुहनिरन्तरावासिभुजंगमभुक्तावशिष्टेनेव सूक्ष्मतरेण धृतहरिचन्दनपरिमलभरेणेव मन्दगतिना दक्षिणानिलेन वियोगिहृदयस्थं मन्मथानलमुज्ज्वलयन्, सहकारकिसलयमकरन्दास्वादनरक्तकण्ठानां मधुकरकलकण्ठानां काकलीकलकलेन दिक्चक्रं वाचालयन्, मानिनीमानसोत्कलिकामुपनयन्, माकन्दसिन्दुवाररक्ताशोककिंशुकतिलकेषु कलिकामुपपादयन्, म-

---

श्रीवेङ्कटेशो विजयते।

अथेति। अथ कुमारस्योज्जयिन्यां स्थित्यनन्तरं। वसन्तकालः समाजगामेत्यन्वयः। तं विशिनष्टि। मीनेति। मीनकेतनस्य मदनस्य सेनानायकेन सेनापतिना। 'मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः' इत्यमरः। मलयानिलस्य मदनोद्दीपकत्वात्स कामसेनापतिः। मलयगिरिर्मलयाचलस्तस्य महीरुहा वृक्षास्तान् निरन्तरं निबिडमावसन्ति निवसन्ति तैर्भुजङ्गमैः सर्पैर्भुक्तात्खादितादवशिष्टेनेव। सूक्ष्मतरेणात्यल्पेन। वसन्ते वातस्य नैसर्गिकाल्पत्वं मलयवासिसर्पभक्षणरूपकारणादुत्प्रेक्षितमिति हेतूत्प्रेक्षा। धृत ऊढो हरिचन्दनानां चन्दनविशेषाणां परिमलस्य सुगन्धस्य भर आधिक्यं येन तेनेव। इदमपि मन्दगतित्वस्य हेतुत्वेन कल्पितमिति पूर्ववद्धेतूत्प्रेक्षा। मन्दा शनैर्गतिर्गमनं यस्य तेन। भाराक्रान्तश्च मन्दं याति। दक्षिणानिलेन वासन्तसमीरणेन। 'झञ्झावातः प्रावृषिजो वासन्तो मलयानिल' इति हारावली। वियोगिनां विप्रयुक्तानां हृदये तिष्ठति तथाभूतं 'सुपि स्थ' इत्यनेन कः। मन्मथानलं कामवह्निमुज्ज्वलयन् दीपयन्। सहकारस्याम्रस्य किसलयाः पर्णानि मकरन्दो मधु च तेषामास्वादनेन भक्षणेन रक्तो रागयुक्तः कण्ठो येषां तेषां मधुकरा भ्रमराः कलकण्ठाः कोकिलाश्च तेषां काकलीकलकलो मधुरास्पष्टशब्दकोलाहलस्तेन। 'काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे' इत्यमरः। दिक्चक्रं दिशां समूहं वाचालयन् मुखरयन्। 'आलजाटचौ बहुभाषिणी' त्यनेनालचि तस्मात्तकरोतीति णिचि शतृप्रत्ययः। मानिनीनामभिमानयुक्तानां प्रमदानां मानसेष्वन्तःकरणेषु उत्कलिकामुत्कण्ठामुपनयन् जनयन्। मानाधिक्यात्प्रियमगतानां मनांसि गमनोन्मुखानि कुर्वन् तासां मानं दूरीकुर्वन्नित्यर्थः। वसन्तप्राप्त्या मानिन्य उत्कण्ठिता आसन्निति भावः। माकन्दः सहकारः सिन्दुवारो निर्गुण्डी रक्ताशोकस्ताम्राशोकः किंशुकः पलाशः तिलकस्तत्संज्ञको वृक्षविशेषश्च तेषु कलिकां कोरकमुपपादयन् जनयन्। अस्मिन्नृतौ माकन्दादीनां कोरकोत्पत्तिः मदनस्य कामस्य महोत्सवाय रसिकानां प्रेमवतां

---

१ 'धूत' च-ब

दनमहोत्सवाय रसिकमनांसि समुल्लासयन्, वसन्तसमयः समाजगाम। तस्मिन्नतिरमणीये कालेऽवन्तिसुन्दरी नाम मानसारनन्दिनी प्रियवयस्यया बालचन्द्रिकया सह नगरोपान्तरम्योद्याने विहारोत्कण्ठया पौरसुन्दरीसमवायसमन्विता कस्यचिच्चूतपोतकस्य च्छायाशीतले सैकततले गन्धकुसुमहरिद्राक्षतचीनाम्बरादिनानाविधेन परिमलद्रव्यनिकरेण मनोभवमर्चयन्ती रेमे। तत्र रतिप्रतिकृतिमवन्तिसुन्दरीं द्रष्टुकामः काम इव वसन्तसहायः पुष्पोद्भवसमन्वितो राजवाहनस्तदुपवनं प्रविश्य तत्रतत्र मलयमारुतान्दोलितशाखानिरन्तरसमुद्भिन्नकिसलयकुसुमफलसमुल्लसितेषु रसालतरुषु कोकिलकुलकीरालिमधुकराणामालापाञ्श्रावंश्रावं किंचिद्विक-

---

कामिनामिति यावन्मनांसि मानसानि समुल्लासयन्नुत्साहवन्ति विदधद्वसन्तसमयो वसन्तकालः समाजगाम सम्यक्तया प्रादुर्बभूव। तस्मिन्निति। अतिरमणीयेऽतिमनोहरे काले वसन्ते। मानसारस्य नन्दिनी सुता। प्रियवयस्यया प्रियसख्या। नगरोपान्तरम्योद्याने पुरस्य निकटवर्तिनि रमणीय उपवने। विहारस्य क्रीडाया उत्कण्ठयौत्सुक्येन। पौरसुन्दरीणां नगरोद्भूतयुवतीनां समवायेन समूहेन समन्विता युक्ता। चूतपोतकस्याम्रवृक्षकस्य पोतशब्दाच्छिशुवाचकात् 'अल्पे' इत्यनेन कः। छायया शीतले शीते सैकततले वालुकानिर्मिते भुवस्तले। एतेन तदानीमपि विहारभुवि वालुकाप्रक्षेपेण सौन्दर्योत्पादनपद्धतिरासीदिति ज्ञायते। गन्धं चन्दनं कुसुमानि पुष्पाणि हरिद्रा सौभाग्यद्रव्यविशेषः अक्षताः पूजातण्डुला लाजा वा चीनाम्बरं चीनदेशोद्भूतं सूक्ष्मं वस्त्रं चादीनि यस्य स चासौ नानाविधोऽनेकप्रकारकस्तेन परिमलद्रव्याणां सुगन्धिवस्तूनां निकरः समूहस्तेन। मनोभवं मदनमर्चयन्ती पूजयन्ती रेमे मुमुदे। तत्र तस्मिन्नुद्याने रतिप्रतिकृतिं मदनभार्याप्रतिमामतिसौन्दर्यशालिनीमित्यर्थः। अवन्तिसुन्दरीं तदाख्यां मानसारकन्यकां द्रष्टुं काम इच्छा यस्य सः। तुमुनो मकारस्य 'तुं काममनसोरपी' ति वचनाल्लोपः। वसन्तः सहायः सहचरो यस्य स काम इव मदन इव। पुष्पोद्भवेन सुहृदा समन्वितो युक्तो राजवाहनः। अनया च कामोपमया रतितुल्या साऽसंशयमेनं दृष्ट्वा पीडिता भवेदिति सूचितम्। तदुपवनमुद्यानम्। तत्र तत्र तस्मिंस्तस्मिन्नुद्यानभाग इत्यर्थः। मलयमारुतेन वसन्तानिलेनान्दोलिताभिः कम्पिताभिः शाखाभिर्निरन्तरा अवकाशरहिता घना इति यावत्ते च ते समुद्भिन्नान्युद्गतानि किसलयानि पर्णानि कुसुमान्याम्रमञ्जर्यः फलानि च तैः समुल्लासिताः शोभितास्तेषु रसालतरुषु आम्रवृक्षेषु। वसन्ते च नूतनपत्रपुष्पफलोद्गमेनाम्रवृक्षाः शोभन्ते। कोकिलकुलानि परभृतसमूहाः कीराणां शुकानामलयः पङ्क्तयो मधुकरा भ्रमराश्च तेषामालापान् विरावान्। श्रावं

---

१ 'कोकिलकीरालिफलमधु०' ब. न.

सदिन्दीवरकह्लारकैरवराजीवराजिकेलिलोलकलहंससारसकारण्डवचक्रवाकचक्रवालकलरवव्याकुलविमलशीतलसलिललितानि सरांसि दर्शंदर्शममन्दलीलया ललनासमीपमवाप। बालचन्द्रिकया 'निःशङ्कमित आगम्यताम्' इति हस्तसंज्ञया समाहूतो निजतेजोनिर्जितपुरुहूतो राजवाहनः कृशोदर्या अवन्तिसुन्दर्या अन्तिकं समाजगाम। या वसन्तसहायेन समुत्सुकतया रतेः केलीशालभञ्जिकाविधित्सया कंचन नारीविशेषं विरच्यात्मनः क्रीडाकासारशारदारविन्दसौन्दर्येण पादद्वयम्, उद्यान-

---

श्रावं श्रुत्वा श्रुत्वा। आभीक्ष्ण्ये णमुल् द्वित्वं च। किंचिदीषद्विकसन्ति प्रफुल्लानि इन्दीवराणि नीलकमलानि कल्हाराणि श्वेतकमलानि कैरवाणि श्वेतकमलविशेषाः राजीवानि कमलानि च तेषां राजिषु पङ्क्तिषु या केलिः क्रीडा तस्यां लोला आसक्ता ये कलहंसा राजहंसाः सारसाः पक्षिविशेषाः कारण्डवाः 'पाणकोंबडा' इति भाषायां प्रसिद्धाः चक्रवाकाश्च तेषां चक्रवालं मण्डलं तस्य कलरवेण मधुरध्वनिना व्याकुलं पीडितं पूर्णमिति यावत् विमलं स्वच्छं शीतलं हिमं यत्सलिलमुदकं तेन ललितानि मनोहराणि सरांसि सरोवराणि दर्शं दर्शं दृष्ट्वा दृष्ट्वा। णमुल्। अमन्दलीलया लीलाधिक्येन ललनाया अवन्तिसुन्दर्याः समीपम्। अवाप्राजगाम। निःशङ्कं संशयरहितम्। परिचयाभावात्कथं युवतिसमीपं गन्तव्यमिति संशयं त्यक्त्वेत्यर्थः। हस्तसंज्ञया करचालनेन समाहूत आकारितो निजतेजसा स्वकान्त्या निर्जितः पराजितः पुरुहूत इन्द्रो येन स इन्द्रादप्यधिकं तेजो दधान इत्यर्थः। कृशमुदरं यस्यास्तनुमध्याया इति यावदवन्तिसुन्दर्यास्तत्संज्ञकराजदुहितुरन्तिकं समीपमाजगाम प्राप। तां राजकन्यां वर्णयति। येति। वसन्तः सहायो यस्य तेन कामेन। रतेः समुत्सुकतया स्वभार्याया औत्कण्ठ्यार्थः स्वभार्यावियोगखिन्नस्य मनसो विनोदायेत्यर्थः। न चात्र रतेर्मनोविनोदार्थमित्यर्थः कार्यः। रतेर्युवतित्वेन बालोचितकेलिषु प्रेमाभावात्प्रत्युत मनसः खेदमपनेतुं स्त्रीप्रतिकृतिरेव मदनेन कृतेति मदुक्त एवार्थश्चारुः। केलीशालभञ्जिका क्रीडार्थं निर्मिता पुत्तलिका युवतिप्रतिकृतिरिति यावत् तस्या विधित्सा कर्तुमिच्छा तया। विपूर्वाद्धातेः सनि 'सनि मीमाघुरभ०' त्यनेनाच इकारे 'अःप्रत्ययादि' त्यनेनाकारः। अथवा वयःसन्धौ वर्तमानाया रतेर्बाल्योपभुक्तक्रीडायामौत्कण्ठ्यं कल्पनीयम्। नारीविशेषं स्त्रीविशेषं विरच्य निर्माय। आत्मनः स्वस्य क्रीडाकासारं विहारार्थं निर्मितं सरस्तस्य शारदारविन्दं शरदृतुसंबन्धिकमलं तस्य सौन्दर्येण कान्त्या।' सन्धिवेलाद्यृतु०' इत्यनेनाण् शरच्छब्दात्। लीलाकासारसारेति पाठे सरसः सारः सर्वस्वभूतं यत्कमलसौन्दर्यमित्यर्थः। पादद्वयं चरणयुग-

---

१ 'शारदारविन्द' ग.

वनदीर्घिकामत्तमरालिकागमनरीत्या लीलालसगतिविलासम्, तूणीरलावण्येन जङ्घे, लीलामन्दिरद्वारकदलीलालित्येन मनोज्ञमूरुयुगम्, जैत्ररथचातुर्येण घनं जघनम्, किंचिद्विकसल्लीलावतंसकह्लारकोरककोटरानुवृत्त्या गङ्गावर्तसनाभिं नाभिम्, सौधारोहणपरिपाट्या वलित्रयम्, मौर्वीमधुकरपङ्क्तिनीलिमलीलया रोमावलिम्, पूर्णसुवर्णकलशशोभया कुचद्वन्द्वम्, लतामण्डपसौकुमार्येण बाहू, जयशङ्खाभिख्यया कण्ठम्, कमनीयकर्णपूरसहकारपल्लवरागेण प्रतिबिम्बीकृतबिम्बं रदनच्छदम्, बाणायमानपुष्पलावण्येन शुचिस्मितम्, अग्रदूतिकाकलकाण्ठिकाकलालापमाधुर्येण

लम्। कमलसौन्दर्येण चरणनिष्पादनात्तयोः कमलसादृश्यं विशेषतश्च मदनक्रीडासरसः कमलसौन्दर्योद्धृत्या च पादयोः सौन्दर्याधिक्यं व्यज्यते। उद्यानवनस्योपवनस्य दीर्घिका वापी तत्संबन्धिनी या मत्तमरालिका मधुपानादिनोन्मत्ता हंसी तस्या गमनस्य रीत्या प्रकारेण। अत्रोद्यानस्य वनशब्देन साहचर्यं न विशेषरमणीयतामाधत्ते। लीलया शृङ्गारजभावेनालसा जडा गतिर्गमनं तस्या विलासस्तम्। विलासो नाम 'यानस्थानासनादीनां मुखनेत्रादिकर्मणाम्। विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना'। इति विश्वनाथः। तूणीरो निषङ्गस्तस्य लावण्येन कान्त्या जङ्घे प्रसूते। जङ्घा 'पोटरी' इति भाषायां प्रसिद्धा। लीलामन्दिरं रतिगृहं तस्य द्वारकदल्योः शोभार्थं द्वारि स्थापितयोः कदल्योर्लालित्येन सौन्दर्येण मनोज्ञं मनोहरमूरुयुगं जानूपरिभागद्वयम्। जैत्रो जयनशीलो रथः स्यन्दनस्तस्य चातुर्येण घनं सान्द्रं जघनं कटिपुरोभागः। किंचिदीषद्विकसत्प्रफुल्लं लीलावतंसकल्हारं भूषणार्थं कर्णे स्थापितं कमलं तस्य कोरकः कलिका तस्य कोटरो मध्यभागस्तस्यानुवृत्त्याऽनुवर्तनेन गङ्गाया भागीरथ्या आवर्तो जलभ्रमस्तस्य सनाभिः सदृशस्तं नाभिम्। सौधस्य प्रासादस्यारोहणं सोपानस्तस्य परिपाट्या पङ्क्त्या वलित्रयं केशानामुदरवर्तिनां त्रिभागम्। मौर्वी ज्या या मधुकरपङ्क्तिर्भ्रमरावलिस्तस्य नीलिमा नीलत्वं तस्य लीलया विलासेन। 'धनुः पौष्पं मौर्वी मधुकरमयी' इति वर्णनात्कामधनुषो ज्या भ्रमररूपा। रोमावलिं रोमपङ्क्तिम्। पूर्णौ जलादिना व्याप्तौ सुवर्णकलशौ हेमघटौ तयोः शोभया कुचद्वन्द्वं स्तनयुगम्। लतामण्डपस्य लोकविश्रान्त्यर्थं निर्मितलतागृहस्य सौकुमार्येण कोमलतया बाहू हस्तौ। जयशङ्खस्याभिख्यया शोभया कण्ठं ग्रीवाम्। कमनीयो मनोहरः कर्णपूरः कर्णावतंसः सहकारपल्लव आम्रपर्णं कर्णे भूषणार्थं स्थापितमाम्रपर्णं तस्य रागेण रक्तिम्ना प्रतिबिम्बीकृतमनुसृतं बिम्बं तदाख्यं फलं येन तद्रदनच्छदमधरोष्ठम्। 'ओष्ठाधरौ तु रदनच्छदौ' इत्यमरः। बाणायमानं बाण इवाचरत्पुष्पं

---

१ 'कामिकर्णपूर्ण०' ब.

वचनजातम्, सकलसैनिकनायकमलयमारुतसौरभ्येण निःश्वासपवनम्, जयध्वजमीनदर्पेण लोचनयुगलम्, चापयष्टिश्रिया भ्रूलते, प्रथमसुहृदः सुधाकरस्यापनीतकलङ्कया कान्त्या वदनम्, लीलामयूरबर्हभङ्गया केशपाशं च विधाय समस्तमकरन्दकस्तूरिकासंमितेन मलयजरसेन प्रक्षाल्य कर्पूरपरागेण संमृज्य निर्मितेव रराज। सा मूर्तिमतीव लक्ष्मीर्मालवेशकन्यका स्वेनैवाराध्यमानं संकल्पितवरप्रदानायाविर्भूतं मूर्तिमन्तं मन्मथमिव तमालोक्य मन्दमारुतान्दोलिता लतेव मदनावेशवती चकम्पे। तदनु क्रीडाविश्रम्भान्निवृत्ता लज्जया कानि कान्यपि भावान्तराणि व्यधत्त।

कुसुमं तल्लावण्येन शुचि स्वच्छं स्मितं हास्यं हास्यस्य शुभ्रत्वात्पुष्पसाम्यम्। अग्रदूतिका प्रथमं प्रेष्यमाणा दूती या कलकण्ठिका कोकिला तस्याः कला मधुरा आलापाः अस्फुटशब्दास्तेषां माधुर्येण वचनजातं वचनसमूहः। सकलानां सैनिकानां नायकोऽधिपतिरर्थात्सेनापतिर्यो मलयमारुतो वासन्तिकः पवनस्तस्य सौरभेण सौगन्ध्येन निःश्वासमारुतं श्वासपवनम्। जयध्वजो जयपताका तस्य मीनो मत्स्यस्तस्य दर्पेण गर्वेण लोचनयुगलं नेत्रद्वयम्। चापयष्टिर्धनुष्पृष्ठं तस्य श्रिया कान्त्या भ्रूलते भ्रुकुटिद्वयम्। लताशब्दोऽलंकारार्थः। प्रथमः प्रधानो यः सुहृन्मित्रं सुधाकरश्चन्द्रस्तस्यापनीतो दूरीकृतः कलङ्को यस्यास्तया कान्त्या शोभया वदनं मुखम्। एतेन मुखस्य चन्द्रादप्यधिकं सौन्दर्यं दृश्यते। लीलाबर्हः क्रीडामयूरस्तस्य बर्हः पिच्छं तस्य भङ्ग्या रचनया केशपाशं केशकलापम्। 'पाशः केशादिपूर्वः स्यात्तत्संघ' इति मेदिनी। विधाय कृत्वा। समस्तः एकीकृतः सकलो वा मकरन्दो मधु कस्तूरिका मृगनाभिर्मरिमल्श्च ताभ्यां संमितेन मिश्रितेन मलयजरसेन चन्दनोदकेन प्रक्षाल्य स्नापयित्वा कर्पूरस्य परागेण धूल्या। जातावेकत्वं संमृज्य संशोध्य निर्मितेव विहितेव रराजे शुशुभे। सेति। मूर्तिमतीव शरीरिणीव लक्ष्मीः पद्मा। मालवेशस्य मालवाधिपस्य मानसारस्य कन्यका स्वेनैवात्मनैवाराध्यमानं पूज्यमानं संकल्पितस्येष्टस्य वरस्य प्रदानायार्पणायाविर्भूतं प्रकटितं मूर्तिमन्तं देहधारिणं मन्मथमिव मदनमिव तं राजवाहनमालोक्य दृष्ट्वा मन्देन मृदुना मारुतेन पवनेनान्दोलिता कम्पिता लतेव व्रततिरिव मदनस्य मन्मथस्यावेशः प्रवेशो यस्यास्तथाभूतेव संजातमान्मथविकारेव चकम्पे वेपथुमत्यासीदित्यर्थः। तदनु कम्पनानन्तरं क्रीडाविश्रम्भाद्विलासविश्वासात् लज्जया स्त्रीणां पुरुषमुखावलोकनतो जायमानेन व्रीडासंज्ञकेन विकारविशेषेण निवृत्ता परावृत्ता। अन्यसमक्षं क्रीडितुं लज्जितेत्यर्थः। अथवा लज्जयेति भावान्तरविधानस्य करणम्। कानि कान्यप्यनिर्वचनीयानि भावान्तराणि भिन्नान् भिन्नश्चेतोविकारान्।

---

१ 'मूर्तिमतीव लक्ष्मीर्मालवेशकन्यकास्ते। सैवाराध्यमानं' व.

'ललनाजनं सृजता विधात्रा नूनमेषा घुणाक्षरन्यायेन निर्मिता। नो चेदब्जभूरेवंविधनिर्माणनिपुणो यदि स्यात्तर्हि तत्समानलावण्यामन्यां तरुणीं किं न करोति' इति सविस्मयानुरागं विलोकयतस्तस्य समक्षं स्थातुं लज्जिता सती किंचित्सखीजनान्तरितगात्रा तन्नयनाभिमुखैः किंचिदाकुञ्चितै रेचितैर्भ्रूलतैरपाङ्गवीक्षितैरात्मनः कुरङ्गस्यानायमानलावण्यं राजवाहनं विलोकयन्त्यतिष्ठत्। सोऽपि तस्यास्तदोत्पादितभावरसानां सामग्र्या लब्धबलस्येव विषमशरस्य शरव्यायमाणमानसो बभूव।

'निर्विकारात्मके चित्ते भावः प्रथमविक्रिया' इति विश्वनाथः। व्यधत्ताकरोत्। ललनाजनं प्रमदामुखं सृजतोत्पादयता विधात्रा ब्रह्मणा नूनमसंशयमेषा पुरोवर्तिनी। घुणाक्षरन्यायेन यथा काष्ठवेधको घुणसंज्ञकः कृमिः स्वकर्मासक्तो यदृच्छयाऽक्षरमपि लिखति तद्वत् इयमपि वराङ्गी सृष्टिनिर्माणकाले ब्रह्मणो हस्ताज्जाता। न तन्निर्माणनैपुण्यं ब्रह्मणो वेदाभ्यासजडमतेरिति भावः। कुतो न तस्यैतन्निर्माणकारणत्वं तदाह। नो चेदिति। नो चेदन्यथा अब्जभूर्ब्रह्मा। एवंविधमीदृक् निर्माणमुत्पादनं तत्र निपुणः कुशलो यदि स्यात्तर्हि। तयाऽवन्तिसुन्दर्या समानं सदृशं लावण्यं कान्तिर्यस्यास्तामन्यां भिन्नां तरुणीं युवतीं किं न करोति कुतो न विधत्ते। ब्रह्मणोऽन्याकरणत्वरूपहेतुना तस्य प्रथमकृतिर्न हेतुपूर्वाऽपि तु काकतालीयेत्यवधेयमिति दिक्। विस्मयेनापूर्वरूपदर्शनजेनाश्चर्येणानुरागेण प्रेम्णा च सहितं यथा तथा विलोकयतः पश्यतस्तस्य राजवाहनस्य समक्षमग्रे स्थातुं लज्जिता व्रीडायुता अत एव किंचिदीषत्सखीजनेसहचरीसमूहेऽन्तरितान्यावृतानि गात्राण्यवयवा यया सा। तस्य नयनयोर्नेत्रयोरभिमुखैः संमुखैः किंचिदाकुञ्चितैरीषद्वक्रीकृतै रेचितोपरि चालिता भ्रूलता भ्रुकुटिर्येषु तैरपाङ्गवीक्षितैः कटाक्षावलोकनैः। आत्मनः कुरङ्गस्य मृगभावापन्नस्य स्वस्येत्यर्थः। राजवाहने जालत्वमानेतुं स्वस्मिन्कुरङ्गत्वम्। आनायमानं जालमिवाचरल्लावण्यं कान्तिर्यस्य तम्। 'जालमानाय' इति घञ्। यथा कुरङ्गो जालं त्यक्तुमक्षमस्तथा तत्तुल्येयं जालरूपिणं राजवाहनमिति भावः। सोऽपि राजवाहनोऽपि तस्या अवन्तिसुन्दर्यास्तदा तद्दर्शनवेलायामुत्पादितानां प्रकटितानां भावानां प्रथमदर्शनजविकाराणां रसस्य शृङ्गारस्य च सामग्र्या साहित्येन लब्धं प्राप्तं बलं सामर्थ्यं येन तस्येव। आदावेव दुर्निवारो मन्मथो विशेषतश्च लब्धसामग्रीक इति भावः। विषमाः कठोराः शरा बाणा यस्य तस्य मदनस्य शरव्यायमाणं लक्ष्यीभवन्मानसं मनो यस्य तथाभूतो बभूव जातः। शरव्यात्क्यङि शानच्।

---

१ 'अञ्चित' ख.

26 सा मनसेत्थमचिन्तयत्— 'अनन्यसाधारणसौन्दर्येणानेन कस्यां पुरि भाग्यवतीनां तरुणीनां लोचनोत्सवः क्रियते। पुत्ररत्नेनामुना पुरंध्रीणां पुत्रवतीनां सीमन्तिनीनां का नाम सीमन्तमौक्तिकीक्रियते। कास्य देवी। किमत्रागमनकारणमस्य। मन्मथो मामपहसितनिजलावण्यमेनं विलोकयन्तीमसूययेवातिमात्रं मथ्नन्निजनाम सान्वयं करोति। किं करोमि। कथमयं ज्ञातव्यः' इति। ततो बालचन्द्रिका तयोरन्तरङ्गवृत्तिं भावविवेकैर्ज्ञात्वा कान्तासमाजसंनिधौ राजनन्दनोदन्तस्य सम्यगाख्यानमनुचितमिति लोकसाधारणैर्वाक्यैरभाषत—'भर्तृदारिके, अयं सकलकला-

---

सेति। इत्थं वक्ष्यमाणप्रकारेण। अन्यस्य साधारणं सामान्यं न तदनन्यसाधारणं तथाभूतं सौन्दर्यं यस्य तेनानेन पुरोवर्तमानेन राजवाहनेन। कस्यां पुरि कस्मिन्नगरे। अनेन तन्निवासस्थानापृच्छा। भाग्यवतीनां दैवशालिनीनां तरुणीनां युवतीनां लोचनोत्सवो नेत्रानन्दः। असाधारणरूपद्रष्टृत्वमेव भाग्यवत्त्वम्। पुत्ररत्नेन पुत्रश्रेष्ठेन। रत्नशब्दार्थः पूर्वमुक्त एव। पुरन्ध्रीणां कुटुम्बिनीनां पुत्रवतीनां तनययुक्तानां सीमन्तिनीनां वधूनां का नाम सीमन्तमौक्तिकीक्रियते। यथा सीमन्तस्थं केशपाशस्थं मौक्तिकं शिरसि धार्यते तद्वत्सकलाभिः स्त्रीभिः का शिरसि धार्यते सकलासु का श्रेष्ठेति तात्पर्यार्थः। कास्य देवीत्यनेनानेन परिणीतं नवेत्याशङ्का। अत्रोद्याने आगमनस्य कारणं हेतुः किं को वेत्यर्थः। मन्मथो मदनः अपहसितं तिरस्कृतं निजलावण्यं स्वकान्तिर्येन तमेनं राजवाहनं विलोकयन्तीं पश्यन्तीं मामसूययेवाक्षमयेवातिमात्रमतिशयं मथ्नन् विलोडयन् निजनाम स्वीयं मन्मथेत्यभिधानं सान्वयमन्वर्थं करोति। मननं मत् चेतना। संपदादित्वात्क्विप्। मथ्नातीति मथः पचादित्वादच्। मतश्चेतनाया मथो मन्मथः। एनं पश्यन्त्या मे चेतनामेव प्रमथ्य स्वाभिधानस्यार्थं सफलं करोतीत्यर्थः। कथं केन प्रकारेण। अयं पुरोदृश्यमानो ज्ञातव्योऽधिगन्तव्यः। कया युक्त्या मदीयाः सर्वा आकाङ्क्षाः पूर्येरन्निति भावः। तत इति। तयो राजकन्यकाराजवाहनयोरन्तरङ्गस्य मनसो वृत्तिं भावविवेकैः प्रथमदर्शनजविकारैर्ज्ञात्वाऽन्योन्यानुरागं ज्ञात्वेत्यर्थः। कान्तासमाजस्य युवतिसमूहस्य संनिधौ समीपे राजनन्दनो राजहंसस्य पुत्रो राजवाहनस्तस्योदन्तस्य वृत्तान्तस्य सम्यगाख्यानं समीचीनतया कथनमनुचितमयोग्यम्। एतेन तदानीं स्त्रीणां पुरतः कथिता वार्ता तूर्णं बहुलीभवतीति प्रवादोऽद्यतन इवासीदिति ज्ञायते। इति हेतोः लोकसाधारणैः सर्वसामान्यैर्वाक्यैरभाषतोक्तवती। येन तस्य तथ्येन ज्ञानं न भवेदिति भावः। भर्तृदारिके राजपुत्रि। 'राजा भट्टारको देवस्तत्सुता भर्तृदारिका' इत्यमरः। सकलासु कलासु प्रवीणः कुशलः देवतायाः सांनिध्यं क्रियतेऽनेन तथाभूतो

---

१ 'इतरेतररागवृत्तिम्' ब.

प्रवीणो देवतासांनिध्यकरण आहवनिपुणो भूसुरकुमारो मणिमन्त्रौषधिज्ञः परिचर्यार्हो भवत्या पूज्यताम्' इति। तदाकर्ण्य निजमनोरथमनुवदन्त्या बालचन्द्रिकया संतुष्टान्तरङ्गा तरङ्गावली मन्दानिलेनेव संकल्पजेनाकुलीकृता राजकन्या जितमारं कुमारं समुचितासनासीनं विधाय सखीहस्तेन शस्तेन गन्धकुसुमाक्षतघनसारताम्बूलादिनानाजातिवस्तुनिचयेन पूजां तस्मै कारयामास।

27 राजवाहनोऽप्येवमचिन्तयत्—'नूनमेषा पूर्वजन्मनि मे जाया यज्ञवती। नो चेदेतस्यामेवंविधोऽनुरागो मन्मनसि न जायेत। शापावसानसमये तपोनिधिदत्तं जातिस्मरत्वमावयोः समानमेव। तथापि कालजनितविशेषसूचकवाक्यैरस्या ज्ञानमुत्पादयिष्यामि'। तस्मिन्नेव समये कोऽपि मनोरमो राजहंसः केलीविधि-

---

जातेशसाक्षात्कार इत्यर्थः। आवहे युद्धे निपुणः पटुः। भूसुरकुमारो ब्राह्मणपुत्रः। मणिरग्निदाहादिप्रतिबन्धको रत्नविशेषो मन्त्रो भूतपिशाचादिसाधनीभूत ओषधयश्च ता जानाति सः। परिचर्यायाः पूजाया अर्हो योग्यो भवत्या त्वया पूज्यतां सत्क्रियतामिति। तत् बालचन्द्रिकाया भाषितमाकर्ण्य श्रुत्वा निजमनोरथमनुवदन्त्या स्वाभीष्टतुल्यं कथयन्त्या बालचन्द्रिकया हेतुभूतया संतुष्टो मुदितोऽन्तरङ्गो मानसं यस्याः सा। मन्दानिलेन मन्देन वायुना तरङ्गावलीव नदीव। तरङ्गाणामवल्यो यस्यामिति बहुव्रीहिः। संकल्पजेन कामेनाकुलीकृता पीडिता राजकन्यावन्तिसुन्दरी। जितो मारो मदनो येन तं कुमारं राजवाहनं समुचिते योग्य आसने पीठ आसीनमुपविष्टं विधाय कृत्वा। शस्तेन प्रशस्तेन। 'शस्तं क्षेमे प्रशस्ते च' ति हैमः। पूजनयोग्येनेत्यर्थः। गन्धं चन्दनं कुसुमानि पुष्पाणि अक्षता लाजा घनसारः कर्पूरः ताम्बूलश्चादयो येषां तेषां नानाविधानामनेकप्रकाराणां वस्तूनां पदार्थानां निचयेन समूहेन। सखीहस्तेनेत्यनेनात्मनो लज्जाक्रान्त्याऽसामर्थ्यं द्योत्यते तस्मै राजवाहनाय कारयामासार्पयामास। कारयतेरर्पणार्थकतया तस्य संप्रदानत्वम्।

राजवाहनेति। एवमग्र उक्तप्रकारेण। नूनमसंशयमेषाऽवन्तिसुन्दरी। पूर्वजन्मनि गतजन्मनि जाया भार्या यज्ञवतीति तदानींतनं नाम। नो चेदन्यथैतस्यां राजकन्यायामेवंविध ईदृगनुरागः प्रेमा। संबन्धाभावेऽकारणं तस्यां मे मनो न सज्जेतेति भावः। शापस्यावसानोऽन्तस्तस्य समये काले तपोनिधिना मुनिना दत्तमनुज्ञातमावयोस्तस्या मम च जातिस्मरत्वं पूर्वजातिस्मरणं समानमेव सदृशमेव। कालजनितस्तत्कालोत्पन्नो विशेषस्तस्य सूचकैर्ज्ञापकैर्वाक्यैः। ज्ञानं पूर्वस्मरणरूपमुत्पादयिष्यामि जनयिष्यामि। तस्मिन्निति। मनोरमो मनोहरः। केलीविधिस्तया क्रीडाकरणेच्छया। तदुपकण्ठं तस्याः

त्सया तदुपकण्ठमगमत् । समुत्सुकया राजकन्यया मरालग्रहणे नियुक्तां बालचन्द्रिकामवलोक्य 'समुचितो वाक्यावसरः' इति संभाषणनिपुणो राजवाहनः सलीलमलपत्—'सखि, पुरा शाम्बो नाम कश्चिन्महीवल्लभो मनोवल्लभया सह विहारवाञ्छया कमलाकरमवाप्य तत्र कोकनदकदम्बसमीपे निद्राधीनमानसं राजहंसं शनैर्गृहीत्वा बिसगुणेन तस्य चरणयुगलं निगडयित्वा कान्तामुखं सानुरागं विलोकयन्मन्दस्मितविकसितैककपोलमण्डलस्तामभाषत— 'इन्दुमुखि, मया बद्धो मरालः शान्तो मुनिवदास्ते । स्वेच्छयानेन गम्यताम्' इति । सोऽपि राजहंसः शाम्बमशपत्— 'महीपाल, यदस्मिन्नम्बुजखण्डेऽनुष्ठानपरायणतया परमानन्देन तिष्ठन्तं नैष्ठिकं मामकारणं राज्यगर्वेणावमानितवानसि तदेतत्पाप्मना रमणीविरहसंतापमनुभव' इति । विषण्णवदनः शाम्बो जीवितेश्वरीविरहमसहिष्णुर्भूमौ दण्डव-

---

समीपम् । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । समुत्सुकया तद्ग्रहणे जातोत्कण्ठया । मरालग्रहणे हंसग्रहणे नियुक्तामाज्ञापिताम् । समुचितो योग्यो वाक्यस्य वचनस्यावसरः कालः इति ज्ञात्वेत्यर्थः । संभाषणे निपुणः कुशलः । सलीलं सहेलमलपदभाषत । लप व्यक्तायां वाचि । सखीत्यामन्त्रणेन पूर्वसंबन्धोऽवगमितः । पुरा प्राग् । महीवल्लभो राजा । मनोवल्लभया स्वप्रेयस्या सह विहारवाञ्छया क्रीडेच्छया कमलाकरं सरोवरमवाप्य प्राप्यागत्येत्यर्थः । तत्र तस्मिन्सरसि कोकनदकदम्बस्य रक्तोत्पलसमूहस्य समीपे संनिधौ निद्राया अधीनं मानसं यस्य तं राजहंसं पक्षिविशेषं शनैस्तन्निद्रानाशो यथा न भवेत्तथेत्यर्थः । गृहीत्वा धृत्वा बिसगुणेन मृणालतन्तूनां रज्ज्वा । चरणयुगलं पादद्वयं निगडयित्वा बद्ध्वा । सानुरागं भर्तृलीलावलोकनेन प्रेमयुतं कान्ताननं भार्यामुखं विलोकयन् पश्यन् । मन्दस्मितेनेषद्धास्येन विकसितं प्रफुल्लमेकं कपोलमण्डलं गण्डस्थलं यस्य सः । तां स्वप्रेयसीमभाषतोक्तवान् । इन्दुरिव चन्द्र इव मुखं यस्यास्तत्संबुद्धौ । मरालो हंसः शान्तः शमसंपन्नो मुनिवत् मुनिना तुल्यं यथा तथा । 'तेन तुल्यं क्रिया चेद्वतिः' इत्यनेन वतिः । अनेन राजहंसेन स्वेच्छया यथेष्टं गम्यतां तं गृहीत्वा गच्छ त्वं नायमितस्ततो गच्छेदपि तु त्वया सह क्रीडेदित्यर्थः । सोऽपि तेन गृहीतः राजहंसः शाम्बं तन्नामकं राजानमशपत् शप्तवान् । अम्बुजखण्डे कमलसमूहेऽनुष्ठानं कर्माचरणं तस्य परायणतया समासक्त्या परमानन्देनातिसुखेन तिष्ठन्तं वर्तमानं नैष्ठिकं निष्ठा आबाल्याद्ब्रह्मचर्ये स्थितिस्तां चरति स नैष्ठिकस्तम् । 'चरति' अनेन ठक् । अकारणं कारणं विना । राज्यस्य गर्वेणाभिमानेन धनोन्मादेनेति यावत् । अवमानितवान् अपमानितमकरोः । तत् तस्मादेतत्पाप्मनाऽनेन पातकेन रमण्या विरहो भार्याया वियोगस्तस्य संतापं दुःखमनुभव लभस्व । विषण्णं खिन्नं वदनं

प्रणम्य सविनयमभाषत—'महाभाग, यदज्ञानेनाकरवं तत्क्षमस्व' इति। स तापसः करुणाकृष्टचेतास्तमवदत्—'राजन्, इह जन्मनि भवतः शापफलाभावो भवतु। मद्वचनस्यामोघतया भाविनि जनने शरीरान्तरं गताया अस्याः सरसिजाक्ष्या रसेन रमणो भूत्वा मुहूर्तद्वयं मच्चरणयुगलबन्धकारितया मासद्वयं शृङ्खलानिगलितचरणो रमणीवियोगविषादमनुभूय पश्चादनेककालं वल्लभया सह राज्यसुखं लभस्व' इति। तदनु जातिस्मरत्वमपि तयोरन्वगृह्णात्। 'तस्मान्मरालबन्धनं न करणीयं त्वया' इति। सापि भर्तृदारिका तद्वचनाकर्णनाभिज्ञातस्वपुरातनजननवृत्तान्ता 'नूनमयं मत्प्राणवल्लभः' इति मनसि जानन्ती रागपल्लवितमानसा समन्दहासमवोचत्—'सौम्य, पुरा शाम्बो यज्ञवतीसंदेशपरिपालनाय तथाविधं हंसबन्धनमकार्षीत्। तथा हि लोके पण्डिता अपि दाक्षिण्येनाकार्यं कुर्वन्ति' इति

मुखं यस्य सः। जीवितेश्वरी प्राणस्वामिनी स्वप्रेयसी तस्या विरहमसहिष्णुर्वियोगसहनेऽसमर्थः। दण्डवद्दण्डेन तुल्यं प्रणम्य नमस्कृत्य सविनयं नम्रतयाऽभाषतावदत्। अज्ञानेन ज्ञानाभावादकरवं त्वं मुनिरसीत्यजानन् यत् कृतवान् तत् क्षमस्व सहस्व। स तापसो मुनिः करुणया दययाकृष्टं चेतो मानसं यस्य सः। इह जन्मन्यस्मिन् शाम्बदेहे भवतस्ते शापफलस्य भार्यावियोगरूपस्याभावो भवतु। मम वचनस्यामोघतया अनिष्फलतया भाविनि अग्रिमे जनने जन्मनि शरीरान्तरं भिन्नं देहं गताया अस्याः पुरोवर्तिन्याः सरसिजमिवाक्षिणी नेत्रे यस्यास्तस्या रसेन प्रेम्णा रमणो वल्लभो भूत्वा। मुहूर्तद्वयं स्वल्पकालम्। अत्यन्तसंयोगे द्वितीया। मम चरणयोर्युगलं द्वयं तस्य बन्धकारिता बन्धकर्तृत्वं तया हेतुभूतया। मासद्वयं षष्टिदिवसपर्यन्तं शृङ्खलया लोहनिर्मितरज्ज्वा निगलितौ बद्धौ चरणौ यस्य तथाभूतः। रमण्या वियोगस्य विषादं दुःखमनुभूयोपभुज्य। पश्चादनन्तरमनेककालं चिरं वल्लभया प्रेयस्या सह राज्यसुखं राज्यजनितमानन्दं लभस्वाप्नुहि। तदनु तथाभाषणानन्तरं जातिस्मरत्वं पूर्वजन्मस्मरणवत्त्वं तयोः शाम्बस्य तद्भार्यायाश्च। तस्मान्मरालबन्धने बहूनां दोषाणां विद्यमानत्वान्मरालबन्धनस्य शापजनकत्वाद्वा। मरालबन्धनं हंसग्रहणं न करणीयं न कार्यम्। भर्तृदारिका राजसुता। तस्य वचनानां भाषितानामाकर्णनेन श्रवणेनाभिज्ञातः स्मृतः स्वस्य पुरातनः पूर्वकालिको वृत्तान्तो यया सा। नूनमसंशयमयं पुरो दृश्यमानः। मम प्राणानां वल्लभः प्रियः। रागेण प्रेम्णा पल्लवितं संजातपल्लवं पूर्णमिति यावन्मानसं यस्याः सा। मन्दहासेन सहितं यथा तथा। यज्ञवत्यास्तत्संज्ञिकायाः स्वभार्यायाः संदेशपरिपालनाय तदुक्तमनुष्ठातुमित्यर्थः। तथाविधं तादृक् हंसबन्धनं हंसग्रहणमकार्षीत् कृतवान्। करोतेर्लुङ्। लोकेऽस्मिञ्जगति पण्डिता अपि

कन्याकुमाराविवमन्योन्यपुरातनजननामधेये परिचिते परस्परज्ञानाय साभिज्ञमुक्त्वा मनोजरागपूर्णमानसौ बभूवतुः।

28 तस्मिन्नवसरे मालवेन्द्रमहिषी परिजनपरिवृता दुहितृकेलीविलोकनाय तं देशमवाप। बालचन्द्रिका तु तां दूरतो विलोक्य ससंभ्रमं रहस्यनिर्भेदभिया हस्तसंज्ञया पुष्पोद्भवसेव्यमानं राजवाहनं वृक्षवाटिकान्तरितगात्रमकरोत्। सा मानसारमहिषी सखीसमेतायाः दुहितुर्नानाविधां विहारलीलामनुभवन्ती क्षणं स्थित्वा दुहित्रा समेता निजागारगमनायोद्युक्ता बभूव। मातरमनुगच्छन्त्यवन्तिसुन्दरी 'राजहंसकुलतिलक, विहारवाञ्छया केलीवने मदन्तिकमागतं भवन्तमकाण्ड एव विसृज्य मया समुचितमिति जनन्यनुगमनं क्रियते। तदनेन भवन्मनोरागोऽन्यथा

कार्याकार्यविचारवन्तोऽपि। दाक्षिण्येन परच्छन्दानुरोधतः। अकार्यमसत्कृत्यं कुर्वन्त्याचरन्ति। एवमनया रीत्या। परिचिते ज्ञाते अन्योन्यस्य परस्परस्य पुरातनं प्राग्भवं जननमुत्पत्तिर्नामधेयमभिधानं च परस्परस्य ज्ञानाय साभिज्ञं प्रत्यभिज्ञानं यथा भवेत्तथा। मनोजो मदनो रागः प्रेमा च ताभ्यां पूर्णं मानसं ययोस्तौ। स्वस्वरूपज्ञानादुत्पन्नमदनपीडौ प्रेमयुक्तौ च बभूवतुरित्यर्थः।

तस्मिन्निति। अवसरे काले। मालवेन्द्रस्य मानसारस्य महिषी पट्टाभिषिक्ता राज्ञी परिजनैः सेवकैः परिवृता वेष्टिता दुहितुः कन्यायाः केलीविलोकनं क्रीडानिरीक्षणं तस्मै तं देशं यत्र सा स्थिता तं प्रदेशमवापाजगाम। तां सखीमातरम्। ससंभ्रमं सत्वरं रहस्यमुभयोरनुरागरूपं गोप्यं तस्य निर्भेदः प्रकटनं तस्य भिया भीत्या हस्तसंज्ञया करसंकेतेन पुष्पोद्भवेन स्वप्रेयसा सेव्यमानं परिचर्यमाणं वृक्षाणां वाटिका गृहोद्यानं तयाऽन्तरितमाच्छादितं गात्रं शरीरं यस्य तथाभूतमकरोत्कृतवती। 'वाटी वास्तौ गृहोद्यानकट्योः' इति हैमः। सेति। सा पूर्वोक्ता तत्रागता मानसारस्य महिषी पट्टाभिषिक्ता राज्ञी सखीभिः सहचरीभिः समेतया युक्तया दुहितुः कन्यकाया नानाविधां नैकप्रकारां विहारलीलां क्रीडासौख्यमनुभवन्ती क्षणं मुहूर्तं। दुहित्रा समेता कन्यकया सह निजागारगमनाय स्वगृहं गन्तुमुद्युक्तोद्यता। मातरमिति। राजहंसस्य पक्षिविशेषस्य तत्संज्ञकनृपस्य च कुलतिलक वंशस्य भूषणभूत। विहारवाञ्छया क्रीडेच्छया केलीवने क्रीडोद्याने ममान्तिकं समीपमागतं प्राप्तं भवन्तं त्वामकाण्डेऽनवसर एव विसृज्य त्यक्त्वा। समुचितमिति योग्यमिति। क्रीडादिकं परित्यज्यापि बालैः पितृवचोऽनुरोद्धव्या इति सर्वसंमतत्वादिति भावः। जनन्यनुगमनं मात्रनुसरणम्। तत्तस्माद्भवतो मनोरागः प्रेमान्यथा विपरीतं मा भूत्त्वं मय्यकारणमियं परित्यज्य गतेति क्रुद्धो मा भूरिति भावः। शाकुन्तलेऽपि गौतम्या सह गच्छन्त्या शकुन्तलया

मा भूत्' इति मरालमिव कुमारमुद्दिश्य समुचितालापकलापं वदन्ती पुनः पुनः परिवृत्तदीननयना वदनं विलोकयन्ती निजमन्दिरमगात्। तत्र हृदयवल्लभकथाप्रसङ्गे बालचन्द्रिकाकथिततदन्वयनामधेया मन्मथबाणपतनव्याकुलमानसा विरहवेदनया दिनेदिने बहुलपक्षशशिकलेव क्षामक्षामाहारादिसकलं व्यापारं परिहृत्य रहस्यमन्दिरे मलयजरसक्षालितपल्लवकुसुमकल्पिततल्पतलावर्तिततनुलता बभूव। तत्र तथाविधावस्थामनुभवन्तीं मन्मथानलसंतप्तां सुकुमारीं कुमारीं निरीक्ष्य खिन्नो वयस्यागणः काञ्चनकलशसंचितानि हरिचन्दनोशीरघनसारामिलितानि तदभिषेकक-

'लतावलय सन्तापहारक। आमन्त्रये त्वां भूयोऽप्युपभोगाये' ति दुष्यन्त उक्तः। मरालमिव हंसमिव कुमारं राजवाहनमुद्दिश्य लक्ष्यीकृत्य। समुचिता योग्या आलापा भाषणानि तेषां कलापं समूहं वदन्ती। अनेन स्वमनसोऽव्यग्रता जनन्यग्रे तया स्पष्टीकृतेति ज्ञायते। पुनः पुनर्वारं वारं परिवृत्ते पश्चाद्वलिते दीने मद्वियोगाद्दुःखिते नयने यस्याः सा वदनं वृक्षान्तरितस्य ममेति शेषः। विलोकयन्ती पश्यन्ती निजमन्दिरं स्वगृहमगादगमत्। तत्र स्वमन्दिरे हृदयस्य वल्लभः प्रियस्तस्य कथाप्रसङ्गे गोष्ठीप्रस्तावे। अनेन गुणकथनरूपिणी चतुर्थी कामदशा। बालचन्द्रिकया कथिते उक्ते तस्य राजवाहनस्यान्वयो वंशो नामधेयमभिधानं च यस्यै सा। मन्मथस्य मदनस्य बाणपतनेन शरप्रहारेण व्याकुलं पीडितं मानसं मनो यस्याः सा। अनेनोद्वेगरूपिणी पञ्चमी कामदशा। विरहस्य प्रियवियोगस्य वेदनया दुःखेन दिने दिने प्रतिदिवसं वीप्सायां द्विरुक्तिः। बहुलपक्षस्य कृष्णपक्षस्य शशिकलेव चन्द्रकलेव। क्षामक्षामाऽतिकृशा प्रतिदिनमधिकां कृशतामापन्नेत्यर्थः। आहारो भोजनमादिः प्रमुखं यस्मिन् स चासौ सकलः संपूर्णस्तं व्यापारमवश्यकरणीयमुद्यमं परिहृत्य त्यक्त्वा। रहस्यमन्दिर एकान्तागारे मलयजरसः चन्दनपङ्कस्तेन क्षालितैर्धौतैः पल्लवैः पर्णैः कुसुमैः पुष्पैः कल्पितं कृतं यत्तल्पं शय्या तस्य तले पृष्ठे आवर्तिता विवर्तिता लुण्ठन्तीति यावत्तनुलता देहयष्टिर्यस्याः सा। तल्पतलायत्तेति पाठे तल्पतल आयत्ताऽऽधीना स्थिता तनुलता यस्या इत्यर्थः। अनेन पञ्चम्याः पूर्णतेत्यवगम्यते। तदुक्तं 'यस्मिन्रम्यमरम्यं वा न च हर्षाय जायते। प्रद्वेषः प्राणितव्येऽपि स उद्वेगोऽभिधीयते' इति। तत्र शय्यायां तथाविधां तादृशीमवस्थां दशामनुभवन्तीं मन्मथानिलेन मदनाग्निना संतप्तां पीडितां सुकुमारीं कोमलां 'सुकुमारो मृदौ त्रिषु' इति मेदिनी। कुमारीं बालां निरीक्ष्य दृष्ट्वा खिन्नस्तद्दुःखेन दुःखितो वयस्यागणः सहचरीसमूहः। काञ्चनस्य सुवर्णस्य कलशेषु घटेषु संचितानि संगृहीतानि हरिचन्दनं चन्दनविशेष उशीरो वीरणमूलं घनसारः कर्पूरस्तैर्मिलितानि मिश्राणि तस्या अभिषेकाय स्नानाय कल्पितान्या-

१ 'तलायत्त' क-ख,

लिप्तानि सलिलानि बिसतन्तुमयानि वासांसि च नलिनीदलमयानि तालवृन्तानि च संतापहरणानि बहूनि संपाद्य तस्याः शरीरमशिशिरयत्। तदपि शीतलोपचरणं सलिलमिव तप्ततैले तदङ्गे दहनमेव समन्तादाविश्चकार। किंकर्तव्यतामूढां विषण्णां बालचन्द्रिकामीषदुन्मीलितेन कटाक्षवीक्षितेन बाष्पकणाकुलेन विलोक्य विरहानलोष्णनिःश्वासग्लपिताधरया नताङ्ग्या शनैः सगद्गदं व्यलापि— 'प्रियसखि, कामः कुसुमायुधः पञ्चबाण इति नूनमसत्यमुच्यते। इयमहमयोमयैरसंख्यैरिषुभिरनेन हन्ये। सखि, चन्द्रमसं वडवानलादतितापकरं मन्ये। यदस्मिन्नन्तः प्रविशति शुष्यति पारावारः, सति निर्गते तदैव वर्धते। दोषाकरस्य दुष्कर्म किं वर्ण्यते मया।

हृतानि सलिलान्युदकानि बिसतन्तुमयानि कमलनालररागकृतानि वासांसि वस्त्राणि नलिनीदलमयानि कमलिनीपर्णकृतानि तालवृन्तानि व्यजनानि संतापस्य पीडाया हरणानि दूरीकरणानि। शरीरं देहमशिशिरयच्छीतलमकरोत्। शिशिरात्तत्करोति तदाचष्ट इत्यनेन करोत्यर्थे णिच्। तदप्युपर्युक्तमपि शीतलोपचरणं शीतोपचारः तप्ततैले तप्तस्नेहे सलिलमिवोदकमिव तदङ्गे तच्छरीरे दहनमेव वन्हिमेव समन्तात् सर्वत आविश्चकार जनयामास। यथा तप्ततैले जलनिक्षेपो वन्हिं जनयति तद्वत्तप्ते तस्या देहे शीतलोदकविन्यासः पीडाधिक्यायैवाभवदित्यर्थः। किंकर्तव्यतामूढां कर्तव्यमजानतीं विषण्णां खिन्नां बालचन्द्रिकां स्वसखीमीषदुन्मीलितेन किंचिद्विवृतेन कटाक्षवीक्षितेन नेत्रापाङ्गावलोकनेन बाष्पकणैर्नेत्रोदकबिन्दुभिराकुलेन व्याप्तेन विलोक्य दृष्ट्वा। विरहानलस्योष्णैर्निश्वासैः ग्लपितो विवर्णतां गतः शुष्क इति यावदधरोऽधरोष्ठो यस्यास्तया। नतानि नम्राण्यङ्गान्यवयवा यस्याः सा। शनैर्मन्दमनेन स्वरोच्चारणेऽसामर्थ्यं द्योत्यते। सगद्गदमस्फुटं यथा तथा। व्यलापि लपतेः कर्मणि लुङ्। प्रियसखीत्यामन्त्रणेन स्वरहस्यकथनयोग्यता तस्या व्यज्यते। कामो मदनः कुसुमान्यायुधं यस्य तथाभूतः पञ्च बाणाः यस्य स इत्यसत्यमनृतमुच्यते कथ्यते। अयोमयैर्लोहनिर्मितैरनेन कुसुमायुधत्वनिरासः। असंख्यैः संख्यातिगैः। अनेन पञ्चसंख्याव्युदासः। हन्ये ताड्ये। इत्थमेव वक्ति दुष्यन्तः 'तव कुसुमशरत्वं शीतरश्मित्वमिन्दोर्द्वयमिदमयथार्थं दृश्यते मद्विधेषु। विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैस्त्वमपि कुसुमबाणान् वज्रसारीकरोषि' इति। चन्द्रमसं चन्द्रं वडवानलात्सागरस्थिताद्वन्हेः। अतितापकरमत्यन्तं पीडादायकं मन्ये तर्कयामि। अस्मिंश्चन्द्रेऽन्तः प्रविशति समुद्रमध्यं गच्छत्यर्थादस्तं याति सति पारावारः समुद्रः शुष्यति शुष्को भवति निर्गते सति उद्यते सति तदैवोदयानन्तरमेव वर्धते। दोषा रात्रिस्तस्याः करश्चन्द्रः पक्षे दोषाणां दूषणानामाकरः खनिः। 'दोषः स्याद्दूषणे पापे दोषा रात्रौ' इति मेदिनी। दुष्कर्म दुष्कृत्यं किं वर्ण्यते कथं कथ्यते। निजसोदर्याः स्वभगिन्याः पद्मालयाया लक्ष्म्य

१ 'वाडवानलात्' ब.-न.

मदनेन निजसोदर्याः पद्मालयाया गेहभूतमपि कमलं विहन्यते। विरहानलसंतप्तहृदयस्पर्शेन नूनमुष्णीकृतः स्वल्पीभवति मलयानिलः। नवपल्लवकल्पितं तल्पमिदमनङ्गाग्निशिखापटलमिव संतापं तनोस्तनोति। हरिचन्दनमपि पुरा निजयष्टिसंश्लेषवदुरगरदनलिप्तोल्बणगरलसंकलितमिव तापयति शरीरम्। तस्मादलमलमायासेन शीतलोपचारे। लावण्यजितमारो राजकुमार एवागदंकारो मन्मथज्वरापहरणे। सोऽपि लब्धुमशक्यो मया। किं करोमि' इति। बालचन्द्रिका मनोजज्वरावस्थापरमकाष्ठां गतां कोमलाङ्गीं तां राजवाहनलावण्याधीनमानसामनन्यशरणामवेक्ष्यात्मन्यचिन्तयत्—'कुमारः सत्वरमानेतव्यो मया। नो चेदेनां स्मरणीयां गतिं ने-

---

गेहभूतमपि गृहभूतमपि कमलं विहन्यते संकोच्यते। रात्रौ पद्मानि संकुचन्ति तदनुरोधत इयमुक्तिः। स्वभगिन्या गृहध्वंसक इति दोषश्च तस्मिन्। विरहानलो वियोगवह्निस्तेन संतप्तं यद्धृदयं मानसं तस्य स्पर्शेन नूनमसंशयमुष्णीकृत उष्णतामापादितो मलयमारुतो वासन्तानिलः स्वल्पीभवति। अत्र स्वाभाविकं वसन्तानिलस्य मन्दत्वं तप्तहृदयस्पर्शेन परिकल्पितमिति हेतूत्प्रेक्षा। तप्तस्पर्शाच्च पदार्थोऽल्पो भवति। नवैर्नूतनैः पल्लवैः कल्पितं कृतं तल्पं शय्या। नवविशेषणं पल्लवानां सरसतां द्योतयत्तेषां शीतोत्पादनसामर्थ्याधिक्यं प्रकटयति। अनङ्गाग्नेर्मदनवन्हेः शिखापटलमिव ज्वालासमूहमिव तनोः शरीरस्य संतापं पीडां तनोति विस्तारयति। नवपल्लवानां ताम्रत्वाच्छिखासाम्यमापाद्यमानं सम्यग्भाति। हरिचन्दनं चन्दनविशेषः पुरा वृक्षावस्थायामिति यावत्। निजयष्टिः स्वदारु तस्याः संश्लेषवान् तस्मिन् दारुणि सुवासप्रीत्या समासक्त उरगः सर्पस्तस्य रदनैर्दन्तैर्लिप्तमुपदिग्धं यदुल्बणगरलं भयानकं विषं तेन संकलितमिव व्याप्तमिव शरीरं देहं तापयति पीडयति। अत्रापि हेतूत्प्रेक्षा। तस्माद्भवतीभिः कृतं सर्वमपि विपरीतं भवत्यतः शीतलोपचारे शीतोपचरणे आयसेन श्रमेणालं श्रमेण साध्यमिदं नास्तीत्यर्थः। लावण्येन सौन्दर्येण जितो मारो मदनो येन स राजकुमारो राजवाहन एवागदंकारो भिषक्। 'कारे सत्यागदस्य' इत्यनेन मुम्। मन्मथज्वरः कामज्वरस्तस्यापहरणे दूरीकरणे। सोऽपि राजवाहनोऽपि। अशक्यस्तस्य पितृवैरिपुत्रतया लाभाऽशक्य इति भावः। मनोजज्वरावस्थाया मदनतापस्य परमकाष्ठां चरमां दशां मृतिरूपां गतां गन्तुमारब्धाम्। 'आदिकर्मणि निष्ठा वक्तव्ये' त्यनेनादिकर्मणि क्तः। कोमलाङ्गीं मृदुशरीराम्। राजवाहनस्य लावण्ये कान्त्यामधीनं मानसं मनो यस्यास्तां नान्यो राजवाहनाद्भिन्नः शरणो रक्षको यस्यास्तामवेक्ष्य दृष्ट्वा। आत्मनि स्वगतमचिन्तयद्विचारमकरोत्। सत्वरं तूर्णमानेतव्य आनेयः। नो चेत्तदानयनाभावे स्मरणीयां गतिं मृतिमिति

ष्यति मीनकेतनः । तत्रोद्याने कुमारयोरन्योन्यावलोकनवेलायामसमसायकः समं मुक्तसायकोऽभूत् । तस्मात्कुमारानयनं सुकरम्' । ततोऽवन्तिसुन्दरीरक्षणाय समयोचितकरणीयचतुरं सखीगणं नियुज्य राजकुमारमन्दिरमवाप । पुष्पबाणबाणतूणीरायमाणमानसोऽनङ्गतप्तावयवसंपर्कपरिम्लानपल्लवशयनमधिष्ठितो राजवाहनः प्राणेश्वरीमुद्दिश्य सह पुष्पोद्भवेन संलपन्नागतां प्रियवयस्यामालोक्य पादमूलमन्वेषणीया लतेव बालचन्द्रिकागतेति संतुष्टमना निटिलतटमण्डनीभवदम्बुजकोरकाकृतिलसदञ्जलिपुटाम् 'इतो निषीद' इति निर्दिष्टसमुचितासनासीनामवन्तिसुन्दरीप्रेषितं सकर्पूरं ताम्बूलं विनयेन ददतीं तां कान्तावृत्तान्तमपृच्छत् । तया सविनयमभाणि— 'देव, क्रीडावने भवदवलोकनकालमारभ्य मन्मथमथ्यमाना पुष्पतल्पादिषु

यावत् । मीनकेतनो मदनः । अन्योन्यस्य परस्परस्यावलोकनमीक्षणं तस्य वेलायां कालेऽसमसायकः पञ्चबाणो मदन इति यावत् । सममेकदैव मुक्तास्त्यक्ताः सायका बाणा येन तथाभूतोऽभूत् । तस्मात्कुमारस्यापि पीडासत्वात् । कुमारस्यानयनं राजकन्यासमीपमित्यर्थः । सुकरं सुलभम् । तत इति । अवन्तिसुन्दर्याः रक्षणाय समये काल उचितं योग्यं यत्करणीयं विधेयं तत्र चतुरं कुशलं सखीगणं वयस्यासमूहं नियुज्य स्थापयित्वा राजकुमारस्य मन्दिरं गृहमवापागच्छत् । पुष्पबाणस्य मदनस्य बाणानां तूणीर इवाश्रय इवाचरन्मानसं यस्य सः सर्वेषां बाणानां प्रक्षेपात्तन्मानसं तूणीरमेवासीदिति कल्पना । अनङ्गेन मदनेन तप्तानां सर्वेषामवयवानां गात्राणां संपर्केण संबंधेन परिम्लानानि कान्तिहीनानि यानि पल्लवानि पर्णानि तेषां शयनं शय्यामधिष्ठितः । 'अधिशीङ्०' इत्यनेन कर्मत्वम् । प्राणेश्वरीमवन्तिसुन्दरीमुद्दिश्य लक्ष्यीकृत्य । संलपन् भाषमाणः । आगतां प्राप्तां प्रियवयस्यां प्रियसखीं स्वप्रियाया इति शेषः । अन्वेषणीया स्वप्राणत्राणोपयोगिन्योषधिरिति गवेषणीया लतेव या बालचन्द्रिका सा स्वयं पादमूलं स्वचरणसंनिधिमागतेति संतुष्टं मनो यस्य सः । यदर्थं महता प्रयासेन भाव्यं तदनायासेन स्वयमुपेतमिति तोषबीजम् । निटिलतटो भालप्रदेशस्तत्र मण्डनीभवन् भूषणमिव शोभमानोऽम्बुजकोरक इव कमलकुड्मल इवाकृतिराकारो यस्य तथाभूतः लसन् दीप्तिमान् अञ्जलिपुटो बद्धकरसंपुटो यस्यास्ताम् । निषीदोपविश । निर्दिष्टे प्रदर्शिते समुचिते योग्य आसने पीठ आसीनामुपविष्टाम् । अवन्तिसुन्दर्या प्रेषितं विसृष्टं कर्पूरेण सहितं ताम्बूलं विनयेन नम्रतया ददतीमर्पयन्तीम् कान्तावृत्तान्तं स्वप्रेयस्या वार्ताम् । कान्तवृत्तान्तमिति पाठे स्वनिर्गमानन्तरं जातां वार्तामित्यर्थः । देवेति श्रवणायाभिमुखीकरणम् । क्रीडावने विहा-

१ 'पादपमूलम्' ब–ब २ 'कान्तवृत्तान्तम्' ब.

तापशमनमलभमाना वामनेनेवोन्नततरुफलमलभ्यं त्वदुरःस्थलालिङ्गनसौख्यं स्मरान्धतया लिप्सुः सा स्वयमेव पत्रिकामालिख्य 'वल्लभायैनामर्पय' इति मां नियुक्तवती'। राजकुमारः पत्रिकां तामादाय पपाठ—

सुभग कुसुमसुकुमारं जगदनवद्यं विलोक्य ते रूपम्।
मम मानसमभिलषति त्वं चित्तं कुरु तथा मृदुलम्॥

इति पठित्वा सादरमभाषत—'सखि, छायावन्मामनुवर्तमानस्य पुष्पोद्भवस्य वल्लभा त्वमेव तस्या मृगीदृशो बहिश्चराः प्राणा इव वर्तसे। त्वच्चातुर्यमस्यां क्रियालतायामालवालमभूत्। तदखिलं करिष्यामि। नताङ्ग्या मन्मनःकाठिन्यमाख्या-

---

रोद्याने भवतोऽवलोकनमीक्षणं तस्य कालमारभ्य ततः प्रभृति। मन्मथेन कामेन मथ्यमाना पीड्यमाना पुष्पतल्पं पुष्पशय्या आदिर्येषु तेषु तापशमनं पीडाशान्तिमलभमानाऽनधिगच्छन्ती। वामनेनेव खर्वेणेवोन्नत उच्चो यस्तरुस्तस्य फलमलभ्यं दुष्प्राप्यं तवोरःस्थलं वक्षःस्थलं तस्यालिङ्गनस्य सौख्यं स्मरान्धतया मदनपीडिततया लिप्सुर्लब्धुमिच्छुः। इयं ह्युपमा कालिदासतो गृहीताऽनेनेति भाति। 'प्रांशुलभ्ये फले मोहादुद्बाहुरिव वामनः' इति रघुवंशे। सा राजकुमारी स्वयमेव स्वहस्तेनैव पत्रिकां पत्रम्। वल्लभाय भवते। अर्पय देहीति। नियुक्तवत्याज्ञापितवती। तां पत्रिकां बालचन्द्रिकया दत्तां पपाठावाचयत्। सुभगेति। सुष्ठु भगं दैवं सौन्दर्यमैश्वर्यं वा यस्य तत्संबुद्धौ। यं च कामिन्यः स्वयं कामयन्ते स एव दैवशाली सुरूपश्चातो युज्यत इदमामन्त्रणम्। कुसुममिव पुष्पमिव सुकुमारं कोमलं जगति भुवनेऽनवद्यं निर्दोषं ते तव रूपं सौन्दर्यं विलोक्य प्रेक्ष्य। 'अवद्यपण्ये॰' त्यनेन निपात्यते। मम मदीयं मानसं चित्तमभिलषति वाञ्छति तव सौन्दर्यं तदाधारं त्वां वेति शेषः। तथा रूपवत्त्वं चित्तं मनो मृदुलं मृदु कुरु। यथा ते रूपं मृदु प्रेक्ष्य मन्मनस्तत्र समासज्यति तथैव यदि स्वीयं मनस्त्वं विधास्यसि तर्हि तदपि मय्यासज्जेतेति भावः। सादरमादरेण सहितं यथा तथा। सखीत्यामन्त्रणेनात्मीयत्वं प्रदर्श्यते। छायावदनातपवन्मामनुवर्तमानस्य कदापि मामपरित्यजतः पुष्पोद्भवस्य मम प्रियवयस्यस्य वल्लभा प्रेयसी त्वमेव तस्या मृगीदृशोऽवन्तिसुन्दर्याः बहिश्चरन्ति ते प्राणा इव असव इव। ते तु प्राणापानादयोऽन्तःशरीरे वर्तन्ते त्वद्रूपास्तु बहिरितीयानेव भेद इत्यर्थः। तव चातुर्यं कौशलमस्यां क्रियालतायां त्वत्सखीप्राप्तिरूपक्रियायां तस्या मम च संमेलनरूपक्रियायां वा। चातुर्यस्यालवालत्वसिद्ध्यर्थं क्रियाया लतात्वारोपः। परम्परितं चेदं रूपकम्। आलवालम् 'अळें' इति महाराष्ट्रभाषायां प्रसिद्धम्। तत्तस्मात् त्वमेव सर्वस्यास्य मूलमतस्त्वन्मनोरथरूपमखिलं सर्वं करिष्याम्याचरिष्यामि। नताङ्ग्या सुन्दर्या मम मनसश्चित्तस्य काठिन्यं कठिनत्वमाख्यातं कथितं न साक्षादपि तु 'त्वं चित्तं रूपव-

---

१ 'त्वच्चित्तम्' ख.

तम् । यदा केलीवने रन्तुमनाः कुरङ्गलोचना लोचनपथमभ्यवर्तत तदैवापहृतमदीयमानसा सा स्वमन्दिरमगात् सा चेतसो माधुर्यकाठिन्ये स्वयमेव जानाति । दुष्करः कन्यान्तःपुरप्रवेशः । तदनुरूपमुपायमुपपाद्य श्वः परश्वो वा नताङ्गीं संगमिष्यामि । मदुदन्तमेवमाख्याय शिरीषकुसुमसुकुमाराया यथा शरीरबाधा न जायेत तथाविधमुपायमाचर ' इति । बालचन्द्रिकापि तस्य प्रेमगर्भितं वचनमाकर्ण्य संतुष्टा कन्यापुरमगच्छत् ।

29 राजवाहनोऽपि यत्र हृदयवल्लभावलोकनसुखमलभत तदुद्यानं विरहविनोदाय पुष्पोद्भवसमन्वितो जगाम । तत्र चकोरलोचनावचितपल्लवकुसुमनिकुरम्बं महीरुहसमूहं शरदिन्दुमुख्या मन्मथसमाराधनस्थानं च नताङ्गीपदाङ्कितचिह्नितं शीतलसैकततलं च सुदतीभुक्तमुक्तं माधवीलतामण्डपान्तरपल्लवतल्पं च विलोकयं-

न्मृदुलं कुरु ' इति भङ्ग्यन्तरेण । केलीवने क्रीडोद्याने कुरङ्गलोचना हरिणाक्षी लोचनपथं दृष्टिमार्गमभ्यवर्ततासीत्तदैव ततः प्रभृत्येव । अपहृतं चोरितं मदीयं मानसं यया सा स्वमन्दिरं स्वगृहमगादगच्छत् । सा प्रेयसी चेतसो मनसो माधुर्यकाठिन्ये मधुत्वकठोरत्वे स्वयमेव मनसस्तया सहैव विद्यमानत्वात्साऽऽत्मनैव जानाति । तया विना न कोपि ज्ञातुं समर्थ इति भावः । दुष्करो दुःसाध्यः कन्यान्तःपुरे राजकन्यानिवासगृहे प्रवेशः । तत्तस्मादनुरूपं योग्यमुपायं साधनमुपपाद्य कृत्वा श्व आगामिनि दिवसे परश्वस्ततः परस्मिन् दिवसे वा । संगमिष्यामि प्राप्स्यामि । अत्र संगच्छतेः सकर्मत्वादेव ' समो गम्यृच्छिभ्याम् ' इत्यनेन तङभावः । ममोदन्तं वार्तामेवमुपर्युक्तरीत्याऽऽख्याय कथयित्वा शिरीषकुसुममिवातिकोमलं पुष्पविशेषमिव सुकुमारायाः कोमलायाः । शरीरस्य बाधा पीडा । न जायेत न भवेत्तथाविधं तादृशमुपायमुपचारमाचर कुरु । अनेन तस्यां प्रेमातिशयो दर्शितः । प्रेमगर्भितं प्रीतियुक्तं वचनं भाषितमाकर्ण्य श्रुत्वा । संतुष्टा प्रमुदिता कन्यापुरं कन्यकान्तःपुरम् । राजवाहनेति । हृदयस्य वल्लभायाः प्रियाया अवलोकनस्येक्षणस्य सुखं सौख्यमलभत प्राप्तवांस्तदुद्यानं तदुपवनं विरहस्य वियोगस्य विनोदाय दूरीकरणाय पुष्पोद्भवेन स्वसुहृदा समन्वितो युक्तः । चकोराविव लोचने नयने यस्यास्तयाऽवचितः पल्लवानां पर्णानां कुसुमानां पुष्पाणां च निकुरम्बं समूहो यस्य तं महीरुहसमूहं वृक्षसंघम् । शरदिन्दुरिव शारदचन्द्र इव मुखं यस्यास्तस्याः मन्मथस्य मदनस्य समाराधनं पूजा तस्याः स्थानं स्थलम् । नताङ्ग्यः पदपङ्क्तिभिश्चरणराजिभिश्चिन्हितं लाञ्छितं शीतलं तत्पदचिन्हसत्वेन तापहरत्वाच्छीतं सैकततलं वालुका-

१ ' केलीवने कुरङ्गनयनालोचनपथमवर्तन् (? श्मवर्त) ' ब. ' केलीवने कुरङ्गलोचना लोचनपथमवर्तत ' म. ' केलीवने रन्तुमनाः '

ललनातिलकविलोकनवेलाजनितशेषाणि स्मारंस्मारं मन्दमारुतकम्पितानि नवचूतपल्लवानि मदनाग्निशिखा इव चकितो दर्शंदर्शं मनोजकर्णेजपानामिव कोकिलकीरमधुकराणां क्वणितानि श्रावंश्रावं मारविकारेण क्वचिदप्यवस्थातुमसहिष्णुः परिबभ्राम।

30 तस्मिन्नवसरे धरणीसुर एकः सूक्ष्मचित्रनिवसनः स्फुरन्मणिकुण्डलमण्डितो मुण्डितमस्तकमानवसमेतश्चतुरवेषमनोरमो यदृच्छया समागतः समन्ततोऽभ्युल्लसत्तेजोमण्डलं राजवाहनमाशीर्वादपूर्वकं ददर्श। राजा सादरम्। 'को भवान्, कस्यां विद्यायां निपुणः' इति तं पप्रच्छ। स च 'विद्येश्वरनामधेयोऽहमैन्द्रजालिकविद्याकोविदो विविधदेशेषु राजमनोरञ्जनाय भ्रमन्नुज्जयिनीमद्यागतोऽस्मि'

मयप्रदेशपृष्ठम्। सुष्ठु दन्तौ यस्याः सा सुदती। 'संख्यासुपूर्वस्य' इत्यनेन दतृ। 'उगितश्च' इत्यनेन ङीप् च। तयाऽऽदौ भुक्तं सेवितं पश्चान्मुक्तं त्यक्तं माधवीलताया वासन्तीलताया मण्डपस्यान्तरं मध्यस्तत्र स्थितं पल्लवतल्पं पर्णशय्यां च। विलोकयन् पश्यन्। शाकुंतलेऽपि दुष्यन्तमनोविनोदप्रकाराः 'तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियम्' इत्यादिरीत्येदृश एव दर्शिताः। ललनातिलकस्य प्रमदाभूषणस्यावन्तिसुन्दर्या विलोकनवेलायामीक्षणकाले जनितान्युत्पन्नानि शेषाण्यवशिष्टानि च स्मारं स्मारं स्मृत्वा स्मृत्वा। मन्देन मृदुना मारुतेन वायुना कम्पितानि चालितानि नवानि नूतनानि चूतपल्लवान्याम्रपर्णानि। तेषां ताम्रत्वादाह। मदनेति। मदनाग्नेः शिखा इव ज्वाला इव। चकितो भीतः दर्शं दर्शं दृष्ट्वा दृष्ट्वा। मनोजस्य मदनस्य कर्णेजपाः सूचकास्तेषामिव। 'तत्पुरुषे कृति बहुलम्' इत्यनेनालुक्। 'कर्णेजपः सूचकः स्याद्' इत्यमरः। कोकिलाः परभृताः कीराः शुका मधुकरा भ्रमराश्च तेषां क्वणितान्यस्पष्टशब्दान्। श्रावं श्रावं श्रुत्वा श्रुत्वा। मारविकारेण मदनविकृत्या क्वचिदपि कुत्रापि स्थातुमसहिष्णुरक्षमः। बभ्रामेतस्ततः आटत्।

तस्मिन्निति। अवसरे काले धरणीसुरो ब्राह्मणः। सूक्ष्मं लघु चित्रं नैकवर्णं च निवसनं वासो यस्य सः स्फुरद्भ्यां विलसद्भ्यां मणिकुण्डलाभ्यां रत्नमयकर्णभूषणाभ्यां मण्डितो भूषितः। मुण्डितं विकेशं मस्तकं शीर्षं येषां तैर्मानवैर्नरैः। समेतो युक्तः। चतुरो मनोहरो वेषो नेपथ्यं तेन मनोरमो मनोहरः। यदृच्छयाऽकस्मात्समागतः प्राप्तः। समन्ततः सर्वासु दिक्षु समुल्लसद्दीप्तिमत्तेजोमण्डलं कान्तेर्वर्तुलं यस्य तं राजवाहनं राजकुमारम्। आशीर्वादः पूर्वं यस्मिन्यथा स्यात्तथा। स राजपुत्रेण पृष्ट आगतः पुरुषो विद्येश्वरो नामधेयमभिधानं यस्य सः। इन्द्रजालं हस्तकौशलादिना प्रेक्षकदृष्ट्यावरणं तेन दीव्यति स ऐन्द्रजालिको मायावी तस्य विद्यायामिन्द्रजालरूपायां कोविदः पण्डितः। 'तेन दीव्यति०' इत्यनेन ठक्। विविधेष्वनेकेषु देशेषु राष्ट्रेषु राज्ञां नृपाणां मनोरञ्ज-

इति शशंस । पुनरपि राजवाहनं सम्यगालोक्य 'अस्यां लीलावनौ पाण्डुरतानिमित्तं किम्' इति साभिप्रायं विहस्यापृच्छत् । पुष्पोद्भवश्च निजकार्यकरणं तर्कयन्नेनमादरेण बभाषे—'ननु सतां सख्यस्याभाषणपूर्वतयाचिरं रुचिरभाषणो भवानस्माकं प्रियवयस्यो जातः । सुहृदामकथ्यं च किमस्ति । केलीवनेऽस्मिन्वसन्तमहोत्सवायागताया मालवेन्द्रसुताया राजनन्दनस्यास्य चाकस्मिकदर्शनेऽन्योन्यानुरागातिरेकः समजायत । सततसंभोगसिद्ध्युपायाभावेनासावीदृशीमवस्थामनुभवति' इति । विद्येश्वरो लज्जाभिरामं राजकुमारमुखमभिवीक्ष्य विरचितमन्दहासो व्याजहार—'देव, भवदनुचरे मयि तिष्ठति तव कार्यमसाध्यं किमस्ति । अहमिन्द्रजालविद्यया मालवेन्द्रं मोहयन्पौरजनसमक्षमेव तत्तनयापरिणयं रचयित्वा कन्यान्तःपुरप्रवेशं कारयिष्यामीति वृत्तान्त एष राजकन्यकायै सखीमुखेन पूर्वमेव कथ-

नाय मनसस्तोषमुत्पादयितुं भ्रमन्नाहिण्डमानः । शशंसाकथयत् । सम्यक् सुष्ठु । आलोक्य दृष्ट्वा । लीलावनौ क्रीडोद्याने पाण्डुरता मुखवैवर्ण्यं तस्याः किं निमित्तं को हेतुः । क्रीडार्थमेवोद्यानं प्रत्यागच्छन्ति जनास्तव तु मुखं चिन्ताव्याप्तत्वादिना मान्मथविकारैर्वाऽन्यथाऽस्त्यतः किं ते दुःखकारणमिति प्रश्नार्थः । साभिप्रायं साशयं विहस्य स्मितं कृत्वा । 'अभिप्रायः छन्द आशय' इत्यमरः । निजं स्वीयं यत्कार्यं सुहृदोऽभीष्टसंपादनं तस्य करणं हेतुं तर्कयन् ज्ञात्वा । एनमैन्द्रजालिकम् । आदरेण मानपूर्वकम् । नन्विति निश्चये । सतां सज्जनानां सख्यस्य सौहार्दस्याभाषणमालापः पूर्वं प्रथमं यस्य तस्य भावस्तया । अत एव कालिदासः 'संबन्धमाभाषणपूर्वमाहुः' इति । चिरं बहुकालं रुचिरं प्रियं भाषणं यस्य स भवान् प्रियवयस्यः प्रियसुहृत् । अकथ्यमकथनीयं किमस्ति किमपि नास्तीत्यर्थः । अकस्माज्जातमाकस्मिकं यद्दर्शनं तत्र । 'कालाट्ठञ्' । अन्योन्ये परस्परेऽनुरागः प्रेम तस्यातिरेक आधिक्यं समजायतोदभवत् । सततसंभोगो नित्योपभोगस्तस्य सिद्धेः प्राप्तेरुपायस्य साधनस्याभावेन । असौ राजकुमार ईदृशीं कष्टामित्यर्थः । अवस्थां दशामनुभवत्युपभुङ्क्ते । लज्जया त्रपयाऽभिरामं सुन्दरं राजकुमारस्य मुखं वदनम् । विरचितः कृतो मन्दहासो येन सः । व्याजहारोक्तवान् । भवदनुचरे त्वत्सेवके । तिष्ठति त्वत्कार्यकरणाय विद्यमान इत्यर्थः । असाध्यं दुष्करम् । इन्द्रजालविद्ययेन्द्रजालसामर्थ्येन मालवेन्द्रं दर्पसारं मोहयन् भ्रान्तिं नयन् । पौरजनानां नागरिकाणां समक्षमेव प्रत्यक्षमेव तस्य तनयायाः कन्यायाः परिणयं विवाहं रचयित्वा संपाद्य । कन्याया अन्तःपुरे निवासस्थाने प्रवेशं कारयिष्यामि त्वयेति शेषः । एष वृत्तान्तो मदीयविधानवार्ता । सखीमुखेन बालचन्द्रिकामुखेन । संतुष्टं मनो यस्य सः । अनिमित्तं मित्रमकारणसुहृदम् ।

१ 'पुष्पोद्भवश्चैन्द्रजालिके' ब. २ 'एवम्' ब.

यितव्यः' इति। संतुष्टमना महीपतिरनिमित्तं मित्रं प्रकटीकृतकृत्रिमक्रियापाटवं विप्रलम्भकृत्रिमप्रेमसहजसौहार्दवेदिनं तं विद्येश्वरं सबहुमानं विससर्ज।

31 अथ राजवाहनो विद्येश्वरस्य क्रियापाटवेन फलितमिव मनोरथं मन्यमानः पुष्पोद्भवेन सह स्वमन्दिरमुपेत्य सादरं बालचन्द्रिकामुखेन निजवल्लभायै महीसुरक्रियमाणं संगमोपायं वेदयित्वा कौतुकाकृष्टहृदयः 'कथमिमां क्षपां क्षपयामि' इत्यतिष्ठित्। परेद्युः प्रभाते विद्येश्वरो रसभावरीतिगतिचतुरस्तादृशेन[१] महता निजपरिजनेन सह राजभवनद्वारान्तिकमुपेत्य दौवारिकनिवेदितनिजवृत्तान्तः सहसोपगम्य सप्रणामम् 'ऐन्द्रजालिकः समागतः' इति द्वाःस्थैर्विज्ञापितेन तद्दर्शनकुतूहलाविष्टेन समुत्सुकावरोधसहितेन मालवेन्द्रेण समाहूयमानो विद्येश्वरः कक्षान्तरं प्रविश्य सविनयमाशिषं दत्वा तदनुज्ञातः परिजनताड्यमानेषु वाद्येषु

प्रकटितं प्रदर्शितं कृत्रिमायां कृतिसाध्यायां क्रियायां कार्ये पाटवं कौशलं येन तं विप्रलम्भः प्रतारणा कृत्रिमप्रेम सहेतुका प्रीतिः सहजसौहार्दं निष्कारणमित्रता च तानि वेत्ति जानाति तं विद्येश्वरं तत्संज्ञकमैन्द्रजालिकं सबहुमानं बहुमानपुरःसरं विससर्ज प्रेषयामास।

अथेति। विद्येश्वरस्य तत्संज्ञकैन्द्रजालिकस्य क्रियापाटवेनेन्द्रजालकौशलेन फलितमिव निष्पन्नमिव निजमनोरथं स्वीयाभीष्टं मन्यमानस्तर्कयन्। स्वमन्दिरं स्वनिवासगृहम्। महीसुरेण ब्राह्मणैन्द्रजालिकेन क्रियमाणं करिष्यमाणम्। वर्तमानसामीप्याल्लटि कर्मणि शानच्। संगमस्य मेलनस्योपायं साधनं वेदयित्वा बोधयित्वा। कौतुकेनाश्चर्येणाकृष्टं हृदयं यस्य सः। कौतुकं च नवीनचमत्कृतिजनकपुरुषदर्शनात्तदुद्भाव्यक्रियाविचारेण वेत्यवधेयम्। क्षपां रात्रिम्। क्षपयामि नयामि। परेद्युः परस्मिन्नहनि। प्रभाते प्रातःकाले रसाः शृङ्गारादयः भावोऽभिप्रायप्रकटनं रीतिगतयः इन्द्रजालान्तर्गतास्तासु चतुरः कुशलः। तादृशेन तथैव कुशलेनेत्यर्थः निजपरिजनेन स्वसेवकेन सह। राजभवनस्य नृपप्रासादस्य द्वारस्यान्तिकं समीपमुपेत्य प्राप्य। दौवारिकेण द्वाःस्थेन निवेदितो निजवृत्तान्तः स्वोदन्तो यस्य सः। द्वारात्तत्र नियुक्त इत्यनेन ठक् 'द्वारादीनां च' इत्यनेनैजागमश्च। सहसाऽतर्कितमुपगम्यान्तर्गत्वा सप्रणामं सनमस्कारं। तस्यैन्द्रजालिकस्य दर्शनेऽवलोकने कुतूहलं कौतुकं तेनाविष्टो व्याप्तस्तेन। समुत्सुकेनोत्कण्ठितेनावरोधेनान्तःपुरेणान्तःपुरस्थस्त्रीवर्गेण सहितस्तेन मालवेन्द्रेण मानसारेण समाहूयमान आकारितः। कक्ष्यान्तरं भिन्नं प्रकोष्ठम्। सविनयं नम्रतयाशिषमाशीर्वादं दत्वा। तेन नृपेणानुज्ञात आज्ञप्तः। परिजनैः सेवकैस्ताड्यमानेषु वाद्यमानेषु वाद्येषु भेर्यादिषु नदत्सु शब्दं विदधत्सु।

---

१ 'रसभावगीतिरीतिगति' ब.

नदत्सु, गायकीषु मदकलकोकिलामञ्जुलध्वनिषु समधिकरागरञ्जितसामाजिकमनोवृत्तिषु, पिच्छिकाभ्रमणेषु स परिवारं परिवृतं भ्रामयन्मुकुलितनयनः क्षणमतिष्ठत् । तदनु विषमं विषमुल्बणं वमन्तः फणालंकरणा रत्नराजिनीराजितराजमन्दिराभोगा भोगिनो भयं जनयन्तो निश्चेरुः । गृध्राश्च बहवस्तुण्डैरहिपतीनादाय दिवि समचरन् । ततोऽग्रजन्मा नरसिंहस्य हिरण्यकशिपोर्दैत्येश्वरस्य विदारणमभिनीय महदाश्चर्यान्वितं राजानमभाषत—'राजन्, अवसानसमये भवता शुभसूचकं द्रष्टुमुचितम् । ततः कल्याणपरम्परावाप्तये भवदात्मजाकारायास्तरुण्या निखिललक्षणोपेतस्य राजनन्दनस्य विवाहः कार्यः' इति । तदवलोकनकुतूहलेन महीपाले-

---

गायकीषु गानकर्त्रीषु मदेन कलाऽव्यक्तमधुरस्वना या कोकिला तस्या इव मञ्जुलो मधुरो ध्वनिर्यासां तासु । कोकिलाशब्दवन्मधुरं नदन्तीष्वित्यर्थः । समधिकरागेणातिप्रेम्णा रञ्जिता तोषिता सामाजिकानां प्रेक्षकाणां मनोवृत्तिः मनोव्यापारो याभिः तासु । स ऐन्द्रजालिकः पिच्छिकाभ्रमणेषु मयूरपिच्छगुच्छानां घूर्णनेषु परिवारं सेवकवर्गं परिवृतं मण्डलाकारतया भ्रामयन् । मुकुलिते संकुचिते नयने यस्य सः क्षणं स्वल्पकालमतिष्ठत् । तदनु ततः पश्चात् । विषमं भयंकरं विषं गरलमुल्बणं स्पष्टं वमन्तः उद्गिरन्तः। 'स्फुटं प्रव्यक्तमुल्बणम्' इत्यमरः । फणैव स्फटैवालंकरणं भूषणं येषां ते रत्नानां शिरःस्थमणीनां राजिभिः पङ्क्तिभिः नीराजितः पूजितो माङ्गल्यदीपेन सत्कृत इति यावद्राजमन्दिरस्य राजगृहस्याभोगः प्रदेशो यैस्ते भोगिनः सर्पा भयं जनयन्तो भीतिमुत्पादयन्तो निश्चेरुरितस्ततो भ्रेमुः । बहवः प्रभूता गृध्राः पक्षिविशेषाः सर्पभक्षका 'गिधाड' इति प्रसिद्धाः तुण्डैर्मुखैरहिपतीन् सर्पराजानादाय गृहीत्वा दिव्याकाशे समचरन् पर्यटन् । तत इति । अग्रजन्मा ब्राह्मणः स ऐन्द्रजालिकः नरसिंहस्य भगवतश्चतुर्थावतारस्य । अस्य विदारणमित्यत्र कर्तृत्वेनान्वयः । 'शेषे विभाषा' इति वार्तिकमविशेषेण विभाषाविधायकमित्यतः शब्दानामनुशासनमाचार्यस्येतिवत् कर्तरि षष्ठी । हिरण्यकशिपोः प्रल्हादपितुर्दैत्येश्वरस्यासुराधिपस्य । कर्मणि षष्ठी । विदारणं नखैर्विपाटनमभिनीय भूमिकादिभिर्दर्शयित्वा । महदाश्चर्येण महाश्चर्येणान्वितं युक्तम् । अत्रात्वेन भाव्यमात्वाभावस्त्वसाधुः । अवसानसमये इन्द्रजालप्रेक्षणान्ते शुभसूचकं कल्याणकथकं द्रष्टुमुचितमवलोकयितुं योग्यम् । ततस्तस्मात्कल्याणानां शुभानां परम्पराया अवाप्तिर्लाभस्तस्यै । भवतस्त आत्मजेवकन्येवाकारो यस्यास्तस्यास्तरुण्या युवत्या निखिलैः सकलैर्लक्षणैः शुभचिन्हैरुपेतस्य युक्तस्य राजनन्दनस्य राजपुत्रस्य विवाहः परिणयनं कार्यो विधेयः । तस्य विवाहस्यावलोकन ईक्षणे कुतूहलं कौतुकं

---

१ 'पिञ्छिका भ्रमणेषु सपरिवारः परिवृढम्' ब–ब.

नानुज्ञातः स संकल्पितार्थसिद्धिसंभावनसंफुल्लवदनः सकलमोहजनकमञ्जनं लोचनयोर्निक्षिप्य परितो व्यलोकयत्। सर्वेषु 'तदैन्द्रजालिकमेव कर्म' इति साद्भुतं पश्यत्सु रागपल्लवितहृदयेन राजवाहनेन पूर्वसंकेतसमागतामनेकभूषणभूषिताङ्गीमवन्तिसुन्दरीं वैवाहिकमन्त्रतन्त्रनैपुण्येनाग्निं साक्षीकृत्य संयोजयामास। क्रियावसाने सति 'इन्द्रजालपुरुषाः, सर्वे गच्छन्तु भवन्तः' इति द्विजन्मनोच्चैरुच्यमाने सर्वे मायामानवा यथायथमन्तर्भावं गताः। राजवाहनोऽपि पूर्वसंकल्पितेन गूढोपायचातुर्येणैन्द्रजालिकपुरुषवत्कन्यान्तःपुरं विवेश। मालवेन्द्रोऽपि तदद्भुतं मन्यमानस्तस्मै वाडवाय प्रचुरतरं धनं दत्त्वा 'विद्येश्वर, त्वमिदानीं साधय' इति तं विसृज्य स्वयमन्तर्मन्दिरं जगाम। ततोऽवन्तिसुन्दरी प्रियसहचरीवरपरिवारा वल्लभोपेता

तेन हेतुना। अथवा नृपविशेषणमेतत्। महीपालेन नृपेणानुज्ञात आज्ञप्तः संकल्पितोऽभिलषितो योऽर्थो राजवाहनविवाहरूपस्तस्य सिद्धेः संभावनं संभवस्तेन संफुल्लं प्रफुल्लं वदनं मुखं यस्य सः। सकलानां मोहजनकं सर्वेषां मोहोत्पादकमञ्जनं कज्जलं लोचनयोर्नेत्रयोर्निक्षिप्य संस्थाप्य परित आसमन्ताद् व्यलोकयदपश्यत्। तद्विवाहरूपमैन्द्रजालिकमेवेन्द्रजालकृतमेवेति साद्भुतं साश्चर्यं पश्यत्सु सत्सु। रागेण प्रेम्णा पल्लवितं युक्तमिति यावद्धृदयं यस्य तेन पूर्वसंकेतेन दूतीमुखनिवेदितसंकेतेन समागतां प्राप्ताम्। अनेकैर्बहुभिर्भूषणैरलंकारैर्भूषितमङ्गं शरीरं यस्यास्ताम्। वैवाहिका विवाहसम्बन्धिनो मन्त्रास्तन्त्राणि विवाहविधिस्थक्रियाविशेषाश्च तेषु नैपुण्यं कौशलं तेनाग्निं वैवाहिकवन्हिं साक्षीकृत्य तस्य पुरत इति यावत्। संयोजयामास संगमयामास। क्रियाया लग्नविधेरवसानेऽन्ते। द्विजन्मना ब्राह्मणेनैन्द्रजालिकेन। मायामानवा इन्द्रजालपुरुषाः। यथायथं स्वस्वस्थानम्। 'यथास्वे यथायथम्' इत्यनेन यथाशब्दस्य द्वित्वं क्लीबत्वं च। अन्तर्भावमदर्शनं गताः प्राप्ताः। पूर्वसंकल्पितेन पूर्वमेव निश्चितेन गूढा गुप्ता उपायास्तेषां चातुर्येण कौशलेन। ऐन्द्रजालिकपुरुष इवैन्द्रजालिकपुरुषवत्। तुल्यार्थे वतिः। तद्विवाहकर्माद्भुतं चमत्कृतिजनकं मन्यमानो जानन्। वाडवाय ब्राह्मणाय वडवायां जातः। 'तत्र जात' इत्यण्। 'वडवाश्वाकुम्भदास्योः स्त्रीविशेषे द्विजन्मनाम्' इति विश्वः। प्रचुरतरं प्रभूतं धनं द्रव्यं दत्वा समर्प्य। साधय गच्छ। 'प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यत' इति विश्वनाथः। विसृज्य संप्रेष्य। अन्तर्मन्दिरमन्तःपुरम्। प्रियाः सहचरीवराः सखीश्रेष्ठाः परिवारो यस्या अथवा प्रियाः सहचर्य एव वरः परिवारो यस्याः सा। वल्लभेन राजवाहनेनोपेता युक्ता सुन्दरं मनोरमं मन्दिरं

---

१ 'विद्येश्वरम्' 'इदानीं साधय' इति विसृज्य' न.

सुंन्दरं मन्दिरं ययो । एवं दैवमानुषबलेन मनोरथसाफल्यमुपेतो राजवाहनः सरसमधुरचेष्टाभिः शनैःशनैःहरिणलोचनाया लज्जामपनयन्सुरतरागमुपनयन्रहो विश्रम्भमुपजनयन्संलापे तदनुलापपीयूषपानलोलश्चित्रचित्रं चित्तहारिणं चतुर्दशभुवनवृत्तान्तं श्रावयामास ॥

इति श्रीदण्डिनः कृतौ दशकुमारचरितेऽवन्तिसुन्दरीपरिणयो नाम पञ्चम उच्छ्वासः ।

समाप्तेयं दशकुमारचरितपूर्वपीठिका ।

गृहम् । दैवं देवतासंबन्धि मानुषं च यद्बलं तेन मनोरथस्य मनीषितस्य साफल्यं सफलतामुपेतः प्राप्तः । सरसाः प्रेमयुक्ता मधुरा मनोहराश्चेष्टा व्यापारास्ताभिः । शनैः शनैर्मन्दं मन्दं हरिणलोचनाया मृगाक्ष्या लज्जां त्रपामपनयन्दूरीकुर्वन् । सुरते क्रीडायां रागं प्रेमोपनयन् जनयन् । रह एकान्ते विश्रम्भं विश्वासमुपजनयन्नुत्पादयन् । संलापे मिथोभाषणे । 'संलापो भाषणं मिथ' इत्यमरः । तस्या अनुलापः पुनः पुनर्भाषणं तदेव पीयूषममृतं तस्य पाने प्राशने लोल आसक्तः । चित्रचित्रमतिचमत्कारि चित्तहारिणं मनोहरं चतुर्दशानां भुवनानां जगतां वृत्तान्तं, वार्तां श्रावयामास निवेदयामास ।

इति श्रीदण्डिकृतदशकुमारचरितपूर्वपीठिकाव्याख्यायां बालबोधिन्यां पञ्चम उच्छ्वासः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

---

१ 'सुन्दरीमन्दिरम्' व-न.

श्रीवेङ्कटेशो विजयते ।

दशकुमारचरितम् ।

राजवाहनचरितं नाम प्रथमोच्छ्वासः ।

1 श्रुत्वा तु भुवनवृत्तान्तमुत्तमाङ्गना विस्मयविकसिताक्षी सस्मितमिदमभाषत—'दयित, त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्तिः । अद्य मे मनसि तमोपहस्त्वया दत्तो ज्ञानप्रदीपः । पक्वमिदानीं त्वत्पादपद्मपरिचर्याफलम् । अस्य च त्वत्प्रसादस्य किमु-

---

श्रीवेङ्कटेशो विजयते ।

श्रुत्वेति । भुवनानामर्थाच्चतुर्दशानां जगतां वृत्तान्तं तत्संबन्धिनीं वार्तां पुराणेतिहासादिषु कथितामाकर्ण्य । भुवनानां चतुर्दशत्वं वह्निपुराणे 'चतुर्दशविधं ह्येतद्भूतसर्गं प्रकीर्तितम् । भूर्भुवः स्वर्महश्चैव जनश्च तप एव च ॥ सत्यलोकश्च सप्तैते लोकास्तु परिकीर्तिताः । जम्बूः शाकः कुशः क्रौञ्चः शाल्मलो मेदपुष्करः ॥ सप्तद्वीपाः प्रधानानि ह्युपद्वीपैस्तु संयुताः' । इति । उत्तमाङ्गना श्रेष्ठा प्रमदा सकलसुगुणोपेता स्त्रीत्यर्थः । साचावन्तीसुन्दरी । अत्रोत्तमपदं पुनरुक्तम् । अङ्गना शब्देनैवोत्तमत्वस्य लाभात् । 'अङ्गात्कल्याण' इत्यनुशासनेन नप्रत्ययेनैव कल्याणरूपाभिधानात् । अथवा विशिष्टवाचकानामिति न्यायेनाङ्गनापदं सामान्यस्त्रीवाचकं ग्राह्यम् । विस्मयेनाश्चर्येण विकसिते प्रफुल्ले अक्षिणी यस्याः सा । विस्मयश्च वृत्तान्तश्रवणजः । सस्मितं सहासमभाषतोक्तवती । दयितेति वल्लभेत्यर्थकमान्त्रणम् । 'वल्लभो दयित' इति मेदिनी । त्वत्प्रसादात् तव भुवनवृत्तान्तकथनरूपादनुग्रहात् । अद्यास्मिन्नहनि । एतेनेतः पूर्वं नेदृक् वार्ताजातं मया श्रुतमिति लभ्यते । श्रोत्रवृत्तिः कर्णयोः श्रवणरूपो व्यापारः चरितार्था सफला । श्रोतव्यस्य श्रुतत्वाद्वा प्रियमुखतः श्रुतत्वाद्वेति, भावः । अद्य मनस्यन्तःकरणे तमोऽपहोऽज्ञाननाशको ज्ञानमेव प्रदीपो दत्तः । पित्रादिगुरुजनानुज्ञामगृहीत्वैव यन्मया परिणीतं तन्न समीचीनं कृतमित्यादिकुविचाररूपमज्ञानं त्वया शकुन्तलादीनांपुण्यचरितानां गान्धर्वविवाहवर्णनेनापनीतमित्यर्थः। तव पादौ चरणौ पद्मे इव कमले इव तयोः परिचर्या पूजा तस्याः फलं पक्वम् । त्वादृशस्य सेवायां यत्समधिगन्तव्यं तत्समधिगतमिति तात्पर्यम् । अस्य मदज्ञाननाशनमत्स्वी-

पकृत्य प्रत्युपकृतवती भवेयम् । अभवदीयं हि नैव किंचिन्मत्संबद्धम् । अथवास्त्येवास्यापि जनस्य क्वचित्प्रभुत्वम् । अशक्यं हि मदिच्छया विना सरस्वतीमुखग्रहणोच्छेषणीकृतो दशनच्छद एष चुम्बयितुम् । अम्बुजासनास्तनतटोपभुक्तमुरःस्थलं चेदमालिङ्गयितुम्' इति। ततः प्रियोरसि प्रावृडिव नभस्तुपास्तीर्णगुरुपयोधरमण्डला प्रौढकन्दलीकुड्मलमिव रूढरागरूषितं चक्षुरुल्लासयन्ती बर्हिबर्हावलीविडम्बिना कुसुमचन्द्रकशारेण मधुकरकुलव्याकुलेन केशकलापेन स्फुरदरुणकिरणकेसरकरालं

काररूपस्य तव प्रसादस्यानुग्रहस्य किमुपकृत्य कीदृशमुपकारं कृत्वा प्रत्युपकृतवती कृतप्रत्युपकारा । किं कृत्वा ते आनृण्यमुपगच्छेयमिति प्रश्नाशयः । अभवदीयमत्वत्स्वामिकं मत्संबद्धं मदीयं नैव किंचित् । नास्ति तादृगेकमपि वस्तु मदधीनं यस्यार्पणेन मुच्येयं त्वदृणादित्यर्थः । एवं स्वस्य कुत्रापि स्वामित्वाभावं संसूच्य तदेव पुनः प्रतिषेधति । **अथवेति** । अस्यापि मल्लक्षणस्य जनस्य क्वचित्कुत्रचित् प्रभुत्वं स्वामित्वम् । मदिच्छया 'पृथग्विने०' ति तृतीया । सरस्वत्या कर्तृभूतया यन्मुखग्रहणं वदनस्वीकारस्ते वदने स्थितिश्चुम्बनं च तेनोच्छेषणीकृत उच्छिष्टीकृत एष पुरोदृश्यमानो दशनच्छदोऽधरः । चुम्बयितुमास्वादयितुमशक्यम् । णिजन्तम् । न काऽप्यन्या अन्यो वा मदिच्छां विना मया तेऽधरोष्ठं चुम्बयितुं समर्थः । तवौष्ठचुम्बने ममैव प्रभुत्वं न कोऽपि हठान्मया तत् कारयेदित्यर्थः ।। एवमालिङ्गनेऽपि । अम्बुजं कमलमासनं यस्याः सा लक्ष्मीस्तस्याः स्तनतटेन कुचपरिसरेणोपभुक्तमुरःस्थलं वक्षःस्थलमालिङ्गयितुमाश्लेषयितुम् । अनेन च विशेषणद्वयेन निसर्गभिन्नास्पदयोः श्रीसरस्वत्योरत्र निवासः सूचितः । द्वितीयविशेषणेन च भाविसार्वभौमत्वं प्रदर्शितम् । शिवरामस्तु एतेन विशेषणद्वयेन विष्णुरूपवर्णनाद्भाविसार्वभौमत्वं सूचितम् । 'वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि । यस्यास्ते हृदये संवित्तं नृसिंहमहं भज' इति श्लोकेन तादृशविशेषणाक्रान्तं नृसिंहरूपिणं भज इत्यर्थकेन तस्य नृसिंहत्वसूचनादन्यस्त्रीभोगराहित्यं सूचितम्' इत्याह । नभस्याकाशे प्रावृडिव वर्षाकाल इव प्रियोरसि वल्लभवक्षसि उपास्तीर्णं स्थापितं गुरु महत् पयोधरमण्डलं कुचविस्तारो यया सा । प्रावृट्पक्षे पयोधरमण्डलं मेघमण्डलमित्यर्थः । पूर्णोपमा पयोधरशब्दस्य श्लिष्टत्वाच्छ्लेषगर्भिता च । स्त्रीलिङ्गं प्रावृट्शब्दं निवेशयता कविना च प्रदर्शितं स्वीयमुपमाग्रथनकौशलम् । प्रौढा या कन्दली द्रोणपर्णी तस्याः कुड्मलमिव मुकुलमिव । 'द्रोणपर्णी स्निग्धगन्धा कन्दली भूतकन्दली' ति शब्दार्णवः । 'कुड्मलो मुकुलोऽस्त्रियाम्' इत्यमरः । रूढ उत्पन्नो रागः प्रेमा रक्तिमा च तेन रूषितं

---

१ 'ततः' इत्यतेन्नास्ति **न**–**ब**पुस्तकयोः. २ 'विडम्बयता' **न**.

कदम्बमुकुलमिव कान्तस्याधरमणिमधीरमाचुचुम्ब । तदारम्भस्फुरितया च रागवृत्त्या भूयोभूयः प्रावर्ततातिमात्रचित्रोपचारशीकरो रतिप्रबन्धः । सुरतखेदसुप्तयोस्तु तयोः स्वप्ने बिसगुणनिगडितपादो जरठः कश्चिज्जालपादोऽदृश्यत । प्रत्यबुद्ध्येतां चोभौ । अथ तस्य राजकुमारस्य कमलमूढशशिकिरणरज्जुदामनिगृहीतमिव रजतशृङ्खलोपगूढं चरणयुगलमासीत् । उपलभ्यैव च 'किमेतत्' इत्यतिपरित्रासविह्वला मुक्तकण्ठमाचक्रन्द राजकन्या । येन च तत्सकलमेव कन्यान्तःपुरमग्निपरी-

भूषितम् । कन्दलीकुड्मलस्य ताम्रस्य नेत्रसाम्यम् । चक्षुर्नयनं जात्या एकत्वम् । उल्लासयन्ती विकासयन्ती । बर्हिणो मयूरस्य बर्हावलीं पिच्छपंक्तिं विडम्बयत्यनुकरोति तेन । 'मयूरो बर्हिणो बर्ही' 'पिच्छबर्हे नपुंसके' इति चामरः । कुसुमानां चन्द्रकाः शशिप्रतिकृतयस्तैः शारश्चित्रस्तेन । 'इवे प्रतिकृतौ' इत्यनेन कन् । अथवा चन्द्रक इव मेचक इव कुसुमानि तैः शारस्तेन । 'मेचकस्तु मयूरस्य चन्द्रक' इति मेदिनी । मधुकराणां भ्रमराणां कुलेन समूहेन व्याकुलो व्याप्तस्तेन केशकलापेन केशसमूहेन । उपलक्षिता । इत्थंभूतलक्षणे तृतीया । स्फुरन्तः प्रसरन्तोऽरुणकिरणास्ताम्रमयूखा एव केसराः किञ्जल्कास्तैः करालं । दन्तुरमधरमणिम् । पक्षे स्फुरन्तोऽरुणकिरणा इव केसरास्तैः करालं कदम्बमुकुलं नीपकुड्मलमिव । अधीरं धैर्यरहितं यथा तथा । प्रायः कामिन्यो धीरा न स्वयं चुम्बनादिकर्मणि प्रवर्तन्ते परमनया स्वधैर्यं परित्यक्तमिति द्योतयितुमधीरमिति पदम् । तस्य चुम्बनस्यारम्भेण प्रारम्भेण स्फुरितोद्दीपिता तया रागवृत्त्याऽभिलाषावेशेन भूयोभूयः पुनःपुनः । अतिमात्रमतिशयं ये चित्रोपचारा भिन्ना उपचाराः सुरताङ्गभूतास्तैः शीकरो रम्यो रतिप्रबन्धः संभोगव्यापारः । 'शीकरः स्फीतरम्ययोः' इत्यजयः । सुरतस्य क्रीडायाः खेदेन श्रमजन्यग्लान्या प्रसुप्तयोर्निद्रितयोः । स्वप्ने बिसानां कमलनालानां गुणेन तज्जरज्ज्वा निगडितौ बद्धौ पादौ यस्य स जरठो वृद्धो जालपादो हंसोऽदृश्यतावालोक्यत । 'जालपादः श्वेतगरुच्चक्राङ्गो मानसौकसः' इति वैजयन्ती । उभौ जायापती प्रत्यबुध्येतामजागृताम् । अथेति । राजकुमारस्य राजवाहनस्य चरणयुगलं पदद्वयं कमलमूढः कमलमिति बुद्ध्या भ्रान्तो यः शशी तस्य किरणा एव रज्जुदाम तेन निगृहीतमिव बद्धमिव रजतशृङ्खलया रौप्यमय्या शृङ्खलयोपगूढं रुद्धमासीत् । राजकुमारस्य पादद्वयं राजतरज्जुबद्धं तत्र शशिना कमलद्वयमिति भ्रान्त्या स्वकिरणा एव राजतरज्जुरूपेण प्रहिता इत्युत्प्रेक्षितम् । उपलभ्यैव ज्ञात्वैव । अतित्रासः प्रतिबन्धजा पीडा तेन विह्वला पीडिता राजकन्याऽवन्तिसुन्दरी मुक्तकण्ठं मुक्तः कण्ठो ध्वनिर्यत्र यथा तथाऽऽक्रन्द रुरोद । 'कण्ठो गले संनिधाने ध्वना' इति विश्वः । येन राज-

१ 'बन्धूकमुकुल'. २ 'भूयोऽप्यावर्तत' न. ३ 'सुरतखेद' इत्येतन्नास्ति ख-पुस्तके.

तमिव पिशाचोपहतामिव वेप्यमानमनिरूप्यमाणतदात्वायातिविभागमगण्यमानरहस्यरक्षासमयमवनितलविप्रविध्यमानगात्रमाक्रन्दविदीर्यमाणकण्ठमश्रुस्रोतोऽवगुण्ठितकपोलतलमाकुलीबभूव । तुमुले चास्मिन्समयेऽनियन्त्रितप्रवेशाः 'किं किम्' इति सहसोपसृत्य विविशुरन्तर्वंशिकपुरुषाः । ददृशुश्च तदवस्थं राजकुमारम् । तदनुभावनिरुद्धनिग्रहेच्छास्तु सद्य एव ते तमर्थं चण्डवर्मणे निवेदयांचक्रुः ।

2 सोऽपि कोपादागत्य निर्दहन्निव दहनगर्भया दृशा निशाम्योत्पन्नप्रत्यभिज्ञः

कन्यारोदनेन । सकलमेव संपूर्णमेव कन्यान्तःपुरं राजकन्यावासगृहस्थ[1] जना इति यावदाग्निपरीतामिव वन्हिना व्याप्तमिव पिशाचेन देवयोनिविशेषणोपहतमिव पीडितमिव वेपमानं कम्पमानम् । अनिरूप्यमाणोऽज्ञायमानोऽनालोच्यमान इति यावत् तदात्वस्य तदानींतनस्यायत्या उत्तरकालस्य च विभागो कृत्यं येन तत् । 'तदात्वं तु तदानीं स्यादायतिः काल उत्तर' इत्यमरः । 'कृत्यांशयोर्विभागः स्यात्' इत्यजयः । अगण्यमानोऽपाल्यमानो रहस्यस्य गुप्तवृत्तान्तो नृपकुमारस्थितिरूपस्तस्य रक्षा रक्षणं तस्य समयः आचारो येन तत् । अवनितले भूपृष्ठे विप्रविध्यमानं पात्यमानं गात्रं शरीरं येन तत् । भीत्यतिशयादित्यर्थः । आक्रन्देन रोदनेन विदीर्यमाणो भज्यमानः कण्ठः स्वरो गलो वा यस्य तत् । अश्रुस्रोतो नेत्रजलप्रवाहस्तेनावगुण्ठितः आच्छादितः कपोलतलो गण्डस्थलं येन तत् । आकुलीबभूव दुःखीबभूवेत्यर्थः । तुमुले संकुले च समये काले । 'तुमुलः कलिवृक्षे ना क्लीबं तु रणसंकुले' इति मेदिनीकोशतो रणसंकुलवाचकोऽप्यन्यत्र लक्षणया संकुलवाचको ग्राह्यः । अनियन्त्रितोऽप्रातिषिद्धः प्रवेशो येषां तेऽन्तर्वंशिकपुरुषा अन्तःपुराधिकृता जना सहसाऽवितर्कितमुपसृत्य प्राप्य किं किमिति भणन्त इति शेषः विविशुः राजकन्यागृहमिति शेषः । अन्तर्वंशोऽस्यास्तीति मत्वर्थीयः 'अत इनिठनौ' इत्यनेन ठन् । 'अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जन' इत्यमरः । सा अवस्था यस्य तं तथा रजतशृङ्खलया बद्धमित्यर्थः राजकुमारं राजवाहनम् । तस्य कुमारस्यानुभावेन प्रभावेण निरुद्धा प्रतिबद्धा निग्रहस्य बन्धनस्येच्छा यैस्ते सद्य एव तदानीमेव तमर्थं तत्रत्यं वृत्तान्तं चण्डवर्मणे दर्पसारपितृव्यस्येयाय सचिवाय निवेदयांचक्रुः कथयामासुः ।

सोऽपीति । सोऽपि चण्डवर्माऽपि कोपादागत्य क्रोधात्प्राप्य दहनोऽग्निर्गर्भे मध्ये यस्यास्तया दृशा चक्षुषा । निशाम्य राजवाहनं दृष्ट्वेत्यर्थः । शम आलोचन इत्यस्माच्चौरादिकाद् ल्यप् । 'शमो दर्शने' इत्यनेन मित्वाभावश्च । उत्पन्ना संजाता प्रत्यभिज्ञा पूर्व

---

१ 'समये' इत्येतन्नास्ति ख-पुस्तके. २ 'निशम्य' ख.

'कथं स एवैष मदनुजमरणनिमित्तभूतायाः पापाया बालचन्द्रिकायाः पत्युरत्यभिनिविष्टवित्तदर्पस्य वैदेशिकवणिक्पुत्रस्य पुष्पोद्भवस्य मित्रं रूपमत्तः कलाभिमानी नैकविधविप्रलम्भोपायपाटवावर्जितमूढपौरजनमिथ्यारोपितवितथदेवतानुभावः कपटधर्मकञ्चुको निगूढपापशीलश्चपलो ब्राह्मणब्रुवः। कथमिवैनमनुरक्ता मादृशेष्वपि पुरुषसिंहेषु सावमाना पापेयमवन्तिसुन्दरी। पश्यतु पतिमद्यैव शूलावतंसितमियमनार्यशीला कुलपांसनी' इति निर्भर्त्सयन्भीषणभ्रुकुटिदूषितललाटः काल इव काललोहदण्डकर्कशेन बाहुदण्डेनालम्ब्य हस्ताम्बुजे रेखाम्बुजरथाङ्गलाञ्छने राजपुत्रं सरभसमाचकर्ष। स तु स्वभावधीरः सर्वपौरुषातिभूमिः सहिष्णुतैकप्रतिक्रियां दैवीमेव तामापदमवधार्य 'स्मर तस्या हंसगामिनि, हंसकथायाः। सहस्व वासु,

स्मरणं यस्य सः। ममानुजस्य भ्रातुर्दारुवर्मणो मरणे निमित्तभूता तस्याः पापाया दुष्टायाः। अत्यभिनिविष्टोऽत्यन्तं स्थितो वित्तदर्पो धनमदो यस्य तस्य। वैदेशिको विदेशस्थो वणिक्पुत्रो वैश्यतनुजस्तस्य। रूपेण सौन्दर्येण मत्तः। कलानामभिमानो विद्यते यस्य सः। नैकविधा अनेकप्रकारा ये विप्रलम्भोपाया वञ्चनसाधनानि तेषु यत्पाटवं कौशलं तेनावर्जिता वशीकृताः मूढा मूर्खा ये पौरजना नागरिकास्तैर्मिथ्याऽलीकमर्पितः स्थापितो वितथोऽसत्यो देवतानुभावो दैविकं सामर्थ्यं यस्मिन् सः। कपटधर्मः कृत्रिमधर्मः कञ्चुको वारबाणः प्रावरणमिति यावत् यस्य सः। निगूढं गुप्तं पापं शीलं स्वभावो यस्य सः। बहिर्धर्माचरणे समासक्तोऽपि गुप्तं पापकर्मणि तत्पर इत्यर्थः। चपलोऽस्थिरः ब्राह्मणब्रुवो ब्राह्मणाधमः। ब्राह्मणवंशोत्पन्नोऽपि तादृक् कर्माकुर्वन्नप्यात्मानं ब्राह्मणं ब्रवीति सः। 'विप्रः संस्कारयुक्तो न नित्यं संध्यादिकर्म यः। नैमित्तिकं तु नो कुर्याद्ब्राह्मणब्रुव उच्यते' इति पद्मोत्तरखण्डे १०९ तमेऽध्याये। पुरुषसिंहेषु पुरुषश्रेष्ठेषु सावमाना सधिक्करा पापा दुःशीला। शूलेऽवतंसितं स्थापितम्। अनार्यं दुष्टं शीलं स्वभावो यस्याः सा कुलपांसनी वंशदूषिका। 'पांसनः कुलदूषक' इति वैजयन्ती। निर्भर्त्सयत् तर्जयत् भीषणया भयङ्करया भ्रुकुट्या भ्रुवा दूषितं ललाटं भालं येन सः काल इव यम इव। काललोहदण्डः इव कालायसदण्ड इव कर्कशः कठिनस्तेन दण्ड इव बाहुः करस्तेन रेखाम्बुजं रेखामयं कमलं रथाङ्गं चक्रं च लाञ्छनं चिन्हं यस्मिंस्तस्मिन्। हस्ताम्बुजे करकमले राजपुत्रं राजवाहनमवलम्ब्य गृहीत्वा सरभसं सत्वरम्। आचकर्षाकृष्टवानित्यर्थः। स्वभावधीरो निसर्गगम्भीरः सर्वेषां पौरुषाणां पराक्रमाणामतिभूमिः पराकाष्ठा। सहिष्णुता सहनशीलत्वमेका मुख्या प्रतिक्रिया प्रतिकारो यस्यास्तां दैवीममानुषीं भागधेयसम्बन्धिनीं वा तां शत्रुहस्तगमनरूपामापदमापत्तिमवधार्य निश्चित्य। हंसगामिनीति प्रियामन्त्रणम्। हंसकथाया पूर्वजन्मनि मृणालेन बद्धाद्धंसरूपान्मुनेरधिग-

१ 'जनाध्यारोपित' ब-व.

तामिव पिशाचोपहतामिव वेप्यमानमनिरूप्यमाणतदात्वायतिविभागमगण्यमानरहस्यरक्षासमयमवनितलविप्रविध्यमानगात्रमाक्रन्दविदीर्यमाणकण्ठमश्रुस्रोतोऽवगुण्ठितकपोलतलमाकुलीबभूव । तुमुले चास्मिन्समयेऽनियन्त्रितप्रवेशाः 'किं किम्' इति सहसोपसृत्य विविशुरन्तर्वंशिकपुरुषाः । ददृशुश्च तदवस्थं राजकुमारम् । तदनुभावनिरुद्धनिग्रहेच्छास्तु सद्य एव ते तमर्थं चण्डवर्मणे निवेदयांचक्रुः ।

2 सोऽपि कोपादागत्य निर्दहन्निव दहनगर्भया दृशा निशाम्योत्पन्नप्रत्यभिज्ञः

कन्यारोदनेन । सकलमेव संपूर्णमेव कन्यान्तःपुरं राजकन्यावासगृहस्थ[1] जना इति यावदग्निपरीतामिव वन्हिना व्याप्तमिव पिशाचेन देवयोनिविशेषेणोपहतमिव पीडितमिव वेपमानं कम्पमानम् । अनिरूप्यमाणोऽज्ञायमानोऽनालोच्यमान इति यावत् तदात्वस्य तदानींतनस्यायत्या उत्तरकालस्य च विभागो कृत्यं येन तत् । 'तदात्वं तु तदानीं स्यादायतिः काल उत्तर' इत्यमरः । 'कृत्यांशयोर्विभागः स्यात्' इत्यजयः । अगण्यमानोऽपाल्यमानो रहस्यस्य गुप्तवृत्तान्तो नृपकुमारस्थितिरूपस्तस्य रक्षा रक्षणं तस्य समयः आचारो येन तत् । अवनितले भूपृष्ठे विप्रविध्यमानं पात्यमानं गात्रं शरीरं येन तत् । भीत्यतिशयादित्यर्थः । आक्रन्देन रोदनेन विदीर्यमाणो भज्यमानः कण्ठः स्वरो गलो वा यस्य तत् । अश्रुस्रोतो नेत्रजलप्रवाहस्तेनावगुण्ठितः आच्छादितः कपोलतलो गण्डस्थलं येन तत् । आकुलीबभूव दुःखीबभूवेत्यर्थः । तुमुले संकुले च समये काले । 'तुमुलः कलिवृक्षे ना क्लीबं तु रणसंकुले' इति मेदिनीकोशतो रणसंकुलवाचकोऽप्यन्यत्र लक्षणया संकुलवाचको ग्राह्यः । अनियन्त्रितोऽप्रतिषिद्धः प्रवेशो येषां तेऽन्तर्वंशिकपुरुषा अन्तःपुराधिकृता जना सहसाऽवितर्कितमुपसृत्य प्राप्य किं किमिति भणन्त इति शेषः विविशुः राजकन्यागृहमिति शेषः । अन्तर्वंशोऽस्यास्तीति मत्वर्थीयः 'अत इनिठनौ' इत्यनेन ठन् । 'अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जन' इत्यमरः । सा अवस्था यस्य तं तथा रजतशृङ्खलया बद्धमित्यर्थः राजकुमारं राजवाहनम् । तस्य कुमारस्यानुभावेन प्रभावेण निरुद्धा प्रतिबद्धा निग्रहस्य बन्धनस्येच्छा यैस्ते सद्य एव तदानीमेव तमर्थं तत्रत्यं वृत्तान्तं चण्डवर्मणे दर्पसारपितृष्वस्रेयाय सचिवाय निवेदयांचक्रुः कथयामासुः ।

सोऽपीति । सोऽपि चण्डवर्माऽपि कोपादागत्य क्रोधात्प्राप्य दहनोऽग्निर्गर्भे मध्ये यस्यास्तया दृशा चक्षुषा । निशाम्य राजवाहनं दृष्ट्वेत्यर्थः । शम आलोचन इत्यस्माच्चौरादिकाद् ल्यप् । 'शमो दर्शने' इत्यनेन मित्वाभावश्च । उत्पन्ना संजाता प्रत्यभिज्ञा पूर्व

---

१ 'समये' इत्येतन्नास्ति ख-पुस्तके. २ 'निशम्य' ख.

'कथं स एवैष मदनुजमरणनिमित्तभूतायाः पापाया बालचन्द्रिकायाः पत्युरत्यभिनिविष्टवित्तदर्पस्य वैदेशिकवणिक्पुत्रस्य पुष्पोद्भवस्य मित्रं रूपमत्तः कलाभिमानी नैकविधविप्रलम्भोपायपाटवावर्जितमूढपौरजनमिथ्यारोपितवितथदेवतानुभावः कपटधर्मकञ्चुको निगूढपापशीलश्चपलो ब्राह्मणब्रुवः। कथमिवैनमनुरक्ता मादृशेष्वपि पुरुषसिंहेषु सावमाना पापेयमवन्तिसुन्दरी। पश्यतु पतिमद्यैव शूलावतंसितमियमनार्यशीला कुलपांसनी' इति निर्भर्त्सयन्भीषणभ्रुकुटिदूषितललाटः काल इव काललोहदण्डकर्कशेन बाहुदण्डेनालम्ब्य हस्ताम्बुजे रेखाम्बुजरथाङ्गलाञ्छने राजपुत्रं सरभसमाचकर्ष। स तु स्वभावधीरः सर्वपौरुषातिभूमिः सहिष्णुतैकप्रतिक्रियां देवीमेव तामापदमवधार्य 'स्मर तस्या हंसगामिनि, हंसकथायाः। सहस्व वासु,

---

स्मरणं यस्य सः। ममानुजस्य भ्रातुर्दारुवर्मणो मरणे निमित्तभूता तस्याः पापाया दुष्टायाः। अत्यभिनिविष्टोऽत्यन्तं स्थितो वित्तदर्पो धनमदो यस्य तस्य। वैदेशिको विदेशस्थो वणिक्पुत्रो वैश्यतनुजस्तस्य। रूपेण सौन्दर्येण मत्तः। कलानामभिमानो विद्यते यस्य सः। नैकविधा अनेकप्रकारा ये विप्रलम्भोपाया वञ्चनसाधनानि तेषु यत्पाटवं कौशलं तेनावर्जिता वशीकृताः मूढा मूर्खा ये पौरजना नागरिकास्तैर्मिथ्याऽलीकमर्पितः स्थापितो वितथोऽसत्यो देवतानुभावो दैविकं सामर्थ्यं यस्मिन् सः। कपटधर्मः कृत्रिमधर्मः कञ्चुको वारबाणः प्रावरणमिति यावत् यस्य सः। निगूढं गुप्तं पापं शीलं स्वभावो यस्य सः। बहिर्धर्माचरणे समासक्तोऽपि गुप्तं पापकर्मणि तत्पर इत्यर्थः। चपलोऽस्थिरः ब्राह्मणब्रुवो ब्राह्मणाधमः। ब्राह्मणवंशोत्पन्नोऽपि तादृक् कर्माकुर्वन्नप्यात्मानं ब्राह्मणं ब्रवीति सः। 'विप्रः संस्कारयुक्तो न नित्यं संध्यादिकर्म यः। नैमित्तिकं तु नो कुर्याद्ब्राह्मणब्रुव उच्यते' इति पद्मोत्तरखण्डे १०९ तमेऽध्याये। पुरुषसिंहेषु पुरुषश्रेष्ठेषु सावमाना सधिक्करा पापा दुःशीला। शूलेऽवतंसितं स्थापितम्। अनार्यं दुष्टं शीलं स्वभावो यस्याः सा कुलपांसनी वंशदूषिका। 'पांसनः कुलदूषक' इति वैजयन्ती। निर्भर्त्सयत् तर्जयत् भीषणया भयङ्करया भ्रुकुट्या भ्रुवा दूषितं ललाटं भालं येन सः काल इव यम इव। काललोहदण्डः इव कालायसदण्ड इव कर्कशः कठिनस्तेन दण्ड इव बाहुः करस्तेन रेखाम्बुजं रेखामयं कमलं रथाङ्गं चक्रं च लाञ्छनं चिन्हं यस्मिंस्तस्मिन्। हस्ताम्बुजे करकमले राजपुत्रं राजवाहनमवलम्ब्य गृहीत्वा सरभसं सत्वरम्। आचकर्षाकृष्टवानित्यर्थः। स्वभावधीरो निसर्गगम्भीरः सर्वेषां पौरुषाणां पराक्रमाणामतिभूमिः पराकाष्ठा। सहिष्णुता सहनशीलत्वमेका मुख्या प्रतिक्रिया प्रतिकारो यस्यास्तां दैवीममानुषीं भागधेयसम्बन्धिनीं वा तां शत्रुहस्तगमनरूपामापदमापत्तिमवधार्य निश्चित्य। हंसगामिनीति प्रियामन्त्रणम्। हंसकथाया पूर्वजन्मनि मृणालेन बद्धाद्धंसरूपान्मुनेरधिग-

---

१ 'जनाध्यारोपित' ब-व.

'मासद्वयम्' इति प्राणपरित्यागरागिणीं प्राणसमां समाश्वास्यारिवश्यतामयासीत्।

५ अथ विदितवार्तावार्तौ महादेवीमालवेन्द्रौ जामातरमाकारपक्षपातिनावात्मपरित्यागोपन्यासेनारिणा जिघांस्यमानं ररक्षतुः। न शेकतुस्तु तमप्रभुत्वादुत्तारयितुमापदः। स किल चण्डशीलश्चण्डवर्मा सर्वमिदमुदन्तजातं राजराजगिरौ तपस्यते दर्पसाराय संदिश्य सर्वमेव पुष्पोद्भवकुटुम्बकं सर्वस्वहरणपूर्वकं सद्य एव बन्धने क्षिप्त्वा कृत्वा च राजवाहनं राजकेसरिकिशोरकमिव दारुपञ्जरनिबद्धं मूर्धजजालविलीनचूडामणिप्रभावविक्षिप्तक्षुत्पिपासादिखेदं च तमवधूतदुहितृप्रार्थनस्याङ्गराजस्योद्धरणायाङ्गानभियास्यन्ननन्यविश्वासान्निनाय। रुरोध च बलभरदत्तकम्पश्चम्पाम्।

तस्य शापवृत्तान्तस्येत्यर्थः। 'अधीगर्थदयेशां कर्मणि' इति षष्ठी। वासु बाले। 'बाला स्याद्वासूरि' त्यमरः। मासद्वयमित्यनेन शापावधिर्बोधितः प्राणानां परित्यागे विसर्जने रागः प्रेम यस्यास्तां भर्तुरापद्दर्शनेन जीवितमप्यनिच्छन्तीमित्यर्थः। प्राणसमां स्वजीविततुल्यामित्यर्थः। तेन तस्या नाशे स्वनाशोऽपि नियत इति सूचितम्। अरिवश्यतां रिपोरधीनत्वमयासीदगमत्। यातेर्लुङ्।

अथेति। विदिता ज्ञाता वार्ता जामातृबन्धनवृत्तान्तो याभ्यां तौ। आर्तौ पीडितौ महादेवीमालवेन्द्रौ मानसारमहिषीमानसारौ आकारेण स्वरूपेण पक्षपातिनौ जामातुः पक्षे स्थिताविति यावत्। अरिणा चण्डवर्मणा जिघांस्यमानं हन्तुमिष्यमाणम्। हन्तेः सन्नन्तात्कर्मणि लटि शानच्। 'अज्झनगमां सनी' त्यनेन दीर्घः। जामातरं राजवाहनम्। आत्मनः परित्यागः स्वप्राणानां विसर्जनं तस्योपन्यासः कथनं तेन ररक्षतुः। यदि त्वमेनं हंसि तर्हि प्राणान् परित्यजाव आवामिति स्वप्राणत्यागभीत्या जामातारं ररक्षतुरित्यर्थः। अप्रभुत्वादनधिकारित्वादापदः कारागृहस्थितिरूपात्संकटादुत्तारयितुमुद्धर्तुं न शेकतुर्न चक्षमतुः। स इति। किलेति प्रसिद्धौ। चण्डशीलोऽतिकोपनस्वभावः। उदन्तजातं वार्ताकलापं राजराजगिरौ कैलासे तपस्यते तप आचरते। 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इत्यनेन क्यङि 'तपसः परस्मैपदं च' त्यनेन परस्मैपदे शतृप्रत्ययः। संदिश्य दूतमुखेन कथयित्वेत्यर्थः। पुष्पोद्भवस्य राजवाहनसुहृदः कुटुम्बकं गृहस्थपरिवारं सर्वस्वस्य हरणं पूर्वं यत्र यथा तथा। सद्य एव तदैव। बन्धने कारागृहे क्षिप्त्वा त्यक्त्वा। राजकेसरिणः सिंहश्रेष्ठस्य किशोरकमिव वत्समिव। दारुपञ्जरः काष्ठनिर्मितः पञ्जरः तत्र निबद्धं रुद्धं कृत्वा। मूर्धजजाले केशसमूहे विलीनः स्थितो यो मणिः पातालवासिन्या स्वविवाहोत्तरं दत्तं रत्नं तस्य प्रभावेण सामर्थ्येन विक्षिप्तो दूरीभूतः क्षुत्पिपासयोरशनस्य तृषायाश्च खेदः पीडा यस्य तम्। अवधूता तिरस्कृता दुहितृप्रार्थना कन्याविषयिणी याञ्चा येन तस्याङ्गराजस्याङ्गाधिपस्योद्धरणायोन्मूलनायाङ्गांस्तत्संज्ञकदेश-

चम्पेश्वरोऽपि सिंहवर्मा सिंह इवासह्यविक्रमः प्राकारं भेदयित्वा महता बलसमुदायेन निर्गत्य स्वप्रहितदूतव्राताहूतानां साहाय्यदानायातिसत्वरमापततां धरापतीनामचिरकालभाविन्यपि संनिधावदत्तापेक्षः साक्षादिवावलेपो वपुष्मानक्षमापरीतः प्रतिबलं प्रतिजग्राह। जगृहे च महति संपराये क्षीणसकलसैन्यमण्डलः प्रचण्डप्रहरणशतभिन्नवर्मा सिंहवर्मा करिणः करिणमवप्लुत्यातिमानुषप्राणबलेन चण्डवर्मणा। स च तद्दुहितर्यम्बालिकायामबलारत्नसमाख्यातायामतिमात्राभिलाषः प्राणैरेनं न व्ययूयुजत्। अपि त्वनीनयदपनीताशेषशल्यमकल्यसंधो बन्धनम्। अजीगणच्च गणकसंघैः 'अद्यैव क्षपावसाने विवाहनीया राजदुहिता' इति। कृतकौ-

---

मभियास्यन् अभिगमिष्यन्। चण्डवर्माऽङ्गाधिपं कन्यामम्बालिकां ययाचे तेनावमानितस्तद्विनाशायाङ्गानभिप्रस्थित इत्यर्थः। नान्यस्मिन् विश्वासात्। अन्यहस्ते संस्थाप्य गतेऽन्यः कदाचिन्मोचयेज्जामातरमिति भियेत्यर्थः। बलानां सैन्यानां भरेणाधिक्येन दत्त उत्पादितः कम्पो येन स चम्पां तदाख्यामङ्गराजधानीं रुरोधावरयामास। **चम्पेश्वर इति**। असह्यो विक्रमः पराक्रमो यस्य सः। प्राकारं नगरवप्रं भेदयित्वोद्घाट्य। बलसमुदायेन सैन्यसंघेन सहितः। सहार्थे तृतीयः। स्वेनात्मना प्रहिताः प्रेषिता दूतास्तेषां व्रातः समूहस्तेनाहूता आकारितास्तेषां साहाय्यदानाय साहाय्यं विधातुमतिसत्वरमतिजवेनेत्यर्थ आपततामागच्छतां धरापतीनां नृपाणामचिरभाविनि तूर्णं भविष्यति संनिधौ संनिधानेऽदत्तापेक्षस्तन्मार्गमनवलोक्येत्यर्थः। वपुष्मान् देहधारी अवलेपो गर्वः। अक्षमा क्रोधस्तया परीतो व्याप्तः। प्रतिबलं शत्रुसैन्यं प्रतिजग्राह न्यरुणत्। **जगृह इति**। महति संपराये महायुद्धे क्षीणं नष्टं सकलं सर्वं सैन्यमण्डलं सेनासंघो यस्य सः प्रचण्डानां भयंकराणां प्रहरणानामायुधानां शतेन भिन्नं वर्म कवचं यस्य सः। भिन्नमर्मेत्यपेक्षया भिन्नवर्मेत्येव पाठः साधीयान्। मर्मसु भिन्नेषु सिंहवर्मैवामरिष्यत्। करिणः स्वगजात्करिणं शत्रुगजमवप्लुत्योत्प्लुत्यातिमानुषमलौकिकं प्राणानां बलं सामर्थ्यं यस्य तेन। अलौकिकशक्तिशालिना चण्डवर्मणा स बन्दीकृत इत्यर्थः। **स इति**। तद्दुहितरि तत्कन्यायामबलारत्नं स्त्रीभूषणमिति समाख्याता प्रसिद्धा तस्यामतिमात्रमत्यन्तमभिलाष इच्छा यस्य सः। एनं चम्पेश्वरं प्राणैर्न व्ययूयुजज्जीवन्तमेवारक्षदित्यर्थः। अकल्यसंधः सत्यप्रतिज्ञः अपनीतान्युद्धृतान्यशेषाणि सकलानि शल्यानि शस्त्रखण्डा यस्य तं बन्धनं कारागृहमनयत् प्रापयत्। गणकसंघैर्मौहूर्तिकगणैः। क्षपावसाने रात्रेरन्ते प्रातःकाल इति यावत्। अजीगणन्निरणैषीदित्यर्थः। कृतमनुष्ठितं कौतुकमङ्गलं वैवाहिकं मांगल्यं येन

---

१ 'भिन्नमर्मा' **व-न.** २ 'अकल्प' **व.** ३ 'बन्धनगृहम्' **व-ब.**

सुकमङ्गले च तस्मिन्नेकपिङ्गाचलात्प्रतिनिवृत्यैणजङ्घो नाम जङ्घाकरिकः प्रभवतो दर्पसारस्य प्रतिसंदेशमावेदयत्— 'अयि मूढ, किमस्ति कन्यान्तःपुरदूषकेऽपि कश्चित्कृपावसरः। स्थविरः स राजा जराविलुप्तमानावमानचित्तो दुश्चरितदुहितृपक्षपाती यदेव किंचित्प्रलपति त्वयापि किं तदनुमत्या स्थातव्यम्। अविलम्बितमेव तस्य कामोन्मत्तस्य चित्रवधवार्ताप्रेषणेन श्रवणोत्सवोऽस्माकं विधेयः। सा च दुष्टकन्या सहानुजेन कीर्तिसारेण निगडितचरणा चारके निरोद्धव्या' इति। तच्चाकर्ण्य 'प्रातरेव राजभवनद्वारे स च दुरात्मा कन्यान्तःपुरदूषकः संनिधापयितव्यः चण्डपोतश्च मातङ्गपतिरुचितकल्पनोपपन्नस्तत्रैव समुपस्थापनीयः। कृतविवाहकृत्यश्चोत्थायाहमेव तमनार्यशीलं तस्य हस्तिनः कृत्वा क्रीडनकं तदधिरूढ एव गत्वा

तस्मिन् सति। एकपिङ्गः कुबेरस्तस्याचलात्कैलासात्। जङ्घाकरिकः जङ्घैव करी गमनवाहनं हस्ती यस्य सः। शैषिकः कन्। अथवा जङ्घैव करो राजदेयभागोऽस्यास्तीति मत्वर्थीयष्ठन्। 'हलकारा' इति प्रसिद्धः। प्रभवतो राज्ञः प्रतिसंदेशं प्रत्युत्तरमावेदयदकथयत्। मूढेत्यनेन तत्कृतकार्येऽरुचिः प्रदर्शिता। कन्याया अन्तःपुरस्य दूषकस्तस्मिन्। कृपाया दयाया अवसरः कालः। स्थविरो वृद्धो जरया वार्धक्येन। विलुप्ता नष्टौ मानापमानौ यस्य तथाभूतं चित्तं मानसं यस्यः सः। दुश्चरिता दुराचारा दुहिता कन्या तस्याः पक्षपाती सहायः यत्किंचिदसंबद्धं प्रलपत्यनर्थकं भाषते। 'प्रलापोऽनर्थकं वच' इत्यमरः। त्वयापि युक्तायुक्तविचारज्ञेनेत्यपेरर्थः। तस्य मूढनृपस्यानुमत्याऽनुमोदनेन वर्तितव्यं स्थातव्यं किम्। किंशब्द आक्षेपे। अविलम्बितमेव सत्वरमेव। कामेनोन्मत्तस्तस्य चित्रो विचित्रो वधो हननं तस्य वार्तायाः संदेशस्य प्रेषणेन श्रवणयोः कर्णयोरुत्सवः प्रमोदो विधेयः कार्यः। सहानुजेन कनीयसा भ्रात्रा सह। चारके बन्धने निरोद्धव्या स्थापनीया। तदिति। तद्वार्ताहरेण कथितमाकर्ण्य श्रुत्वा। दुरात्मा। दुष्टः। संनिधापयितव्य आनेयः। चण्डपोतस्तदभिधानो मातङ्गपतिर्गजराजः। उचिताभिर्योग्याभिः कल्पनाभिरलंकारैरुपपन्नो युक्तः। उपचितेतिपाठापेक्षयाऽयमेव साधीयान्[१]। तत्रैव राजद्वार एव। समुपस्थापनीय आनेयः। कृतं निर्वर्तितं विवाहकृत्यं परिणयनविधिर्येन सः। अनार्यं दुष्टं शीलं स्वभावो यस्य तम्। तस्य हास्तिनश्चण्डपोतस्य क्रीडनकं क्रीडासाधनं खेलनं कृत्वा। तदधिरूढ एव तमेव गजमारुह्य। शत्रुसाहाय्यकाय सिंहवर्मसाहाय्यं विदधातुं प्रत्यासीदतः समीपमागच्छतो राजन्यकस्य क्षत्रियसमूहस्य। 'गोत्रोक्षोष्ट्रोरभ्र०'

---

१ 'उपचित' न.

शत्रुसाहाय्यकाय प्रत्यासीदतो राजन्यकस्य सकोशवाहनस्यावग्रहणं करिष्यामि ' इति पार्श्वचरानवेक्षांचक्रे ।

4 निन्ये चासावहन्यन्यस्मिन्नुन्मिषत्येवोषोरागे राजपुत्रो राजाङ्गणं रक्षिभिः । उपतस्थे च क्षरितगण्डश्चण्डपोतः । क्षणे च तस्मिन्मुमुचे तदङ्घ्रियुगलं रजतशृंखलया । सा चैनं चन्द्रलेखाच्छविः काचिदप्सरोरूपिणी भूत्वा प्रदक्षिणीकृत्य प्राञ्जलिर्व्यजिज्ञपत्— 'देव, दीयतामनुग्रहार्द्रं चित्तम् । अहमस्मि सोमरश्मिसंभवा सुरतमञ्जरी नाम सुरसुन्दरी । तस्या मे नभसि नलिनलुब्धमुग्धकलहंसानुबद्धवक्त्रायास्तन्निवारणक्षोभविच्छिन्नविगलिता हारयष्टिर्यदृच्छया जातु हैमवते सरसि मन्दोदके मग्नोन्मग्नस्य महर्षेर्मार्कण्डेयस्य मस्तके मणिकिरणद्विगुणितपलितमपतत् । पातितश्च कोपितेन कोऽपि तेन मयि शापः—' पापे , भजस्व लोहजातिमजातचै-

---

त्यनेन युग् । कोशो धनसंचयो वाहनानि च तैः सहितस्यावग्रहणं बन्धनम् । ' अवग्रहो वृष्टिरोधे प्रतिबन्ध ' इति मेदिनी । पार्श्वचरान् समीपस्थान् अवेक्षांचक्रे ददर्श ।

निन्य इति । उन्मिषति विकासति उषोरागे प्रभातलौहित्ये । राजाङ्गणं राजगृहस्याजिरं निन्ये प्रापितः । क्षरितौ द्रवीभूतौ मदयुक्त इति यावद्गण्डौ कपोलौ यस्य सः । उपतस्थे प्राप्तः । अकर्मकाच्चेत्यनेनात्मनेपदम् । तेन ' उपाद्देवपूजा० ' ' वा लिप्सायाम् ' इति चेत्यन्यतरेणात्मनेपदमिति वदन् पदचन्द्रिकाकारः परास्तः । रजतशृङ्खलया रौप्यबन्धनरज्ज्वा स्वयमेव कर्तृभूतया तस्य राजकुमारस्याङ्घ्रियुगलं पादद्वयं मुमुचे तत्यजे । सा शृङ्खला चन्द्रस्य लेखाया इव छविः कान्तिर्यस्याः सा । अप्सरोरूपिणी धृताप्सरोरूपा प्राञ्जलिः कृतनमस्कारा व्यजिज्ञपद्विज्ञापनामकरोत् । अनुग्रहेण दययाऽऽर्द्रं द्रवीभूतं चित्तं मानसं दीयतां सानुग्रहं श्रोतव्यं मदीयभाषितमित्यर्थः । सोमरश्मिसंभवा चन्द्रकिरणोद्भूता सुरसुन्दरी देवाङ्गना । नभस्याकाशे नलिने कमले लुब्ध आसक्तो मुग्धो मूढो मुखकमलयोरनभिज्ञः कलहंसस्तेनानुबद्धमनुसृतं वक्त्रं मुखं यस्यास्तस्याः तस्य कलहंसस्य निवारणं रोधनं तस्य क्षोभन संभ्रमेण विच्छिन्ना त्रुटिताऽत एव गलिताधोभागे पतिता हारयष्टिर्मुक्तामाला । मुखे कमलभ्रान्त्या कलहंसानुसरणमिति भ्रान्तिमानलंकारः । हैमवते हिमालयसंबन्धिनि मन्दोदके तदाख्यसरस्यल्पोदके वा मग्नोन्मग्नस्यादौ मग्नः पश्चादुन्मग्नस्तस्यावगाहनक्रियामाचरत इत्यर्थः । महर्षेर्ऋषिश्रेष्ठस्य मस्तके शिरसि । मणीनां रत्नानां किरणैर्मयूखैर्द्विगुणितं द्विरावृत्तं वर्द्धितमिति यावत् पलितं जरया जातं शौक्ल्यं यत्र यथा तथाऽपतत् । कोपितेन मालापतनेन क्रोधमारोपितस्तेन । कुपेर्हेतुण्यन्तात्क्तः । अथवा तदस्य संजातमित्यर्थे इतच् । पातितो दत्तः । अजातमनुत्पन्नं चैतन्यं चेतनधर्मो यस्याः सा लोह-

---

१. ' अप्सरा भूत्वा ' ग. २. ' सरसि ' इत्येतन्नास्ति ग-पुस्तके.

तन्या सती' इति। स पुनः प्रसाद्यमानस्त्वत्पादपद्मद्वयस्य मासद्वयमात्रं संदानतामेत्य निस्तरणीयामिमामापदमपरिक्षीणशक्तित्वं चेन्द्रियाणामकल्पयत्। अनल्पेन च पाप्मना रजतशृंखलीभूतां मामैक्ष्वाकस्य राज्ञो वेगवतः पौत्रः, पुत्रो मानसवेगस्य, वीरशेखरो नाम विद्याधरः शंकरगिरौ समध्यगमत्। आत्मसात्कृता च तेनाहमासम्। अथासौ पितृप्रयुक्तवैरे प्रवर्तमाने विद्याधरचक्रवर्तिनि वत्सराजवंशवर्धने नरवाहनदत्ते विरसाशयस्तदपकारक्षमोऽयमिति तपस्यता दर्पसारेण सह समसृज्यत। प्रतिश्रुतं च तेन तस्मै स्वसुरवन्तिसुन्दर्याः प्रदानम्। अन्यदा तु वियति व्यवदायमानचन्द्रिके मनोरथप्रियतमामवन्तिसुन्दरीं दिदृक्षुरवशेन्द्रियस्तदिन्द्रमन्दिरद्युति कुमारीपुरमुपासरत्। अन्तरितश्च तिरस्करिण्या विद्यया स च तां तदा त्वदङ्कापाश्रयां सुरतखेदसुप्तगात्रीं त्रिभुवनसर्गयात्रासंहारसंबद्धाभिः कथाभिरमृत-

---

जातिं लोहत्वं भजस्व सेवस्व। प्रसाद्यमानः प्रीयमाणः तव पादपद्मस्य चरणकमलस्य। मासद्वयप्रमाणं मासद्वयमात्रं 'प्रमाणे द्वयसज्०' इत्यनेन मात्रच्। संदानतां पादबन्धनत्वमेत्य प्राप्य। निस्तरणीयां समापनीयामिमामापदं शृङ्खलात्वस्थितिरूपां विपत्तिम्। न परिक्षीणा नष्टा शक्तिः सामर्थ्यं येषां तेषां भावस्तम् स्वस्वविषयग्राहकत्वमिति यावद्। अकल्पयत्कृतवान्। अनल्पेन महता। अथवा न अल्पं यस्मात्तेन अत्यल्पेनेत्यर्थः। अयमेव पक्षः साधीयान्। यतो नासीत्तस्या महत्पापम्। पाप्मना पातकेन रजतशृङ्खलीभूतां रौप्यशृङ्खलतां गताम्। ऐक्ष्वाकस्येक्ष्वाकुकुलोत्पन्नस्य। पौत्रः नप्ता। शंकरगिरौ कैलासे। समध्यगच्छत्प्राप्नोत्। तेन वीरशेखरेणात्मसात्कृता स्वाधीनीकृता। असौ वीरशेखरः पित्रा स्वजनकेन प्रयुक्तमारब्धम् यद्वैरं तस्मिन् प्रवर्तमाने तद्वैरं प्रतिपालयतीत्यर्थः। वत्सराजस्य तदाख्यकौशाम्बीराजस्य वंशवर्धने पुत्रे नरवाहनदत्ते तन्नाम्नि राजनि विरसो विफल आशय इच्छा यस्य सः। स्वयं तत्प्रतीकाराक्षम इत्यर्थः। तस्य नरवाहनदत्तस्यापकारे निग्रहे क्षमः समर्थः। इतिशब्दो हेतौ। तपस्यता तपश्चर्यां कुर्वता। समसृज्यत संगतोऽभवत्। तेन दर्पसारेण तस्मै वीरशेखराय स्वसुर्भगिन्याः प्रदानमर्पणं प्रतिश्रुतं प्रतिज्ञातम्। व्यवदायमाना शुद्धा निर्मलेति यावच्चन्द्रिका ज्योत्स्ना यस्मिंस्तस्मिन्वियति सत्याकाशे सति। मनोरथैः प्रियतमां वल्लभां न पुनरवलोकनादिभिरिति भावः। दिदृक्षुर्द्रष्टुमिच्छुः। दृशेः सन्नन्तादुः। अवशानीन्द्रियाणि यस्य सः। इन्द्रमन्दिरस्येव इन्द्रगृहस्येव द्युतिः कान्तिर्यस्य तत्कुमारीपुरं राजकन्यान्तःपुरमुपासरदुपागच्छत्। तिरस्कारिण्याऽन्तर्धानसाधनीभूतया विद्ययाऽन्तरित आच्छन्नः। तवाङ्क उत्सङ्गेऽपाश्रयः शिरोभागो यस्यास्ताम्। त्रिभुवनस्य सर्ग उत्पत्तिर्यात्रा

---

१ 'च पञ्चेन्द्रियाणाम्' ब. २ 'पितृप्रयुक्तो वैरे' ब. ३ 'वर्तमाने' ब-ब। ४ 'त्वदङ्कोपाश्रयाम्' ब. ५ 'सुरतखेद' इत्यतन्नास्ति ब. पुस्तके. ६ 'संश्रिताभिः' ब.ब.

स्यन्दिनीभिः प्रत्यानीयमानरागपूरां न्यरूपयत् । स तु प्रकुपितोऽपि त्वदनुभावप्रतिबद्धनिग्रहान्तराध्यवसायः समालिङ्ग्येतरेतरमत्यन्तसुखसुप्तयोर्युवयोर्दैवदत्तोत्साहः पाण्डुलोहशृङ्खलात्मना मया पादपद्मयोर्युगलं तव निगडयित्वा सरोषरभसमपासरत् । अवसितश्च ममाद्य शापः । तच्च मासद्वयं तव पारतन्त्र्यम् । प्रसीदेदानीम् । किं तव करणीयम् ' इति प्रणिपतन्तीं ' वार्तयानया मत्प्राणसमां समाश्वासय ' इति व्यादिश्य विससर्ज ।

5 तस्मिन्नेव क्षणान्तरे ' हतो हतश्चण्डवर्मा सिंहवर्मदुहितुरम्बालिकायाः पाणिस्पर्शरागप्रसारिते बाहुदण्ड एव बलवदवलम्ब्य सरभसमाकृष्य केनापि दुष्करकर्मणा तस्करेण ऐकेनैव[1] नखरप्रहारेण[2] राजमन्दिरोद्देशं च शवशतमयमापादयन्नचकितगति-

---

गमनं नित्यस्थितिरिरति यावत् संहारः प्रलयस्तत्संबद्धाभिः । अथवा त्रिभुवनस्य लक्षणया तद्वासिजनस्य सर्गेण मोहेन यात्रा गमनमकार्यकरणमिति यावत्तेन संहारो नाशस्तत्संबद्धाभिः । यथा यादवानां मद्यपानेन देवेन्द्रस्य पराङ्गनागमनेन वालिरावणयोश्च परस्त्रीसंबन्धेनेत्यादिभिः कथाभिरित्यर्थः । अमृतस्यन्दिनीभिरमृतस्राविणीभिः प्रत्यानीयमानो वर्धमान इति यावद्रागपूरः प्रेमाधिक्यं यस्यास्तां न्यरूपयत् व्यलोकयत् । प्रकुपितः क्रुद्धः । स्वभार्यात्वेन संकल्पितामन्यासक्तां दृष्ट्वा क्रुद्ध इति भावः । तवानुभावः प्रभावस्तेन प्रतिबद्धो रुद्धो निग्रहान्तरस्य अन्यो निग्रहो निग्रहान्तरं हननं तस्याध्यवसाय उद्यमो यस्य सः । अथवा निग्रहे निग्रहविषयेऽन्तरोऽन्तर्गतोऽध्यवसाय इत्यर्थः । इतरेतरमन्योन्यं समालिङ्ग्य संश्लिष्य । अत्यन्तसुखेन सुप्तयोः पाण्डुलोहं रजतं तस्य शृङ्खला आत्मा यस्यास्तया । ' सर्वं तैजसं लोहम् ' इति कोशात्तैजसानां लोहत्वेन पाण्डुलोहस्य रजतत्वम् । युगलं द्वयं निगडयित्वा बद्ध्वा । सरोषरभसं क्रोधेन वेगेन चेत्यर्थः । अपासरत् दूरमगच्छत् । अवसितः समाप्तः । पारतन्त्र्यं च पराधीनता चावसितं समाप्तम् । अतस्ते आपदोऽस्या उद्धरणमपि तूर्णमिति सूचितम् । किं करणीयं विधेयम् । अनया वार्तया तव शापवृत्तान्तेनेत्यर्थः । समाश्वासय सान्त्वय । व्यादिश्याज्ञाप्य विससर्ज प्रजिघाय ।

तस्मिन्निति । क्षणान्तरेऽवसरान्तरे । ' उत्सवेऽवसरे क्षण ' इति महीपः । पाणिस्पर्शस्य करग्रहणस्य रागेण प्रेम्णा प्रसारिते बाहुदण्डे करदण्डे । बलवद् दृढमवलम्ब्य गृहीत्वा । बलवदित्यनेन परिश्रमेणापि मुक्त्यभावः सूचितः । सरभसं सवेगमाकृष्यात्मसमीपं कृत्वा । दुष्करं भयानकं कर्म यस्य तेन । नखरप्रहारेण असिपुत्रिकाप्रहारेण । ' नखरस्त्वासिपुत्रिका ' इति वैजयन्ती

---

[1] ' एकेनैव ' इत्येतन्नास्ति न-पुस्तके [2] ' नखप्रहारेण ' न.

रसौ विहरति इति वाचः समभवन्। श्रुत्वा चैतत्तमेव मत्तहस्तिनमुदस्ताधोरणो राजपुत्रोऽधिरुह्य रंहसोत्तमेन राजभवनमभ्यवर्तत। स्तम्बेरमरयावधूतपदातिदत्तवर्त्मा च प्रविश्य वेश्माभ्यन्तरमदभ्राभ्रनिर्घोषगम्भीरेण स्वरेणाभ्यधात्—'कः स महापुरुषो येनैतन्मानुषमात्रदुष्करं महत्कर्मानुष्ठितम्। आगच्छतु। मया सहेमं मत्तहस्तिनमारोहेतु। अभयं मदुपकण्ठवर्तिनो देवदानवैरपि विगृह्णानस्य' इति। निशम्यैवं स पुमानुपोढहर्षो निर्गत्य कृताञ्जलिराक्रम्य संज्ञासंकुचितं कुञ्जरगात्रमसक्तमध्यरुक्षत्। आरोहन्तमेवैनं निर्वर्ण्य हर्षोत्फुल्लदृष्टिः 'अये, प्रियसखोऽयमपहारवर्मैव' इति पश्चान्निषीदतोऽस्य बाहुदण्डयुगलमुभयभुजमूलप्रवेशितमग्रेऽवल-

अस्य हत इत्यत्र करणत्वेनान्वयः। नखेति पाठे नखप्रहारेण व्याघ्रायुधस्य प्रहारेणेत्यर्थः। 'नखं व्याघ्रनखं व्याघ्रायुधम्' इति 'वाघनखे' इति महाराष्ट्रभाषायाम्। राजमन्दिरस्य राजगृहस्योद्देशं प्रदेशं शवशतमयं गतजीवितदेहानां शतैः पूर्णमित्यर्थः आपादयन् कुर्वन्। न चकिता त्रस्ता चञ्चलेति यावद्गतिर्गमनं यस्य सः। विहरति परिभ्रमति। वाचः समभवन् सर्वत एवं वाचः प्रादुरभवन्नित्यर्थः। एतदुपर्युक्तं श्रुत्वाऽऽकर्ण्य। उदस्तो दूरीकृत आधोरणो हस्तिपको येन सः। मत्तहस्तिनमुन्मत्तं गजमधिरुह्य। उत्तमेन रंहसातिवेगेनेत्यर्थः। स्तम्बेरमस्य हस्तिनो रयेण वेगेनावधूता निःसारिताः पदातयः पत्तयस्तैर्दत्तं वर्त्म मार्गो यस्य सः। 'हलदन्तात्सप्तम्याः ०' इत्यनेन स्तम्बेरमशब्देऽलुक्। 'रयो वेगो जवो' इति वैजयन्ती। अदभ्राणि विपुलान्यभ्राणि मेघास्तेषां निर्घोष इव गर्जनेव गम्भीरस्तेन स्वरेणाभ्यधादवदत्। कः स महापुरुषः पुरुषश्रेष्ठो येन महानुभावेनैतत् चण्डवर्महननरूपं मानुष एव मानुषमात्रं तेन दुष्करं कर्तुमशक्यमलौकिकमिति यावत्। मयूरव्यंसकादित्वान्मानुषमात्रमिति समासः। ममोपकण्ठे समीपे वर्तते तस्य देवदानवैः सुरासुरैरपि विगृह्णानस्य युध्यमानस्य। निशम्येति। उपोढ उद्गतो हर्षो यस्य सः। निर्गत्य बहिरागत्य कृताञ्जलिः कृतनमस्कारः संज्ञया संकेतेन संकुचितं नम्रीभूतं कुञ्जरगात्रं हस्तिनः पूर्वपादभागमित्यर्थः आक्रम्यारुह्य। 'गात्रं गजाग्रजङ्घादौ' इति मेदिनी। असक्तं त्वरितमध्यरुक्षत्। 'शल इगुपधादनिटः क्सः' इति क्सः। एवं पूर्वोक्तं दुष्करकर्मकारिणं निर्वर्ण्य दृष्ट्वा। हर्षेण मोदेनोत्फुल्ला विकसिता दृष्टिर्यस्य सः। अये इत्यतर्कितागमने संबोधनं तथा च केशवः 'अतर्कापतिते त्वये' इति। प्रियसखः प्रियसुहृद्। 'राजाहःसखिभ्यष्टच्' इत्यनेन समासान्तष्टच्। पश्चात्पृष्ठभागे निषीदत उपाविशतोऽस्यापहारवर्मणः बाहुदण्डयुगलं करद्वयमुभयोर्भुजमूलयोः प्रवेशितं स्थापितमवलम्ब्याश्रित्य स्वमङ्गं स्वशरीरमालिङ्गयामास तेनाश्लेषयामास। हेतुमण्ण्यन्ताल्लिट्। एवमात्मानं तेनाश्लेष्य स्वय-

१ 'पाति' ब ब.

म्य स्वमङ्गमालिङ्गयामास। स्वयं च पृष्ठतो वलिताभ्यां भुजाभ्यां पर्यवेष्टयत्। तत्क्षणोपसंहृतालिङ्गनव्यतिकरश्चापहारवर्मा चापचक्रकणपकर्पणप्रासपट्टिशमुसलतोमरादिप्रहरणजातमुपयुञ्जानान्बलावलिप्तान्प्रतिबलवीरान्बहुप्रकारायोधिनः क्षितौ विचिक्षेप। क्षणेन चाद्राक्षीत्तदपि सैन्यमन्येन समन्ततोऽभिमुखमभिधावता बलनिकायेन परिक्षिप्तम्।

6 अनन्तरं च कश्चित्कर्णिकारगौरः कुरुविन्दसवर्णकुन्तलः कमलकोमलपाणिपादः कर्णचुम्बिदुग्धधवलस्निग्धनीललोचनः कटितटनिविष्टरत्ननखरः पट्टनिवसनः

मालिङ्गितवानित्याह। स्वयमिति। पृष्ठतो वलिताभ्यां पृष्ठभागे वक्रीकृताभ्यामित्यर्थः। एतेन पूर्वालिङ्गनोत्तरं स पृष्ठदेशे न्यषीदत्पश्चात्स्वयमालिलिङ्गेति ज्ञायते। अन्यथा गजमुखतः समागतस्यालिङ्गने पृष्ठदेशे भुजवलनकारणं किं भवेत्। अनयैव रीत्या निर्वाहे कुञ्जरगात्रशब्दस्य गजपूर्वजङ्घावाचित्वमनादृत्य पृष्ठभागत एव स गजमारूढ इति निवेदयन् भूषणाकारः परास्तः। तस्मिन् क्षणे उपसंहृत समापित आलिङ्गनस्य व्यापारो येन सः। चापं धनुः चक्रं रथाङ्गसदृशमायुधविशेषः कणपो लोहस्तम्भः कर्पणः कुटिलाग्रमायुधम्। 'लोहस्तम्भस्तु कणपः कुटिलाग्रस्तु कर्पण' इति वैजयन्ती। प्रासः कुन्तः 'कुन्तः प्रासे' इति विश्वः। पट्टिं ललाटं श्यति तनूकरोति स विशालाग्र आयुधविशेषः। 'पट्टिः स्त्री पटभेदे स्याल्ललाटे' इति मेदिनी। मुसलं मुसलाकारमायुधं तोमरो वेगदण्डवान् च इमे आदयो येषां तेषां प्रहरणानां शस्त्राणां जातं समूहमुपयुञ्जानान् धारयतो बहुभिरनेकैः प्रकारैर्युध्यन्ते तान्। सुप्यजाताविति णिनः। परिक्षिपतः पातयतः जनान् इति शेषः। प्रतिबलवीरान् शत्रुयोधान् विचिक्षेप पातयामास। तदपि सैन्यं जनपीडकं शत्रुसैन्यम्। अभिमुखं संमुखमभिधावता वेगेनागच्छता बलनिकायेन सैन्यसमूहेन समन्तत आसमन्तात् परिक्षिप्तं वेष्टितमद्राक्षीदवालुलोकत्। 'स्यान्निकायः पुञ्जराशी' इत्यमरः।

अनन्तरमिति। कर्णिकार इव द्रुमोत्पल इव गौरः सितः कुरुविन्देन रत्नविशेषेण सवर्णाः समानाः कुन्तला यस्य सः। 'कुरुविन्दं रत्नभेद' इति मेदिनी। कमलमिव कोमलं मृदु पाणिपादं करचरणं यस्य सः। मृदुकरचरणवत्त्वं सुलक्षणं तदुक्तं वराहमिहिरेण 'अश्वेतरक्तमृदुलौ कमलोदराभौ श्लिष्टाङ्गुली रुचिरताम्रतलौ सुपार्ष्णी। उष्णौ शिराविरहितौ च निगूढगुल्फौ कूर्मोन्नतौ च चरणौ मनुजेश्वरस्य' इति। कर्णचुम्बिनी कर्णान्तायते दुग्धधवले पयःश्वेते स्निग्धे नीले नीलवर्णे च लोचने नयने यस्य सः। लोचनस्य मध्यभागः कृष्णवर्णः अवशिष्टस्तु श्वेत इति तात्पर्यम्। कटितटे निविष्टः स्थितो रत्ननखरो रत्नयुक्तो नखरः छुरिका यस्य सः। पट्टं दुकूलं निवसनं वस्त्रं यस्य सः। कृशमकृशं चोदरं वक्षःस्थलं यस्य सः। विशालवक्षास्तनुमध्यश्चेत्यर्थः। 'उरो

---

१ 'उपयुञ्जानः' ब. २ 'नखः' न.

कृशाकृशोदरोरःस्थलः कृतहस्ततया रिपुकुलमिषुवर्षेणाभिवर्षन्पादाङ्गुष्ठनिष्ठुरावघृष्ट-कर्णमूलेन प्रजविना गजेन संनिकृष्य पूर्वोपदेशप्रत्ययात् ‘अयमेव स देवो राजवाहनः’ इति प्राञ्जलिः प्रणम्यापहारवर्मणि निविष्टदृष्टिराचष्ट—‘त्वदादिष्टेन मार्गेण संनिपातितमेतदङ्गराजसाहाय्यदानायोपस्थितं राजकम्। अरिबलं च विहतविध्वस्तं स्त्रीबालहार्यशस्त्रं वर्तते। किमन्यत्कृत्यम्’ इति। हृष्टस्तु व्याजहारापहारवर्मा–‘देव, दृष्टिदानेनानुगृह्यतामयमाज्ञाकरः। सोऽयमप्यहमेवामुना रूपेण धनमित्राख्यया चान्तरितो मन्तव्यः। स एवायं निर्गमय्य बन्धनादङ्गराजमपवर्जितं च कोशवाहनमेकीकृत्यास्मद्गृह्येणामुना सह राजन्यकेनैकान्ते सुखोपविष्टमिह देवमुपतिष्ठतु यदि न दोषः’ इति। देवोऽपि ‘यथा ते रोचते’ इति तमाभाष्य गत्वा च तन्निर्दिष्टेन मार्गेण नगराद्बहिरतिमहतो रोहिणद्रुमस्य कस्यचित्क्षौमावदातसैकते गङ्गातरङ्गपवन

ललाटं वदनं च पुंसां विस्तीर्णमेतत्त्रितयं प्रशस्तम्’ इति। कृतहस्ततया शिक्षितहस्ततया। ‘शिक्षिते कृतमर्थवद्’ इति भागुरिः। रिपुकुलमरिसमूहमिषुवर्षेण बाणवृष्ट्याऽभिवर्षन् प्रहरन्। पादाङ्गुलिभिः चरणाग्रैर्निष्ठुरं निर्दयमवघृष्टं ताडितं कर्णमूलं यस्य तेन प्रजविना वेगवता। संनिकृष्य समीपमेत्य। पूर्वोपदेशप्रत्ययात् प्राक्कथनविश्वासात्। इतीत्यस्याग्रे ज्ञात्वेति शेषः। निविष्टा दत्ता दृष्टिर्येन सः। आचष्टाकथयत्। त्वयाऽऽदिष्टेन कथितेन मार्गेण पथा। संनिपातितमानीतम्। राजकं राजसमूहः। अरिबलं शत्रुसैन्यं विहतविध्वस्तं नाशितमित्यर्थः। अत एव स्त्रीभिर्बालैर्वा हार्याणि हर्तुं योग्यानि शस्त्राणि यस्य तथाभूतम्। हृष्टः संतुष्टः। दृष्टिदानेनावलोकनेन। आज्ञाकरः सेवकः। सोऽयमपि पुरो दृश्यमानोऽप्यमुना रूपेण धनमित्राख्यया धनमित्रेत्यभिधानेन चान्तरितोऽहं मन्तव्यो ज्ञातव्यः। पुरोदृश्यमानमेनमपि मामेव धनमित्रनाम्ना छन्नं जानीहीत्यर्थः। स इति। बन्धनात्कारागृहादङ्गराजमङ्गेश्वरं निर्गमय्य निष्कास्य। ‘लयपिलघुपूर्वाद्’ इत्यनेन णेरयादेशः। अपवर्जितमितस्ततः प्रसृतं कोशवाहनं शत्रोर्धनं हस्त्यश्वादि चैकीकृत्य संगृह्य अस्मद्गृह्येणास्माकं पक्षे स्थितेन। ‘पदास्वैरिबाह्यापक्षेषु’ इति गृहेः क्यप्। राजन्यकेन नृपसमूहेन सह। ‘सहयुक्तोऽप्रधाने’ इति तृतीया। सुखोपविष्टं सुखासीनं देवं त्वामुपतिष्ठतु प्राप्नोतु। ते तुभ्यं ‘रुच्यर्थानां प्रीयमाणः’ इत्यनेन संप्रदानत्वम्। तेनापहारवर्मणा निर्दिष्टं प्रदर्शितं तेन। ग्रामाद्बहिः ‘अपपरिबहिरञ्चवः पञ्चम्या’ इत्यनेन समासविधानाज्ज्ञापकाद्बहिर्योगे पञ्चमी। वस्तुतोऽत्रत्यं पञ्चम्या इति पदं ज्ञापकमित्यलम्। रोहिणद्रुमस्य वटवृक्षस्य। ‘वटवृक्षस्तु रोहिणः’ इति वैजयन्ती। क्षौमं दुकूलमिवावदातं स्वच्छं यत् सैकतं वालुकामयं तस्मिन्। गङ्गाया भागीरथ्यास्तरङ्गपवनस्य

---

१ ‘सोऽयमेव ह्यमुना’ न. २ ‘अद्य’ व. ३ ‘कस्याचिन्मूले’ व.

पातशीतले तले द्विरदादवततार । प्रथमसमवतीर्णेनापहारवर्मणा च स्वहस्तसत्वरसमीकृते मातङ्ग इव भागीरथीपुलिनमण्डले सुखं निषसाद । तथा निषण्णं च तमुपहारवर्मार्थपालप्रमतिमित्रगुप्तमन्त्रगुप्तविश्रुतैर्मैथिलेन च प्रहारवर्मणा, काशीभर्त्रा च कामपालेन, चम्पेश्वरेण सिंहवर्मणा सहोपागत्य धनमित्रः प्रणिपपात । देवोऽपि हर्षाविद्धमभ्युत्थितः 'कथं समस्त एष मित्रगणः समागतः, को नामायमभ्युदयः' इति कृतयथोचितोपचारान्निर्भरतरं परिरेभे । काशीपतिमैथिलाङ्गराजांश्च सुहृन्निवेदितान् पितृवदपश्यत् । तैश्च हर्षकम्पितपलितं सरभसोपगूढः परमभिननन्द । ततः प्रवृत्तासु प्रीतिसंकथासु प्रियवयस्यगणानुयुक्तः स्वस्य च सोमदत्तपुष्पोद्भवयोश्चरितमनुवर्ण्य सुहृदामपि वृत्तान्तं क्रमेण श्रोतुं कृतप्रस्तावस्तांश्च तदुक्तावन्वयुङ्क्त । तेषु प्रथमं प्राह स्म किलापहारवर्मा —

इति श्रीदण्डिनः कृतौ दशकुमारचरिते राजवाहनचरितं नाम प्रथम उच्छ्वासः ।

वीचियुक्तवायोः पातेनागमनेन शीतले शीते तले । द्विरदाद्धस्तिनोऽवततारावरुरोह । प्रथममादौ समवतीर्णेन भूमिमागतेन । स्वहस्तेन स्वकरेण सत्वरं तूर्णं समीकृते समतां गमिते । मातङ्ग इव गज इव । गजवत्सौख्यदत्वात्तत्साम्यम् । भागीरथ्याः पुलिनमण्डले सैकतप्रदेशे । निषसादोपविवेश । निषण्णं स्थितम् उपहारवर्मादयः षड् मित्राणि । मैथिलो मिथिलानायकः पितुर्मित्रम् । प्रणिपपात नमश्चकार । देवोऽपि राजवाहनोऽपि हर्षेणानंदेनाविद्धो यथा तथाऽभ्युत्थितस्तेषां सत्कारार्थमुत्थितः । समस्त एव सकल एव मित्रगणः सुहृत्समूहः समागतः प्राप्तः । को नामानिर्वचनीय इत्यर्थः । अभ्युदयः समृद्धिः । कृत आचरितो यथोचितं यथायोग्यमुपचारो मानो येषां तान् । निर्भरतरं दृढीयः परिरेभे समालिलिङ्ग । सुहृदाऽपहारवर्मणा निवेदितान् पितृवज्जनकेन तुल्यम् । अपश्यत्पितृवत्तेषां संमानमकरोदित्यर्थः । तैरङ्गराजादिभिः हर्षेण कम्पितं चलितं पलितं जराजनितं शौक्ल्यं लक्षणया तद्युक्ताः केशा यत्र यथा तथा । सरभसं सत्वरमुपगूढ आश्लिष्टः परमतिशयमभिननन्द तुतोष । तत इति । ततो मानानन्तरं प्रीतिसंकथासु प्रेमालापेषु प्रवृत्तासु समारब्धासु प्रियवयस्यगणेन प्रियसुहृदां समूहेनानुयुक्तः पृष्टः स्वस्य आत्मनः । चरितं वृत्तान्तमनुवर्ण्य कथयित्वा । सुहृदामपहारवर्मादीनां सप्तानां वृत्तान्तं वार्तां श्रोतुमाकर्णयितुं कृतः प्रस्ताव उपक्रमो येन सः । तान् अपहारवर्मादीन् । तदुक्तौ तस्य वृत्तान्तस्योक्तौ कथनेऽन्वयुङ्क्त न्ययोजयत् । तेषु सुहृदां मध्ये प्रथममादौ प्राह स्मोक्तवान् । 'ब्रुव पञ्चानामादित आहो ब्रुवः' इत्यनेनाहादेशः स्मयोगे च 'लट् स्मे' इत्यनेन भूते लट् ।

इति श्रीदण्डिकृतदशकुमारचरितव्याख्यायां बालबोधिन्यां राजवाहनचरितं नाम प्रथम उच्छ्वासः

---

१ 'मातङ्ग इव स्फटिकमय इव' ब. २ 'उत्पीडिततरम्' ब-ब. ३ 'हर्षनिर्भरतरम्' ब.

द्वितीयोच्छ्वासः ।

1 'देव, त्वयि तदावतीर्णे द्विजोपकारायासुरविवरं त्वदन्वेषणप्रसृते च मित्रगणेऽहमपि महीमटन्नङ्गेषु गङ्गातटे बहिश्चम्पायाः 'कश्चिदस्ति तपःप्रभावोत्पन्नदिव्यचक्षुर्मरीचिर्नाम महर्षिः' इति कुतश्चित्संलपतो जनसमाजादुपलभ्यामुतो बुभुत्सुस्त्वद्गतिं तमुद्देशमगमम् । न्यशामयं च तस्मिन्नाश्रमे कस्यचिच्चूतपोतकस्य च्छायायां कमप्युद्विग्नवर्णं तापसम् । अमुना चातिथिवदुपचरितः क्षणं विश्रान्तः 'क्वासौ भगवान्मरीचिः, तस्मादहमुपलिप्सुः प्रसङ्गप्रोषितस्य सुहृदो गतिम्, आश्चर्यज्ञानविभवो हि स महर्षिर्मह्यां विश्रुतः' इत्यवादिषम् । अथासावुष्णमायतं च निःश्वस्याशंसत्—'आसीत्तादृशो मुनिरस्मिन्नाश्रमे । तमेकदा काममञ्जरी

श्रीवेङ्कटेशो विजयते ।

कथाश्रवणायोन्मुखीकर्तुमाह । देवेति । तदा तस्मिन्काले । द्विजोपकाराय ब्राह्मणोपकारार्थमसुरविवरं पातालबिलमवतीर्णे गते । तवान्वेषणं मार्गणं तस्मै प्रसृतेऽतिक्रान्ते मित्रगणे सुहृद्वर्गे । महीमटन् पृथ्व्या उपरि भ्रममाणः । अङ्गेषु तदाख्यदेशे गङ्गातटे भागीरथीतीरे चम्पायास्तदाख्यनगर्यं बहिः । तपसस्तपश्चर्यायाः प्रभावेण सामर्थ्येनोत्पन्नं संजातं दिव्यमलौकिकं लौकिकचक्षुषोऽविषयीभूतविषयद्रष्टृ चक्षुर्नयनं लक्षणया ज्ञानं यस्य सः । कुतश्चित्कस्मादपि संलपतो मिथो भाषमाणाज्जनसमाजाल्लोकसमूहादुपलभ्य ज्ञात्वा । अमुतस्तस्मान्मरीचेः त्वद्गतिं तव वार्तामिति यावद्बुभुत्सुर्बोद्धुमिच्छुः । बुध्यतेः सन्नन्तादुः । तमुद्देशं मुनिनिवासभूतं प्रदेशमगमम् गतवान् । तस्मिन्नाश्रमे गङ्गातीरस्थे मरीचिमुनेराश्रमे चूतपोतकस्याम्रवृक्षकस्य । 'पोतः शिशौ' इति मेदिनी । उद्विग्नस्येव खिन्नस्येव वर्णो यस्य तं तापसं मुनिम् । 'अणूचे' त्यनेन तपःशब्दान्मत्वर्थीयोऽञ् । न्यशामयं दृष्टवान् । अमुना तेन तापसेन । अतिथिवदतिथिना तुल्यं यथा तथोपचरितः सत्कृतः । 'तेन तुल्यम् ०' इत्यनेन वतिः । क्षणं स्वल्पकालं विश्रान्तः कृतश्रमपरिहारः । क्व कुत्र भगवानैश्वर्यादिषट्कयुतः मरीचिस्तदाख्यया प्रसिद्धो मुनिः । तस्मान्मुनेः । उपलिप्सुर्ज्ञातुमिच्छुः । लभेरुपपूर्वात्सन्युकारः । 'सनि मीमाघुर्भ०' त्यनेनाकारः । प्रसङ्गेन कारणेन प्रोषितस्य गतस्य । 'प्रसङ्गः कारणं हेतुः' इति वैजयन्ती । सुहृदो मित्रस्य गतिं वार्ताम् । आश्चर्यश्चमत्कारजनको ज्ञानस्य विभवः सामर्थ्यं यस्य सः । हीति प्रसिद्धौ । मह्यां भूमौ विश्रुतः ख्यातः । इतिशब्दः समाप्तौ । अवादिषमुक्तवान् । वदतेर्लुङ् । अथ मद्भाषणानन्तरम् । असौ तापसः । आयतं दीर्घं निश्वस्य नासिकया दीर्घं श्वासं त्यक्त्वा । अशंसदकथयत् । आसीदिति । तादृश आश्चर्यज्ञानज-

नामाङ्गपुरीवतंसस्थानीया वारयुवतिरश्रुबिन्दुतारकितपयोधरा सनिर्वेदमभ्येत्य कीर्णशिखण्डास्तीर्णभूमिरभ्यवन्दिष्ट। तस्मिन्नेव च क्षणे मातृप्रमुखस्तदाप्तवर्गः सानुक्रोशमनुप्रधावितस्तत्रैवाविच्छिन्नपातमपतत्। स किल कृपालुस्तं जनमार्द्रया गिराश्वास्यार्तिकारणं तां गणिकामपृच्छत्। सा तु सव्रीडेव सविषादेव सगौरवेव चाब्रवीत्—'भगवान्, ऐहिकस्य सुखस्याभाजनं जनोऽयमामुष्मिकाय श्वोवसीयायार्ताभ्युपपत्तिवित्तयोर्भगवत्पादयोर्मूलं शरणमभिप्रपन्नः' इति। तस्यास्तु जनन्युदञ्जलिः पलितशारशिखण्डबन्धस्पृष्टमुक्तभूमिरभाषत—'भगवन्, अस्या मे

नकः। आसीदित्यनेन भूतकालीनत्वं तस्य ज्ञायते। एकदा एकस्मिन्काले। अङ्गपुरीवतंसस्थानीया; अङ्गपुर्याः शेखरभूता। अवतंसशब्दस्याकारस्य 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्यनेन लोपः। 'अवतंसो न स्त्रियां स्यात्कर्णपूरे च शेखरे' इति मेदिनी। वारयुवतिर्वेश्या। अश्रुबिन्दुभिर्नेत्रजलकणैस्तारकितौ संजाततारकौ पयोधरौ स्तनौ यस्याः सा। 'तदस्य संजातम्' इतीतच्। सनिर्वेदं सावमानमभ्येत्य प्राप्य। कीर्णेन प्रसृतेन शिखण्डेन केशपाशेनास्तीर्णा प्रावृता भूमिर्यया सा। अभ्यवन्दिष्ट प्राणंसीत्। तस्मिन्निति। माता प्रमुखा प्रधाना यस्य स तस्या आप्तवर्गो बान्धवसमूहः सानुक्रोशं सदयमनुप्रधावितोऽनुसृतः। न विच्छिन्नः पातः पतनं यत्र यथा स्यात्तथा। आगताः सर्वेऽपि भूमावपतन्निति तात्पर्यम्। स मुनिः कृपालुर्दयालुस्तं जनं गणिकाबन्धुगणम्। आर्द्रया गिरा मृदुना भाषणेनाश्वास्य सान्त्वयित्वा। आर्तिकारणं दुःखहेतुं गणिकां प्रथमागतां वेश्यामपृच्छत्पृष्टवान्। सव्रीडेव सलज्जेव। एतेन लज्जादयस्तया दर्शिता न सत्या अपि त्वभिनीता इति ज्ञायते। सविषादेव सदुःखेव सगौरवेव। भवादृशामग्रे आगमनं लज्जोत्पादकमिति व्रीडा दुःखस्याधिक्याद्वा मातुरपराधकथनमयुक्तमिति वा सदुःखा। दुःखदूरीकरणार्हस्थानलाभात्सगौरवा चेत्यवधेयम्। भगवन्निति। ननु भगवतो महर्षेर्मरीचेरुत्पन्नदिव्यनयनत्वात्कथमियं गणिका मां प्रतारयितुमागतेति न जातं ज्ञानमिति चेन्न। जातेऽपि तादृशे ज्ञाने स्वीयप्राक्तनकर्मफलस्यापरिहरणीयतया सर्वं सोढं महामुनिनेत्यवधेयम्। ऐहिकस्येहलोकोद्भवस्य सुखस्याभाजनमपात्रमयं जनो मल्लक्षणो जनः आमुष्मिकाय परलोकोद्भवाय श्वोवसीयाय श्वोजायमानाय कल्याणाय। 'श्वःश्रेयसे स्यात्कल्याणं श्वोवसीयं शिवं शुभम्' इति हलायुधः। 'श्वसो वसीयः श्रेयस' इत्यनेनाच् समासान्तः। आर्तस्य पीडितस्याभ्युपपत्तिरनुग्रहः पीडादूरीकरणमिति यावत्तेन वित्तयोः प्रसिद्धयोः। भगवतस्ते पादयोश्चरणयोर्मूलं समीपं शरणमभिप्रपन्नः रक्षणार्थं समायातः।

१ 'अवनिपातम्' ब. २ 'गिरोत्थाप्य' ब. ३ 'सुखस्य भाजनम्' व-ब.
४ 'अस्यां मे दोष दया' ब.

दोषमेषा वो दासी विज्ञापयति। दोषश्च मम स्वाधिकारानुष्ठापनम्। एष हि गणिकामातुरधिकारो यद्दुहितुर्जन्मनः प्रभृत्येवाङ्गक्रिया, तेजोबलवर्णमेधासंवर्धनेन दोषाग्निधातुसाम्यकृता मितेनाहारेण शरीरपोषणम्, आ पञ्चमाद्वर्षात्पितुरप्यनति-दर्शनम्, जन्मदिने पुण्यदिने चोत्सवोत्तरो मङ्गलविधिः, अध्यापनमनङ्गविद्यानां साङ्गानाम्, नृत्यगीतवाद्यनाट्यचित्रास्वाद्यगन्धपुष्पकलासु लिपिज्ञानवचनकौशला-

---

तस्या गणिकाया जननी मातोदञ्जलिः कृताञ्जलिः पलितेन वार्धक्यजेन शौक्ल्येन शारश्चित्रो यः शिखण्डबन्धः केशपाशस्तेनादौ स्पृष्टा पश्चान्मुक्ता भूमिर्यया सा। अस्या मे तव पुरः-स्थिताया मम दोषमपराधं वो युष्माकं दासी मम दुहिता विज्ञापयति। स च दोषः पीडितत्वा-दत्राश्रयार्थमागताहमिति कथनेन व्यक्तः। अस्यामिति पाठेऽस्यां ते पुरोवर्तिन्यां मम कन्य-कायां मे दोषं मया कृतमपकारमेषा वो दासी मल्लक्षणा त्वच्चरणसेविका विज्ञापयति कथयति। उभयोः पाठयोर्द्वितीय एव साधीयान्। तमेव दोषमाह। दोषश्चेति। स्वाधिकारस्य स्वनियो-गस्यस्वकर्तव्यस्यानुष्ठापनंतदाचरणेप्रेरणम्। स्वकर्तव्य मियं मया कार्यते स च दोष इति मं-न्यतेऽनयेत्यर्थः। किं तत्कर्तव्यं तदाह। एष इति। गणिकामातुः वेश्याजनन्या अधिकारः कर्तव्य मिति यावत्। दुहितुः कन्याया जन्मनः प्रभृति जन्मन आरभ्य। 'अपादाने पञ्चमी' इति सूत्रे 'कार्तिक्याः प्रभृति' ति भाष्यप्रयोगात्प्रभृतियोगे पञ्चमी। अङ्गक्रियोद्वर्तनम्। तदुक्तं वात्स्यायन 'अङ्गक्रिया यदङ्गेषु हरिद्रातैलमर्दनम्' इति। तद्गुणाश्चोक्ताः सुश्रुतेन 'स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्' इति। दोषा वातपित्तकफाः अग्निर्जाठरः स च 'मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः' इति चतुर्विधस्तेषु च समः श्रेष्ठः तदुक्तं 'समाग्निः श्रेष्ठ उच्यते' इति। धातवः सप्त रसादयः तदुक्तं भावप्रकाशे 'एते सप्त स्वयं स्थित्वा देहं दधति यन्नृणाम्। रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः' इति। एषां साम्यं समतां करोति तेन मितेन परिमितोहारेण भक्षणेन तेजः शरीरकान्ति-र्बलं सामर्थ्यं मेधा बुद्धिश्च तेषां संवर्धनेन वृध्या शरीरपोषणं शरीरवर्धनम्। आहारे च मिते सन्ति गुणा इमे तदुक्तं सुश्रुते 'आहारः प्रीणनः सद्यो बलकृद्देहधारकः। आयु-स्तेजः समुत्साहस्मृत्योजोऽग्निविवर्धनः' इति। आ पञ्चमाद्वर्षात् 'आङ् मर्यादाभि-विध्योः' इति पञ्चमी। पितुरपि जनकस्यापि। एतेनान्यस्य दर्शनं सर्वथा नास्तीति द्योत्यते। अनतिदर्शनं न वारंवारं दर्शनम्। बाल्येऽन्येन दृष्टा दृष्टिदोषं भजेतेति तद-भावसंपादनमिति भावः। जन्मदिन उत्पत्तिदिने वर्धापनदिवस इति यावत्पुण्यदिने च संक्रमणादिपर्वदिवसे च उत्सवोत्तरमुत्सवप्रधानो मङ्गलविधिः मङ्गल्यजनककर्मण आचरण-म्। साङ्गानामङ्गसहितानामनङ्गविद्यानां वात्स्यायनोक्तकामसूत्राणामध्यापनं शिक्षणम्। नृत्यं नर्तनं 'देवरुच्या प्रतीतो यस्तालमानरसाश्रयः। सविलासोऽङ्गविक्षेपो नृत्यमित्युच्यते बुधैः' इति संगीतदामोदरे। गीतं गानं तल्लक्षणं तु 'धातुमातुसमायुक्तं गीतमित्युच्यते

द्यासु च सम्यग्विनयनम्, शब्दहेतुसमयविद्यासु वार्तामात्रावबोधनम्, आजीवज्ञाने क्रीडाकौशले सजीवनिर्जीवासु च द्यूतकलास्वभ्यन्तरीकरणम्, अभ्यन्तरकलासु वैश्वासिकजनात्प्रयत्नेन प्रयोगग्रहणम्, यात्रोत्सवादिष्वादरप्रसाधितायाः स्फीतपरिबर्हायाः प्रकाशनम्, प्रसङ्गवत्यां संगीतादिक्रियायां पूर्वसंगृहीतैर्ग्राह्यवाग्भिः सिद्धिलम्भनम्, दिङ्मुखेषु तत्तच्छिल्पवित्तकैर्यशःप्रख्यापनम्, कार्तान्तिका-

---

बुधैः। तत्र नादात्मको धातुर्मातुरक्षरसञ्चयः’ इति तत्रैव। वाद्यं चतुर्विधं तदुक्तं ‘ततं सुषिरमानद्धं घनमित्थं चतुर्विधम्। ततं तन्त्रीगतं वाद्यं वंशाद्यं सुषिरं तथा। चर्मावनद्धमानद्धं घनं तालादिकं मतम्’ इति। नाट्यमभिनयकरणरूपो नटव्यापारः चित्रं प्रतिकृतिलेखनम्। आस्वाद्यं भक्षणीयं मिष्टान्नादि। गन्धः सुगन्धिपदार्थाः पञ्चविधाः तदुक्तं कालिकापुराणे ‘गन्धं च सम्यक् शृणु तं पुत्र वेतालभैरव। चूर्णीकृतो वा घृष्टो वा दाहाकर्षित एव वा॥ रसः संमर्दजो वापि प्राण्यङ्गोद्भव एव वा। गन्धः पञ्चविधः प्रोक्तः’ इति। पुष्पाणि तत्स्रजोनिर्माणमिति यावत्। तेषां कलासु तत्तत्प्रतिपादिका विद्यास्तासु। लिपिज्ञानमक्षरलेखनं वचनकौशलं संभाषणचातुरी चादी येषां तेषु सम्यग्विनयनं साध्वध्यापनम्। एतेषां पूर्णतया पाठनमिति यावत्। शब्दो व्याकरणं हेतुस्तर्कः समयो ज्यौतिषसिद्धान्तस्तेषां विद्यासु वार्तैव वार्तामात्रं तस्यावबोधनं ज्ञानमिमानि शास्त्राणि सन्तीत्येव ज्ञानं न तद्विशेषविज्ञानम्। आजीवज्ञाने जीविकाज्ञाने क्रीडायाः सुरतस्य कौशले ‘क्रीडालीला च नर्म च’ त्यमरान्नर्मभाषणपाण्डित्ये वा। सजीवाः कुक्कुटादीनां योधनानि निर्जीवाश्चतुरङ्गशारीपटादयस्तासु द्यूतकलासु देवनेषु। अभ्यन्तरीकरणमन्तःप्रवेशनम्। पूर्णतया तज्ज्ञानसंपादनमिति यावत्। अभ्यन्तरकलासु रतिकाले क्रियमाणेषु विशेषेषु। ‘साभ्यन्तरकला यत्तु स्पृश्याङ्गस्पर्शनं रतौ’ इति वात्स्यायनः। वैश्वासिकजनो विश्वासार्हं आप्तजनस्तस्मात्। विश्वासात् ‘रक्षति’ इत्यनेन ‘तदर्हति’ इत्यनेन वा ठक्। प्रयत्नेन महता श्रमेण प्रयोगग्रहणं विधानसंपादनम्। यात्रोत्सवौ तीर्थादौ गमनं देवतोत्सवश्च तौ आदी येषु तेषु। आदरेण प्रसाधिताया भूषितायाः स्फीताः समृद्धाः परिबर्हाः सेवका यस्यास्तस्याः प्रकाशनं प्रकटीकरणं जनसंमुखमानयनमिति यावत्। एतेन तस्या वैभवस्य सौन्दर्यस्य च सार्वत्रिकी प्रसिद्धिरिति भावः। प्रसङ्गवत्यां योग्यवेलायामनुष्ठीयमानायां सङ्गीतक्रियायां गानकर्मणि पूर्वमेव संग्रहीतैः स्वायत्तीकृतैर्ग्राह्यवाग्भिस्तद्विषयप्रवीणतयाऽभिगम्यमानवचनैः सिद्धिलम्भनं कार्यसिद्धेर्लाभः। उत्सवादौ गानमुपश्रुत्य गायनाभिज्ञतया तद्विषये मार्मिका इति प्रसिद्धैर्जनैः पूर्वसंकेतानुरूपं साधु गीतमनयेत्यभिष्टुताऽसंशयं कीर्तिमाप्स्यतीति भावः। दिङ्मुखेषु दिगन्तेषु तैस्तैः शिल्पैः कलाभिर्वित्ताः प्रसिद्धास्तैः। स्वार्थे कः। यशसः कीर्तेः प्रख्यापनं प्रसिद्धीकरणम्। तासु तासु कलास्वियमस्मत्तोपि गरीयसीति तत्कलायां लब्धकीर्तिभिर्जनैरुद्घोषणमित्यर्थः। कार्ता-

दिभिः कल्याणलक्षणोद्घोषणम् , पीठमर्दविटविदूषकैर्भिक्षुक्यादिभिश्च नागरिकपुरुषसमवायेषु रूपशीलशिल्पसौन्दर्यमाधुर्यप्रस्तावना , युवजनमनोरथलक्ष्यभूतायाः प्रभूततमेन शुल्केनावस्थापनम् , स्वतो रागान्धाय तद्भावदर्शनोन्मादिताय वा जातिरूपवयोऽर्थशक्तिशौचत्यागदाक्ष्यदाक्षिण्यशिल्पशीलमाधुर्योपपन्नाय स्वतन्त्राय प्रदानम् , अधिकगुणायास्वतन्त्राय प्राज्ञतमायाल्पेनापि बहुव्यपदेशेनार्पणम् ,

---

न्तिकादिभिः ज्योतिर्विदादिभिः । कृतान्तं वेत्तीति 'क्रतूक्थादिसूत्रान्ताट्ठक्' इत्यनेन ठक् । कल्याणलक्षणानां शुभचिन्हानामुद्घोषणं प्रकटीकरणम् । गणकादिभिः सर्वत्रेयं सुलक्षणाऽस्या लाभेन स्यादुपभोक्तुः कल्याणमिति प्रसिद्धिः कार्येत्यर्थः । पीठमर्दोऽतिधृष्टो नायकप्रियो नटविशेषः । 'पीठमर्दोऽतिधृष्टे स्यान्नायकस्य प्रियेऽपि चे' ति मेदिनी। विटो वेश्यानागरिकयोः परस्परसंदेशं विटति कथयति सः । 'संभोगहीनसंपद्विटस्तु धूर्तः कलैकदेशज्ञः । वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठयाम्' इति विश्वनाथः। विदूषकः शृङ्गारसहायो नायकस्य 'कुसुमवसन्ताद्यभिधः कर्मवपुर्वेशभाषाद्यैः । हास्यकरः कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञ' इत्यपि । तैः भिक्षुकी श्रमणा आदिर्यासां ताभिश्च । तासां सर्वत्र गतिसत्त्वात् । नागरिकाणां पौराणां समवायेषु समूहेषु । रूपं भूषणाभावेऽपि कान्तिमत्त्वं तथा चोज्ज्वलनीलमणिः 'अङ्गान्यभूषितान्येव केनचिद्भूषणादिना । येन भूषितवद्भान्ति तद्रूपमिति कथ्यते' इति । शीलं सद्वृत्तं 'शीलं स्वभावे सद्वृत्त' इति मेदिनी । शिल्पं द्विविधं बाह्यमाभ्यन्तरं च बाह्यं तु नृत्यगीतवादित्रादि । आभ्यन्तरं तु चुम्बनालिङ्गनादीति वात्स्यायनः । सौन्दर्यं सुन्दरत्वम् 'अङ्गप्रत्यङ्गकानां यः सन्निवेशो यथोचितम् । सुश्लिष्टः सन्धिबन्धः स्यात्तत्सौन्दर्यमुदाहृतम्' इत्युज्ज्वलनीलमणिः । माधुर्यमनिर्वाच्यं शरीरलावण्यं 'रूपं किमप्यनिर्वाच्यं तनोर्माधुर्यमुच्यत' इति स एव [१] तेषां प्रस्तावनोपक्रमः । युवजनस्य तरुणानां मनोरथो मनीषितं तस्य लक्ष्यभूता तस्याः प्रभूततमेनातिमहता शुल्केन देयद्रव्येणावस्थापनं स्थिरीकरणम्। स्वतः स्वभावतो न परप्रेरणादिना रागान्धाय प्रेम्णा युक्तायुक्तविचारहीनाय तस्या भावश्चित्तविकारस्तस्य दर्शनेनेक्षणेनोन्मोदितायोन्मत्ताय । 'निर्विकारात्मके चित्ते भावः प्रथमविक्रिया' इति साहित्यदर्पणे । जातिर्गोत्रं 'जातिः स्त्री गोत्रजन्मनो' रिति मेदिनी । रूपं स्वरूपं वयस्तारुण्यादिकालः अर्थो धनं शक्तिः सामर्थ्यं शौचं शुचिता रोगराहित्यमिति त्यागो दानं दाक्ष्यं कुशलत्वं दाक्षिण्यं सरलता शिल्पं कलाः शीलं स्वभावो माधुर्यं शरीरस्यासाधारणा कान्तिश्च तैरुपपन्नाय युक्ताय । स्वतन्त्रायापराधीनाय प्रदानमर्पणम् । तस्य स्वातन्त्र्याद्धनादीनामर्पणे प्रतिबन्धाभावः सूचितः । अधिकगुणाय बहुगुणयुताया-

---

१ 'शिल्पसौन्दर्य' इत्येतन्नास्ति व· व पुस्तकयोः.

अस्वतन्त्रेण वा गान्धर्वसमागमेन तद्गुरुभ्यः शुल्कापहरणम्, अलाभेऽर्थस्य कामस्वीकृते स्वामिन्यधिकरणे च साधनम्, रक्तस्य दुहित्रैकचारिणीव्रतानुष्ठापनम्, नित्यनैमित्तिकप्रीतिदायकतया हृतशिष्टानां गम्यधनानां चित्रैरुपायैरपहरणम्, अददता लुब्धप्रायेण च विगृह्यासनम्, प्रतिहस्तिप्रोत्साहनेन लुब्धस्य रागिणस्त्यागशक्तिसंधुक्षणम्, असारस्य वाक्संतक्षणैर्लोकोपक्रोशनैर्दुहितृनिरोधनैर्व्रीडोत्पादनैरन्याभियोगैरवमानैश्चापवाहनम्, अर्थदैरनर्थप्रतिघातिभिश्चानिन्द्यैरभ्यैरनुबद्धार्था-

---

स्वतन्त्राय धनादिविसर्जने परतन्त्राय प्राज्ञतमायेत्यनेनाल्पीभूतं धनस्य पूरणं स्वातन्त्र्याधिगमे स करिष्यतीति सूचितम्। अल्पेनापि न्यूनेनापि बहुव्यपदेशेनाधिकमिति प्रसिद्धिमिषेणार्पणं दानम्। अस्वतन्त्रेण स्वल्पदानेऽप्यसमर्थेन गान्धर्वसमागमेन गान्धर्वविवाहेन तद्गुरुभ्यस्तज्जनकादिभ्यः शुल्कापहरणं धनग्रहणम्। पराधीनायार्पयित्वा कन्यकां तद्गुरवे च पुत्राचारं निवेद्यास्माभिराह्वियते धनं ते च स्वकीर्तिभङ्गभीत्याऽर्पयन्तीति भावः। एवमपि धनालाभे किं करणीयं तदाह। अलाभ इति। अर्थस्य धनस्यालाभेऽप्राप्तौ कामस्वीकृते धनादिदानेन दुहित्रर्पणेन वा स्वाधीनीकृते स्वामिनि प्रभो प्रभोरग्रत इत्यर्थः। अधिकरणे साधनं धनप्राप्त्यर्थमभियोगकरणम्। रक्तस्यानुरक्तस्यासक्तस्येत्यर्थः। दुहितुः कन्याया एकचारिणीव्रतं पतिव्रताव्रतं पातिव्रत्यमिति यावत्तस्यानुष्ठापनं। परिपालनं तन्निवेदनमिति तात्पर्यम्। येन तत्प्रेम न परिहीयेतेति भावः। नित्यः प्रतिदिनं देयः नैमित्तिकः निमित्ते उत्सवादौ देयः यः प्रीतिदायः संतोषेण देयं धनं 'बक्षीस' इति ख्यातम्। स एव प्रीतिदायकस्तदात्मकतया। हृतशिष्टानां गृहीतादवशिष्टानां गम्यधनानां समासक्तवित्तानां चित्रैश्चमत्कारिभिरुपायैः साधनैरपहरणं ग्रहणम्। अददता किमपि नार्पयता लुब्धप्रायेण कृपणशिरोमणिना वञ्चकेन विगृह्य कलहं कृत्वाऽसनं क्षेपणं तन्निराकरणमिति यावत्। प्रतिहस्तिनां प्रातिवेश्मकानां समीपगृहवासिनामित्यर्थः। प्रोत्साहनेनोद्दीपनेन रागिणः प्रेमवतो लुब्धस्य धनाद्यनर्पयतो दानशक्तेः संधुक्षणमुज्ज्वलनम्। तत्प्रोत्साहनेनायं लुब्धो यथा धनमर्पयेत्तथा प्रयतनम्। असारस्य धनहीनस्य वाक्संतक्षणैर्वाग्भिर्भर्त्सनैः 'क्लीबस्य यस्यास्ति न भोगसंपत्स किं भुजिष्याभवने करोति। न यस्य हस्ते तरमूल्यमस्ति स किं समारोहति नावमग्र' इत्यादि निन्दावाक्यैः। लोकेषु जनेषूपक्रोशनैर्निन्दनैः दुहितुः कन्याया निरोधनैरप्रेषणैः। व्रीडोत्पादनैर्लज्जाकरैरन्याभियोगैरन्यैः सह कलहैरधिकरणिकादीनामग्रे कथनैर्वा। अवमानैरपमानैश्चापवाहनं बहिर्निःसारणम्। अर्थदैर्धनदातृभिरनर्थप्रतिघातिभिः संकटनिवारकैश्चानिन्द्यैः स्तुत्यचरितैरिभ्यैः श्रीमद्भिः। अन्यैरिति पाठेऽपवाहितभिन्नैरित्यर्थः। अनुबद्धयोस्तत्स्थयोरर्थो-

---

१ 'अन्यै' प.

नर्थसंशयान्विचार्य भूयोभूयः संयोजनमिति। गणिकायाश्च गम्यं प्रति सज्जतैव न सङ्गः। सत्यामपि प्रीतौ न मातुर्मातृकाया वा शासनातिवृत्तिः। एवं स्थितेऽनया प्रजापतिविहितं स्वधर्ममुल्लङ्घ्य क्वचिदागन्तुके रूपमात्रधने विप्रयूनि स्वेनैव धनव्ययेन रममाणया मासमात्रमत्यवाहि। गम्यजनश्च भूयानर्थयोग्यः प्रत्याचक्षाणयानया प्रकोपितः। स्वकुटुम्बकं चावसादितम्। 'एषा कुमतिर्न कल्याणी' इति निवारयन्त्यां मयि वनवासाय कोपात्प्रस्थिता। सा चेदियमहार्यनिश्चया सर्व एष जनोऽत्रैवानन्यगतिरनशनेन संस्थास्यते' इत्यरोदीत्।

2 अथ सा वारयुवतिस्तेन तापसेन 'भद्रे, ननु दुःखाकरोऽयं वनवास.।

नर्थयोः संशयान् संदेहान्विचार्य विविच्य। पूर्वं लुब्धसकाशाद्धनालाभेन वञ्चितानामर्थप्राप्त्यप्राप्तिविषयको विचारो योग्य एवेति भावः। भूयोभूयो वारंवारं संयोजनं मेलनम्। इतिशब्दो गणिकामातुरधिकारप्रतिपादनस्य समाप्तिमत्र द्योतयति। एवं मातृधर्मान्निरूप्य गणिकाधर्मानाह। गणिकाया इति। गणिकाया वेश्याया गम्यं प्रति गमनीयं पुरुषं प्रति सज्जतैव तत्परतैव केवलं त्वदेकमानसा त्वद्भोगार्थमुत्सुका चास्मीति प्रदर्शनमेव न सङ्ग आसक्तिः। न गणिकया चिरंतनी मैत्री कार्या किं त्वौत्सुक्यं दर्शनीयमित्यर्थः। सत्यामपि प्रीतौ प्रेमोत्पत्तावपि मातुर्जनन्या मातृकाया उपमातुर्मातामह्या वा। प्रथमेऽर्थे इवार्थे कन्। द्वितीये च 'मातुर्माता च मातृके' ति कोशः प्रमाणम्। अनया मम दुहित्रा प्रजापतिविहितं ब्रह्मणा संपादितं स्वधर्मं स्वीयमाचारमुल्लङ्घ्य त्यक्त्वा। क्वचित्कुत्रचिदागन्तुके एकत्रास्थायिन्यप्रसिद्ध इति यावत्। रूपमेव रूपमात्रं तदेव धनं द्रव्यं यस्य तस्मिन् विप्रयूनि ब्राह्मणतरुणे स्वेनैव स्वकीयेनैव धनव्ययेन धननाशेन रममाणया क्रीडन्त्याऽनया मासमात्रं मासप्रमाणः कालोऽत्यवाह्यपनीतम्। अत्यन्तसंयोगे द्वितीया। वहतेरतिपूर्वात्कर्मणि लुङ्। भूयान् बहुतरोऽर्थयोग्यो धनदानसमर्थः प्रत्याचक्षाणया निराकुर्वाणया प्रकोपितः क्रोधं प्रापितः। स्वकुटम्बकमात्मपरिजनोऽवसादितं नाशितम्। कुटुम्बाद् 'अनुकम्पायामि' ति कन्। एषा कुमतिरीदृशी बुद्धिर्न कल्याणी न शुभेति निवारयन्त्यां प्रतिरुन्धत्यां मयि। कोपात्क्रोधाद्वनवासायारण्ये निवस्तुं प्रस्थिता निर्गता। अहार्योऽहरणीयो दृढ इतियावत्। निश्चयो निर्णयो यस्यास्तथा भूता चेत्। सर्व एष जनः सकलोऽत्रागतस्तदीयाप्तवर्गः। अत्रैव भवत्पुरत एव। नान्या गतिराश्रयो यस्य सः। अनशनेन निराहारेण संस्थास्यते। प्रायोपवेशनमास्थाय देहमुत्स्रक्ष्यतीत्यर्थः।

अथेति। भद्रे कल्याणिनि। दुःखाकरो दुःखजनकः। 'दुःखात्प्रातिलोम्ये' इति डाच्। अथवा दुःखस्याकरः खनिरित्यर्थः। वनवासोऽरण्ये वसतिः। तस्य वनवासस्य

तस्य फलमपवर्गः स्वर्गो वा । प्रथमस्तु तयोः प्रकृष्टज्ञानसाध्यः प्रायो दुःसंपाद एव , द्वितीयस्तु सर्वस्यैव सुलभः कुलधर्मानुष्ठायिनः । तदशक्यारम्भादुपरम्य मातुर्मते वर्तस्व ' इति सानुकम्पमभिहिता ' यदीह भगवत्पादमूलमशरणम् , शरणमस्तु मम कृपणाया हिरण्यरेता देव एव ' इत्युदमनायत । स तु मुनिरनुविमृश्य गणिकामातरमवदत्—' संप्रति गच्छ गृहान् । प्रतीक्षस्व कानिचिद्दिनानि यावदियं सुकुमारा सुखोपभोगसमुचिता सत्यरण्यवासव्यसनेनोद्वेजिता भूयोभूयश्चास्माभिर्विबोध्यमाना प्रकृतावेव स्थास्यति ' इति ।

3 ' तथा ' इति तस्याः प्रतियाते स्वजने सा गणिका तमृषिमलघुभक्तिर्धौतो-

---

फलं परिणामोऽपवर्गो मोक्षः स्वर्गो वा स्वर्गगमनं वा । प्रथमो मोक्षः प्रकृष्टं महद्यज्ज्ञानं पदार्थानां यथार्थं ज्ञानमिति न्यायमते आत्मनो याथातथ्येन ज्ञानमिति मीमांसकनये तेन साध्यः प्राप्यः प्रायो बहुशो दुःसंपाद एव दुर्लभ एव । द्वितीयः स्वर्गः सुलभः सुखेन लभ्यः । कुलधर्मं स्वाचारमनुतिष्ठति पालयति तस्य । अत एवोक्तं भगवता ' स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते पराम् ' इति । तत्तस्मात् । अशक्यारम्भाद्वनवासरूपादुपरम्य परावृत्य मातुर्मते जनन्या उपदेशेऽर्थात्स्वकुलानुष्ठाने वर्तस्व स्थिरीभव । इत्यनया रीत्या सानुकम्पं सदयमभिहितोक्ता । भगवत्पादमूलं भवच्चरणसंनिधिरशरणमनाश्रयः । कृपणाया दीनाया असहायाया हिरण्यरेता देवोऽग्निरेव शरणमस्तु रक्षिता भवतु भवता परित्यक्ता वन्हावात्मानमुत्स्रक्ष्यामीति । उदमनायत उन्मना इवाचरदुदमनायत । ' कर्तुः क्यङ्सलोपश्च ' त्यनेन क्यङि लङि चो दोऽनन्तरमडागमः ' उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियत ' इति ज्ञापनात् । ' दुर्मना विमना अन्तर्मना स्यादुत्क उन्मना ' इत्यमरः । स इति । अनुविमृश्य विचार्य । संप्रत्यधुना गृहान् भवनं गच्छ याहि । कानिचित्कतिचिद्दिनानि दिवसान् प्रतीक्षस्व किं भवतीत्यवेक्षस्वेत्यर्थः । सुकुमारा कोमलाङ्गी सुखस्योपभोगाय समुचिता योग्या । अरण्ये वासस्य निवसनस्य व्यसनेन त्रासेनोद्वेजिता दुःखिता भूयो भूयो वारंवारम् । विबोध्यमानोपदिश्यमाना प्रकृतौ मूलस्वभावे स्थास्यति वर्त्स्यति ।

तथेति । तथेति स्वीकारे तस्या गणिकायाः स्वजन आप्तवर्गे प्रतियाते प्रतिनिवृत्ते तमृषिमित्यस्य कर्मत्वेनान्वरञ्जयदित्यत्रान्वयः । अलघुर्महती भक्तिर्यस्याः सा धौतं शुभ्रं यदुद्गमनीयं वसनद्वयं तद्वस्ते धारयति सा । ' तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् '

---

१ अस्मादनन्तरं ' सा तु प्रत्यवादीत् ' इत्यधिकं ब-ब पुस्तकयोः. २ ' अरण्यवासोद्वेजिता ' ब-ब.

द्गमनीयवासिनी नात्यादृतशरीरसंस्कारा वनतरुपोतालवालपूरणैर्देवतार्चनकुसुमोच्चयावचयप्रयासैर्नैकविकल्पोपहारकर्मभिः कामशासनार्थे च गन्धमाल्यधूपदीपनृत्यगीतवाद्यादिभिः क्रियाभिरेकान्ते च त्रिवर्गसंबन्धिनीभिः कथाभिरध्यात्मवादैश्चानुरूपैरल्पीयसैव कालेनान्वरञ्जयत्।

4 एकदा च रहसि रक्तं तमुपलक्ष्य 'मूढः खलु लोको यत्सह धर्मेणार्थकामावपि गणयति' इति किंचिदस्मयत। 'कथय वासु, केनांशेनार्थकामातिशायी धर्मस्तवाभिप्रेतः' इति प्रेरिता मरीचिना लज्जामन्थरमारभताभिधातुम्—'इतः किल जनाद्भगवतस्त्रिवर्गबलाबलज्ञानम्। अथवैतदपि प्रकारान्तरं दासजनानुग्रहस्य। भवतु, श्रूयताम्। ननु धर्मादृतेऽर्थकामयोरनुत्पत्तिरेव। तदनपेक्ष एव धर्मो

ति कोशानुसारत उद्गमनीयशब्दो धौतवसनद्वयवाच्यप्यत्र वसनद्वयवाचको ग्राह्यो धौतेतिपृथग्विशेषणोपादानाद्विशिष्टवाचकानां सति पृथग्विशेषणत्वे विशेष्यमात्रपरत्वमिति न्यायात्। नात्यादृतः परमादरेणाविहितः शरीरसंस्कारो भूषणादिस्थापनयत्नो यया सा। वनतरूणां वनवृक्षाणां पोता बाला अल्पवृक्षास्तेषामालवालानामावालानां पूरणैः वृक्षकोपरि जलसिंचनैरित्यर्थः। देवतानामर्चनं पूजनं तस्य कुसुमानि पुष्पाणि तेषामुच्चयः समूहस्तस्यावचयः संग्रहस्तस्य प्रयासा यत्नास्तैः। नैकेऽनेका विकल्पा भेदा येषां तथाभूतान्युपहारकर्माणि देवताबलिकर्माणि तैः। 'विकल्पः संशये भेद' इति वररुचिः। कामशासनार्थे शिवपूजार्थे गन्धं चन्दनं माल्यं पुष्पं धूपः सुगन्धिचूर्णविशेषः दीपो नृत्यं नर्तनं गीतं गानं वाद्यं चेमान्यादीनि यासां ताभिः क्रियाभिः कर्मभिः। एकान्ते रहसि त्रिवर्गो धर्मार्थकामास्तत्संबधिनीभिः कथाभिरालापैरध्यात्मवादैः परब्रह्मप्रतिपादकवाक्यैः। अनुरूपैर्मुनेर्योग्यैः। अल्पीयसैव स्वल्पेनैव। अन्वरञ्जयत् तन्मन आहरदित्यर्थः।

एकदेति। रक्तमनुरक्तं तमृषिमुपलक्ष्य दृष्ट्वा रहस्येकान्ते मूढो युक्तायुक्तविचारहीनोऽयं लोको जनः खल्विति निश्चये। धर्मेण सहार्थकामौ गणयति त्रिवर्गशब्द त्रयाणामेषां सहत्वेनाङ्गीकारं कुरुते। इत्युक्त्वेति शेषः किंचित्स्वल्पमस्मयताहसत्। वासु बाले 'बाला स्याद्वासूः' इत्यमरः। केनांशेन केन भागेनार्थकामावतिशेतेऽतिकाम्यति तथाभूतो धर्मस्तेऽभिमतो मान्यः। इति कथय प्रतिपादयस्व। प्रेरिता चोदिता लज्जया त्रपया मन्थरं जडं यथा तथा। अभिधातुं वक्तुम्। इतःकिल जनात् मादृश्या अल्पज्ञानवत्याः स्त्रियो भगवतः षडैश्वर्यसंपन्नस्य भवतस्त्रिवर्गस्य धर्मार्थकामानां बलाबलयोः सामर्थ्यासामर्थ्ययोर्ज्ञानम्। एतेनेदं विस्मयजनकमिति सूचितम्। अथवेति पूर्वपक्षनिरासकम्। दासजनेऽनुग्रहो दया तस्य प्रकारान्तरं भिन्ना रीतिरित्यर्थः। नन्विति निश्चये। धर्मादृते धर्मं विना। 'अन्यारादितरर्ते' इत्यनेन पञ्चमी। अनुत्पत्तिरेवासंभव एव। एते

निवृत्तिसुखप्रसूतिहेतुरात्मसमाधानमात्रसाध्यश्च। सोऽर्थकामवद्बाह्यसाधनेषु नात्यायतते। तत्त्वदर्शनोपबृंहितश्च यथाकथंचिदप्यनुष्ठीयमानाभ्यां नार्थकामाभ्यां बाध्यते। बाधितोऽपि चाल्पायासप्रतिसमाहितस्तमपि दोषं निर्हृत्य श्रेयसेऽनल्पाय कल्पते। तथा हि पितामहस्य तिलोत्तमाभिलाषः, भवानीपतेर्मुनिपत्नीसहस्रसंदूषणम्, पद्मनाभस्य षोडशसहस्रान्तःपुरविहारः, प्रजापतेः स्वदुहितर्यपि प्रणय-

---

नार्थकामयोधर्माधीनत्वं प्रतिपादितम् अत एव व्यासः 'धर्मादर्थश्च कामश्चे' ति। तदनपेक्ष एवार्थकामविरहित एव धर्मो निवृत्तिसुखं मोक्षस्तस्य प्रसूतेरुत्पत्तेर्हेतुः कारणमित्यर्थः। एतेन धर्मस्यासाधारणानन्दजनकत्वं सूचितम्। आत्मनः समाधान बुद्धेरैकाग्र्यं तदेव तन्मात्रं तेन साध्यो लभ्यः। स धर्मोऽर्थकामवदर्थकामाविव बाह्येषु साधनेषु बहिस्थेषूपायेषु नात्यायतते नात्यन्तमधीनो भवति। तत्वदर्शनेन सम्यग्ज्ञानेनोपबृंहितो वर्धितो यथाकथंचिदपि स्वेच्छमपीत्यर्थः। अनुष्ठीयमानः आचरितो नार्थकामाभ्यां बाध्यते पीड्यते। बाधितोऽपि रुद्धोऽपि च। अल्पायासेन स्वल्पेन श्रमेण प्रतिसमाहितः समाधानमाहितः तमपि दोषं धर्मबाधाकरमर्थकामोत्पादितं दोषमित्यर्थः। निर्हृत्य दूरीकृत्यानल्पाय श्रेयसे महते कल्याणाय कल्पते समर्थो भवति। धर्माचरणनिरतस्य कामाद्यभिलाषानुसारतो वृत्तावपि धर्मसामर्थ्यान्न दोषोऽतस्त्वयापि यथेच्छमाचरितव्यमिति तस्या अभिप्रायः। एवं स्वोक्तमभिधाय तदुपबृंहणाय पुरातनीर्महतां कथाः कथयति। तथाहीति। पितामहस्य ब्रह्मणस्तिलोत्तमायां तदाख्याप्सरसि आभिलाष इच्छा।'तिलं तिलं समानीय रत्नानां यद्विनिर्मिता। तिलोत्तमेति तत्तस्या नाम चक्रे पितामह' इति भारत आदिपार्वणि। भवानी भवस्य पत्नी पार्वती तस्याःपत्युः शिवस्य मुनीनामृषीणां पत्न्यः कलत्राणि तेषां सहस्रस्य संदूषणमनुचितकर्मकरणम्। पुरा मुनिरूपधारिणमटव्यामाहिण्डमानं शंकरं प्रेक्ष्य तल्लावण्याक्रान्तमानसा मुनिपत्न्य आसन्। तदा तं दण्डयितुं मुनिभिरेको व्याघ्रो निरमायि। स च शिवेन हतस्तच्चर्म च परिधानीयं कृतमिति पौराणिकी कथाऽत्रानुसंधेया। भवानीपतिशब्दस्य च काव्ये दुष्टता। शिवस्य भार्याया पतिरित्यर्थेन शंकाराद्भिन्नस्य बोधादिति काव्यप्रकाशकारादयः। अन्ये तु भवानीशब्दः पार्वतीवाचको न तत्रावयवार्थोपस्थितिरित्याहुः। पद्मं नाभौ यस्य तस्य। गड्वादित्वात्सप्तम्यन्तस्य परनिपातः। 'अच् प्रत्यन्ववपूर्वात्सामलोम्न' इत्यत्राजिति योगविभागात्समासान्तोऽच्। योगविभागस्येष्टसमर्थनमात्रत्वं न सर्वत्रैव नाभिशब्दान्ताद्बहुव्रीहेरज्विधानमत एव 'प्रजा इवाङ्गादरविन्दनाभेः' इति माघप्रयोग उपपद्यते। षोडश सहस्राण्यन्तःपुराण्यवरोधास्तेषु विहारः क्रीडा। कथा चात्र प्रसिद्धा। प्रजापतेर्ब्रह्मणः स्वदुहितरि स्वकन्यायां सरस्वत्याख्यायां प्रणयस्य प्रेम्णः

प्रवृत्तिः, शचीपतेरहल्याजारता, शशाङ्कस्य गुरुतल्पगमनम्, अंशुमालिनो वडवालङ्घनम्, अनिलस्य केसरिकलत्रसमागमः, बृहस्पतेरुतथ्यभार्याभिसरणम्, पराशरस्य दाशकन्यादूषणम्, पाराशर्यस्य भ्रातृदारसंगतिः, अत्रेर्मृगीसमागम इति।

प्रवृत्तिः। तदुक्तं मात्स्ये 'ततः स्वदेहसंभूतामात्मजामित्यकल्मषम्। दृष्ट्वा तां व्यथितस्तावत्कामबाणार्दितो विभुः'। एवं ब्रह्मणः कन्यायामभिलाषमुपवर्ण्याग्रे तस्मादेव तत्तपसः क्षयस्तत्रैवाभिहितः। यथा 'सृष्ट्यर्थं यत्कृतं तेन तपः परमदारुणम्। तत्सर्वं नाशमगमत्स्वसुतोपगमेच्छया' इति। शचीपतेरिन्द्रस्याहल्याजारता गौतमपत्न्या उपपतित्वम्। पुराऽहल्यापिता यः खलु स्वल्पेषु दिनेषु पृथ्वीप्रदक्षिणां कृत्वाऽऽयास्यति तस्मै स्वकन्यां दास्यामीति प्रतिजज्ञौ। तत इन्द्रगौतमौ तदर्थं निर्गतौ। इन्द्रश्चैरावतमारुह्य प्रस्थितः। मार्गे गौतमेन प्रसूयमानाऽर्धनिर्गतवत्सा गौः प्रदक्षिणीकृता तेन तस्य पृथ्वीप्रदक्षिणायाः पुण्यं लब्धम्। प्रतिनिवृत्य तेन परिणीताऽहल्या। ततः प्रभृति देवेन्द्रो बद्धमत्सर आसीत्। एकदा गौतमरूपं गृहीत्वा मुनेराश्रममेत्य स मुनिपत्नीं दूषितवान्। मुनिशापाच्च सहस्रछिद्रयुत इत्यादिपुराणोक्ता कथात्रानुसंधेया। शशाङ्कस्य चन्द्रस्य गुरोः सुराचार्यस्य तल्पे भार्यायां गमनम्। 'तल्पं शय्याट्टदारेषु' इत्यमरः। 'पुरोदितं पूर्णचन्द्रं वीक्ष्य कामयमानां मदविह्वलाङ्गीं गुरुपत्नीं तारां चन्द्रो जहार। बहुशो गुरुचोदितरिन्द्रादिभिर्याच्यमानोऽपि यदा तां न मुमोच तदा तामपहर्तुमुद्यतः शक्रो बभूव। भीतश्चन्द्रः शुक्रं शरणं गतस्तेनापि बृहस्पतिद्वेषात्तस्य साहाय्यं विदधे। अङ्गिरसः सकाशादुपलब्धविद्यो भगवान् शंकरः सकलैर्दानवैः सह चन्द्रसाहाय्यमकरोत्। महद्युद्धं समापेदे। तेन च क्षुब्धं सकलं जगद्ब्रह्माणं शरणं ययौ। ब्रह्मापि शंकरादीन्निवार्य तारां बृहस्पतयेऽर्पयामास। तस्याश्च बुधो जननं लेभ' इत्यादिर्वृत्तान्तो विष्णुपुराणे चतुर्थेऽशे षष्ठेऽध्याये। अंशुमालिनः सूर्यस्य वडवायामश्व्यां लङ्घनं गमनम्। संज्ञाभिधाना विश्वकर्मणः कन्या सूर्यस्य च पत्नी भर्तृतेजः सोढुमशक्नुवती स्वकर्मणि छायां नियोज्य तपस्तप्तुमारेभे वडवारूपधारिणी। सूर्यश्च गृहीताश्वरूपस्तां बुभुजे तस्याश्चाश्विनौ जननं लेभाते। तदुक्तं महाभारते 'त्वाष्ट्री तु सवितुर्भार्या वडवारूपधारिणी। असूयत महाभागा सान्तरिक्षेऽश्विनावुभा' इति। अनिलस्य वायोः केसरिकलत्रेण केसरिसंज्ञकपेर्भार्यया अञ्जनाख्यया समागमः। तदुक्तं रामायणे 'अञ्जनेति परिख्याता पत्नी केसरिणः कपेः' इति। महाभारतेच 'अहं केसरिणः क्षेत्रे वायुना जगदायुना। जातः कमलपत्राक्ष हनूमान्नाम वानर' इति। बृहस्पतेः सुरगुरोरुतथ्यभार्यायां स्वज्येष्ठभ्रातुः पत्न्यामभिसरणं गमनम्। पराशरस्य तदाख्यमुनेर्दाशकन्या धीवरस्य दुहिता तस्या दूषणम् पराशरो नाम

अमराणां च तेषु तेषु कार्येष्वासुरविप्रलम्भनानि ज्ञानबलान्न धर्मपीडामावहन्ति। धर्मपूते च मनसि नभसीव न जातु रजोऽनुषज्यते । तन्मन्ये नार्थकामौ धर्मस्य शततमीमपि कलां स्पृशतः' इति ।

श्रुत्वैतदृषिरुदीर्णरागवृत्तिरभ्यधात्—' अयि विलासिनि, साधु पश्यसि । न धर्मस्तत्त्वदर्शिनां विषयोपभोगेनोपरुध्यत इति । किंतु जन्मनः प्रभृत्यर्थकामवार्तानभिज्ञा वयम् । ज्ञेयौ चेमौ किंरूपौ किंपरिवारौ किंफलौ च' इति । सा त्वब्रवीत्—'अर्थस्तावदर्जनवर्धनरक्षणात्मकः, कृषिपाशुपाल्यवाणिज्यसंधिविग्रहादि-

---

मुनिवरस्तीर्थयात्राप्रसङ्गतो दाशकन्यां सत्यवतीं दृष्ट्वा चकमे तस्यां चोत्पादयामास व्यासं द्वैपायनमिति कथा भारते आदिपर्वणि । तदुक्तं 'पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा । जज्ञे च यमुनाद्वीपे पाराशर्यः स वीर्यवान्' इति । पाराशर्यस्य व्यासस्य भ्रातुर्विचित्रवीर्यस्य दारैर्भार्याभ्यामम्बिकाम्बालिकाभ्यां संगतिः संगमः । सत्यवत्याः पुत्रे विचित्रवीर्ये मृते मातुराज्ञया व्यासेन तद्भार्ययोः पुत्रद्वयं धृतराष्ट्रपाण्डुसंज्ञकमुत्पादितमिति भारते आदिपर्वणि । अत्रेस्तत्संज्ञकर्षेर्मृग्या हरिण्या समागमः । अमराणां देवानां तेषु तेषु कार्येषु धर्माचरणेष्वासुरविप्रलम्भनान्यकृत्याचरणानि ज्ञानस्य बलात्सामर्थ्यात् धर्मस्य पीडां त्रासं नावहन्ति नोत्पादयन्ति। 'अकृत्याचरणं यत्तदासुरं विप्रलम्भनम्' इत्यजयः । धर्मेण पूते पवित्रे मनसि हृदि रजो रजोगुणो धूलिश्च नभसीवाकाश इव । यथाकाशस्य न रजसा लेपस्तथा धर्मेण विशुद्धस्येति भावः । तत्तस्मात् शततमीं शतपूरिकां कलामंशम् । 'नित्यं शतादि०' इत्यनेन तमड् ।

श्रुत्वेति । उदीर्णा वर्धिता रागवृत्तिः प्रेमव्यापारो यस्य सः । अभ्यधादब्रवीत् । विलासिनि विलासो विद्यते यस्यास्तत्संबुद्धौ । 'गतिस्थानासनादीनां मुखनेत्रादिकर्मणाम् । तात्कालिकं तु वैशिष्ट्यं विलासः प्रियसङ्गजम्' इत्युज्ज्वलनीलमणिः । साधु सम्यक् पश्यसि तत्त्वदर्शिन्यसि विषयस्य कामस्योपभोगेन तत्त्वदर्शिनां परोक्षज्ञानिनां धर्मो धर्माचरणं नोपरुध्यते न बाध्यते । अर्थकामयोर्वार्ताया वृत्तान्तस्यानभिज्ञा अज्ञानिनः । इमावर्थकामौ किं रूपं स्वरूपं ययोस्तौ । कः परिवारः सहचरगणो ययोस्तौ किं कीदृक् फलं लाभो ययोस्तौ । अर्जनं संपादनं वर्धनं कुसीदादिना पोषणं रक्षणं चेमान्यात्मा यस्य सः । कृषिर्भूमिकर्षणादिना धान्योत्पादनं पाशुपाल्यं पशुपालस्य कर्म ब्राह्मणादित्वात्कर्मणि ष्यञ् । वाणिज्यं नित्योपयोगिनां पदार्थानां क्रयविक्रयरूपं कर्म संधिर्धर्मादिदानेन बन्धुभिः सौहार्दकरणं विग्रहः समरश्चेमे आदयः परिवाराः सेवका यस्य सः । एभिरुत्पाद्य इत्यर्थः । तीर्थेषु योग्येषु प्रतिपादनं दानं फलं यस्य तथाभूतश्च । विषयेषूपभोगसाधनेष्वतिसक्तमत्यन्तमनुरक्तं चेतो मानसं ययोस्तयोः स्त्री च पुमांश्च

परिवारः , तीर्थप्रतिपादनफलश्च । कामस्तु विषयातिसक्तचेतसोः स्त्रीपुंसयोर्निरतिशयसुखस्पर्शविशेषः । परिवारस्त्वस्य यावदिह रम्यमुज्ज्वलं च । फलं पुनः परमाह्लादनम् , परस्परविमर्दजन्म , स्मर्यमाणमधुरम् , उदीरिताभिमानमनुत्तमम् , सुखमपरोक्षं स्वसंवेद्यमेव । तस्यैव कृते विशिष्टस्थानवर्तिनः कष्टानि तपांसि, महान्ति दानानि , दारुणानि युद्धानि, भीमानि समुद्रलङ्घनादीनि च नराः समाचरन्ति ' इति ।

6 **निशम्यैतन्नियतिबलान्नु तत्पाटवान्नु स्वबुद्धिमान्द्यान्नु स्वनियममनादृत्य**

तयोः स्त्रीपुंसयोः । 'अचतुरविचतुरे' त्यनेन साधुः । निर्गतोऽतिशयो यस्मात्स सर्वश्रेष्ठः सुखस्यानन्दस्य स्पर्शविशेषः । परिवारः साहाय्यकगणः । यावच्छब्दः साकल्ये तेन साकल्येनेहास्मिञ्जगति रम्यं मनोज्ञमुज्ज्वलतरं दीप्तिमच्छोभायुक्तमिति यावत् । परमाल्हादनं परमानन्दः परस्परस्यान्योन्यस्य विमर्दादालिङ्गनचुम्बनादिकाज्जन्मोत्पत्तिर्यस्य तत् । स्मर्यमाणं स्मृतिविषयस्थमपि मधुरं किं पुनः प्रत्यक्षमिति भावः । उदीरितस्त्यक्तोऽभिमानो यस्मिन् । कामसेवनार्थमभिमानस्यावश्यत्याज्यत्वमत एव कालिदासः ' त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वय ' इत्याह । भूषणाकारस्त्वभिमानशब्दः सार्थक्यबुद्धिवाचक इत्याह । वर्ङ्गीयो रेवतीकान्तभट्टस्तूदीरित उद्दीपितोऽभिमानः प्रणयो यस्मिन्नित्याह । अभिमानशब्दस्य प्रणयवाचकत्वे प्रमाणं स एव प्रष्टव्यः । स्वसंवेद्यं स्वीयानुभवैकगम्यमपरोक्षं प्रत्यक्षं सुखमानन्दः । तस्यैव तादृशफलस्यैव कामस्यैव वा कृते । कृत इत्यव्ययं तादर्थ्ये ' अर्थे कृतेऽव्ययं तावत्तादर्थ्ये वर्तते द्वयम् ' इति । विशिष्टेषु स्थानेषु पवित्रस्थलेषु तपसो योग्येषु स्थलेष्विति यावद्वर्तन्ते ते कष्टानि कृच्छ्रसाध्यानि तपांसि नित्यनैमित्तिका विधयः । ' तपसा सर्वमाप्नोति तपसा विन्दते परम् ' इति मात्स्यवचनात्तपः कामप्रापकं ज्ञेयम् । महान्ति दानानि वितरणानि ' कनकाश्वतिला गावो दासीरथमहीगृहाः । कन्या च कपिला धेनुर्महादानानि वै दश ' इति कूर्मपुराणोक्तानि । दारुणानि भयंकराणि युद्धानि समराः । यथा रामरावणयोः समरः स च सीताभिलाषमूलकः । भीमानि भयानकानि समुद्रलङ्घनं सागरतरणमादि येषां तानि । नरा मानवाः समाचरन्ति कुर्वन्ति ।

निशम्येति । एतदुपर्युक्तं निशम्य श्रुत्वा नियतिबलाद्दैवसामर्थ्यात् । न्विति वितर्के । तस्याः पाटवात्कौशलात् विषयोपपादनचातुर्यादित्यर्थः । स्वबुद्धेः स्वीयमतेर्मान्द्यं जाड्यं तस्मात् । तदभिप्रायाज्ञानात्स्वबुद्धेर्जडत्वम् । स्वनियममात्मव्रतं ब्रह्मचर्यरूपमनादृत्य दूरीकृत्यापालयित्वेत्यर्थः । तस्यां गणिकायां प्रासजत् समासक्त आसीत् ।

---

१ ' उज्ज्वलं च वस्तु ' ब-ब. २ ' अनुत्तमसुखम् ' ब. ६ ' निमित्तबलान्नु ' ब.

तस्यामसौ प्रासजत्। सा सुदूरं मूढात्मानं च तं प्रवहणेन नीत्वा पुरमुदारशोभया राजवीथ्या स्वभवनमनैषीत्। अभूच्च घोषणा 'श्वः कामोत्सवः' इति। उत्तरेद्युः स्नातानुलिप्तमारचितमञ्जुमाल[1]मारब्धकामिजनवृत्तं निवृत्तस्ववृत्ताभिलाषं[2] क्षणमात्रे गतेऽपि तया विना दूयमानं तमृषिमृद्धिमता राजमार्गेणोत्सवसमाजं नीत्वा क्वचिदुपवनोद्देशे युवतिजनशतपरिवृतस्य राज्ञः संनिधौ[3] स्मितमुखेन तेन 'भद्रे, भगवता सह निषीद' इत्यादिष्टा सविभ्रमं कृतप्रणामा सस्मितं न्यषीदत्।

7 तत्र काचिदुत्थाय बद्धाञ्जलिरुत्तमाङ्गना 'देव, जितानयाहम्। अस्यै दास्यमद्यप्रभृत्यभ्युपेतं मया' इति प्रभुं प्राणंसीत्। विस्मयहर्षमूलश्च कोलाहलो लोकस्योदजिहीत। हृष्टेन च राज्ञा महार्हैं रत्नालंकारैर्महता च परिबर्हेणानुगृह्य

तया सह रेम इत्यर्थः। सेति। सुदूरमत्यन्तं मूढात्मानं मूर्खं तमृषिं प्रवहणेन वाहनेन कर्णीरथसंज्ञकेन 'कर्णीरथः प्रवहणम्' इत्यमरः। पुरं नगरं नीत्वातिवाह्य। उदारोत्कृष्टा शोभा यस्यास्तया राजवीथ्या राजमार्गेण स्वभवनं स्वगृहमनैषीन्नीतवती। श्वः परेऽहनि कामोत्सवो मदनोत्सव इति घोषणा डिण्डिमः 'दवंडी' इति महाराष्ट्रभाषायाम्। उत्तरेद्युरन्यस्मिन्नहनि। आदौ स्नातोऽभिषिक्तः पश्चादनुलिप्तो धृतचन्दनस्तम्। आरचिता धृता मञ्जुमाला मनोहराः स्रजो येन तमारब्धं समारब्धं कामिजनस्य विषयिणो वृत्तं वर्तनं येन तं निवृत्तो नष्टः स्ववृत्ताभिलाषः स्वीयाचारेच्छा यस्य तम्। क्षण एव क्षणमात्रं तस्मिन्। तया विना गणिकया विना गतेऽपि दूयमानं पीड्यमानं क्षणमपि तद्वियोगमसहमानमिति यावत्। तमृषिं मरीचिम्। ऋद्धिमता संपन्नेन शोभायुतेनेत्यर्थः। उत्सवसमाजमुत्सवार्थं मिलितानां लोकानां संसदं नीत्वा। उपवनोद्देशे उद्यानप्रदेशे युवतिजनानां प्रमदानां शतैः परिवृतस्य वेष्टितस्य राज्ञो नृपस्य संनिधौ समीपे। स्मितमुखेन कृतमन्दहासेनेत्यर्थः तेन नृपेण। भद्रे कल्याणिनि। निषीदोपविश। आदिष्टाज्ञप्ता। सविभ्रमं सविलासं कृतप्रणामा कृतनमस्कारा। सस्मितं मन्दहासपूर्वकं न्यषीददुपाविशत्।

तत्रेति। तत्र समाजे काचित् कापि बद्धाञ्जलिः कृतकरसंपुटोत्तमाङ्गना वरारोहा। देवेति नृपामन्त्रणम्। अनया काममञ्जर्या। दास्यं सेवकत्वम्। अभ्युपेतमङ्गीकृतम्। प्रभुं नृपं प्राणंसीत् नमोऽकार्षीत्। 'यमरमनमातामि' त्यनेन सक्। विस्मय आश्चर्यं हर्ष आनन्दश्च मूलं कारणं यस्य स कोलाहलः कलकल उदाजहीतोदपादि। हृष्टेन संतुष्टेन महार्हैर्बहुमूल्यै रत्नालंकारै रत्नमयैर्भूषणैः। परिबर्हेण राजयोग्यवस्तुभिः गजाश्वछत्रा-

---

१ 'मुण्डमालम्' व. २ 'वृत्तनिवृत्त०' व. ३ 'संनिधौ समासदत्तत्र' व.

विसृष्टा वारमुख्याभिः पौरमुख्यैश्च गणशः प्रशस्यमाना स्वभवनमगत्वैव तमृषिमभाषत—' भगवन्, अयमञ्जलिः, चिरमनुगृहीतोऽयं दासजनः, स्वार्थ इदानीमनुष्ठेयः ' इति। स तु रागादशनिहत इवोद्भ्राम्याब्रवीत्—' प्रिये, किमेतत्। कुत इदमौदासीन्यम्। क गतस्तव मय्यसाधारणोऽनुरागः' इति। अथ सा सस्मितमवादीत् - ' भगवन्, ययाद्य राजकुले मत्तः पराजयोऽभ्युपेतस्तस्याश्च मम च कस्मिंश्चित्संघर्षे ' मरीचिमावर्जितवतीव श्लाघसे ' इति तयास्म्यहमधिक्षिप्ता। दास्यपणबन्धेन चास्मिन्नर्थे प्रावर्तिषि। सिद्धार्था चास्मि त्वत्प्रसादात् ' इति। स तया तथावधूतो दुर्मतिः कृतानुशयः शून्यवन्न्यवर्तिष्ट। यस्तथैवं कृतस्तपस्वी तमेव मां महाभाग, मन्यस्व। स्वशक्तिनिषिक्तं रागमुद्धृत्य तयैव बन्धक्या

दिभिः। ' परिबर्हस्तु राजार्हवस्तुनि ' इति विश्वः। अनुगृह्य सत्कृत्य विसृष्टा गमनायानुमोदितेति यावत्। वारमुख्याभिर्वेश्याप्रमुखाभिः पौरमुख्यैर्नागरिकप्रधानैश्च। गणशः गणेन गणेन। ' संख्यैकवचनाच्च वीप्सायाम् ' इति शः। ' बहुगणवतुडति संख्ये ' त्यनेन संख्यासंज्ञा च। प्रशस्यमाना स्तूयमाना स्वभवनं स्वगृहमगत्वैवाप्राप्यैव तमृषिं मरीचिम्। अयमञ्जलिर्नमस्कारः। अनुगृहीतोऽनुग्रहविषयीकृतः। स्वार्थः स्वकृत्यं तपश्चरणादि। इदानीमधुनाऽनुष्ठेयं विधेयम्। रागात् प्रेम्णः। अशनिहतो वज्रेण ताडित इव। उद्भ्राम्य भ्रान्तचित्तो भूत्वा। कुतः केन कारणेनेदं प्रत्यक्षतो मयेदानीमनुभूयमानमौदासिन्यमुदासीनता। असाधारणोऽसामान्योऽनुरागः प्रेमा क्व कुत्र गतोऽन्तर्हित इति यावत्। अथेति। सा काममञ्जरी। सस्मितं हासपूर्वमवादीत् उक्तवती। राजकुले नृपाग्र इत्यर्थः। यया वनितया मत्तो मत्सकाशात्। पञ्चम्यास्तसिल्। पराजयोऽपजयोऽभ्युपेतोऽङ्गीकृतस्तस्या वनितायाः। संघर्षे स्पर्धायां कलहे इति यावत्। ' संघर्षस्तु पुमान् धृष्टौ स्पर्धायाम् ' इति मेदिनी। मरीचिं तदाख्यमहर्षिमावर्जितवती वशीकुर्वाणेव श्लाघसे विकत्थसे। अधिक्षिप्ता निन्दिता। दास्यस्य पणबन्धः प्रतिज्ञा तेन। निर्जितयान्यस्या दास्यं कार्यमित्यात्मकेन पणेनेत्यर्थः। अस्मिन्नर्थे त्वद्वशीकरणरूपक्रियायां प्रावर्तिषि उद्युक्ताभवम्‌ त्वत्प्रसादात्त्वत्कृपया सिद्धार्था सफलमनोरथा। तया वेश्यया तथोपर्युक्तरीत्याऽवधूतस्तिरस्कृतः। दुर्मतिर्मूढः। कृतो जातोऽनुशयः पश्चात्तापो यस्य सः शून्यवद्विचारविहीन इवेत्यर्थः। न्यवर्तिष्ट परावृत्तः। तया काममञ्जर्यैवं चालितवृत्तः कृतस्तपस्वी वराकस्तमेव मरीचिं मां मन्यस्व जानीहि। स्वस्याः शक्त्या सामर्थ्येन निषिक्तं त्यक्तं मयि स्थापितमिति यावत् रागं प्रेमोद्धृत्य दूरीकृत्य बन्धक्या कुलटया। म-

---

१ ' महर्षिं मरीचिम् ' व.ब.

महद्वैराग्यमर्पितम् । अचिरादेव शक्य आत्मा त्वदर्थसाधनक्षमः कर्तुम् । अस्यामेव तावदङ्गपुर्यां चम्पायाम्' इति ।

8 अथ तन्मनश्च्युततमःस्पर्शभियेवास्तं रविरगात् । ऋषिमुक्तश्च रागः संध्यात्वेनास्फुरत् । तत्कथादत्तवैराग्याणीव कमलवनानि समकुचन् । अनुमतमुनिशासनस्त्वहममुनैव सहोपास्य संध्यामनुरूपाभिः कथाभिस्तमनुशय्य नीतरात्रिः प्रत्युन्मिषत्युदयप्रस्थदावकल्पे कल्पद्रुमकिसलयावधीरिण्यरुणार्चिषि तं नमस्कृत्य नगरायोदचलम् । अदर्शं च मार्गाभ्यासवर्तिनः कस्यापि क्षपणकविहारस्य बहिर्विविक्ते रक्ताशोकखण्डे निषण्णमस्पृष्टसमाधिमाधिक्षीणमग्रगण्यमनभिरूपाणां कृपणवर्णं

हद्वैराग्यमिति भिन्नं पदद्वयम् । अर्पितं स्थापितम् । अचिरादेव तूर्णमेव तवार्थः सुहृन्निवासज्ञानरूपस्तस्य साधने क्षमः समर्थः । तावन्मम ज्ञानप्राप्तिपर्यन्तमङ्गपुर्यामङ्गराजधान्यां चम्पायां तदाख्यनगर्यां वस तिष्ठ ।

अथेति । तस्य मरीचेर्मनसोऽन्तःकरणाच्च्युतं गलितं यत्तमोऽज्ञानं तस्य स्पर्शभिया स्पर्शभीत्येव रविः सूर्योऽस्तमगादस्ताचलं प्रापत् । सायं स्वभाविकं सूर्यस्यास्ताचलगमनं तमःस्पर्शभीत्या कल्पितमिति हेतूत्प्रेक्षा । ऋषिणा मुक्तस्त्यक्तो रागोऽनुरागः संध्यात्वेन सायंकालजनितरागस्वरूपेणास्फुरत् प्रकटो बभूव । तस्य कथया वार्तया दत्तमर्पितं वैराग्यं विरक्तता येभ्यस्तथाभूतानीव कमलवनानि पद्मवनानि समकुचन् संकोचमाप्नुवन् । अनुमतं स्वीकृतं मुनेः शासनमाज्ञा येन सः । अमुना सह तेन मुनिना सह संध्यां सायं सन्ध्यामुपास्य पूजयित्वा । अनुरूपाभिर्योग्याभिः कथाभिर्वार्ताभिस्तमनुशय्य तेन सह शयित्वा । 'तृतीयार्थे' इत्यनोः कर्मप्रवचनीयत्वं 'कर्मप्रवचनीययोगे द्वितीया' अनेन द्वितीया च । नीता गमिता रात्रिर्येन सः । उदयस्य पूर्वपर्वतस्य प्रस्थः सानुस्तस्य दावकल्पे वन्हिसदृशे । 'ईषदसमाप्तौ०' इत्यनेन कल्पप् । 'उदयस्तु पुमान् पूर्वपर्वते' 'प्रस्थोऽस्त्रियां मानभेदे सानौ' इति मेदिनी । कल्पद्रुमस्य कल्पवृक्षस्य किसलयं पर्णमवधीरयति स्वकान्त्या तिरस्कुर्वत्यरुणार्चिषि सूर्यसारथेः किरणेऽथवाऽरुणास्ताम्रा अर्चिषः किरणा यस्य तस्मिन् सूर्ये । 'अर्चिर्मयूखशिखयोः' इति । प्रत्युन्मिषत्युदयमागते सति । सूर्योदये प्रभाते वेत्यर्थः । तं मुनिं नमस्कृत्य प्रणम्य । नगराय चम्पां प्रति । उदचलं प्रास्थिषि । मार्गस्याभ्यासे निकटे वर्तते तस्य क्षपणकानां बौद्धसंन्यासिनां विहारो निवासस्थलं तस्य बहिर्बहिर्भागे । 'विहारो भ्रमणे स्कन्धे लीलायां सौगतालये' इति मेदिनी । विविक्ते विजने रक्ताशोकानां षण्डे समूहे रक्ताशोकस्य षण्डे खण्डे वा । निषण्णमुपविष्टमस्पृष्टोऽप्राप्तः समाधिश्चित्तवृत्तिरोधज इन्द्रियोपरमो येन सः ।

---

१ 'अभ्याशवर्तिनः' ब.

कमपि क्षपणकम्। उरसि चास्य शिथिलितमलनिचयान्मुखान्निपततोऽश्रुबिन्दूनलक्षयम्। अप्राक्षं चान्तिकोपविष्टः—'क्क तपः, क्क च रुदितम्! न चेद्रहस्यमिच्छामि श्रोतुं शोकहेतुम्' इति। सोऽब्रूत—'सौम्य, श्रूयताम्। अहमस्यामेव चम्पायां निधिपालितनाम्नः श्रेष्ठिनो ज्येष्ठसूनुर्वसुपालितो नाम। वैरूप्यात्तु मम विरूपक इति प्रसिद्धिरासीत्। अन्यश्चात्र सुन्दरक इति यथार्थनामा कलागुणैः समृद्धो वसुना नातिपुष्टोऽभवत्। तस्य च मम च वपुर्वसुनी निमित्तीकृत्य वैरं वैरोपजीविभिः पौरधूर्तैरुदपाद्यत। त एव कदाचिदावयोरुत्सवसमाजे स्वयमुत्पादितमन्योन्यावमानमूलमधिक्षेपवचनव्यतिकरमुपशमय्य 'न वपुर्वसु वा पुंस्त्वमूलम्, अपि तु प्रकृष्टगणिकाप्रार्थ्ययौवनो हि यः स पुमान्। अतो युवतिललामभूता काममञ्जरी यं वा कामयेत स हरतु सुभगपताकाम्' इति व्यवास्थापयन्। अभ्यु-

---

आधिना मानसिकपीडया क्षीणं कृशम्। अनभिरूपाणां कुरूपाणामग्रगण्यं श्रेष्ठम्। कृपणो दीनो वर्णो देहकान्तिर्यस्य तं कमप्यज्ञातनामधेयं क्षपणकं बुद्धमतवर्तिनं संन्यासिनम्। नन्वग्रे 'जैनायतन' इत्युक्तत्वादत्र क्षपणकपदेन जिनमतवर्तीत्यर्थोऽभिप्रेतः पूर्वत्र विहारपदेन जैनानामेव स इति न वाच्यम्। जिनपदस्य बुद्धवाचकत्वेन जैनशब्देन बुद्धानुयायिनामेव ग्रहणात्। 'जिनोऽर्हति च बुद्धे चे' ति मेदिनी। शिथिलितो नेत्रोदकस्पर्शेन शैथिल्यमापादितो मलनिचयः स्नानाभावाज्जायमानः गात्रस्थधूलिसमूहो यैस्तान्, अथवा यत्र तस्मान्मुखादिति मुखविशेषणं वा। अश्रुबिन्दून् बाष्पकणान्। अन्तिके समीपे उपविष्टः आसीनः। रहस्यं गोप्यं न चेन्नास्ति चेत्। शोकस्य दुःखस्य हेतुं कारणं श्रोतुमाकर्णयितुमिच्छामि। सौम्येति। श्रेष्ठिनो वणिजः ज्येष्ठः सूनुः पुत्रः। वैरूप्यात् कुरूपतया। प्रसिद्धिः ख्यातिः। यथार्थं नामाभिधानं यस्य सः। कलाभिश्चतुष्षष्टिभिर्गुणैश्च समृद्धः संपन्नो युक्त इति यावत्। वसुना धनेन नातिपुष्टो नात्यन्तं संपन्नः। तस्य मम च वपुश्च देहश्च वसु च धनं च निमित्तीकृत्य कारणत्वेन परिकल्प्य। वैरेण कलहेनोपजीवन्ति स्वोदरं पूरयन्ति तैः पौरधूर्तैर्नागरिकेषु वञ्चकैः। वैरं कलह उदपाद्यतोत्पादितम्। त एव वञ्चका एवोत्सवसमाज उत्सवार्थं मिलिते जनसमूह आवयोस्तस्य मम च स्वयमुत्पादितमात्मनैव कृतमन्योन्यस्य परस्परस्यावमानोऽपमानो मूलं हेतुर्यस्य तम्। अधिक्षेपो निन्दा तस्य वचनानां व्यतिकरं परस्परायार्पणमुपशमय्य शान्तिं नीत्वा। आवयोः कलहं निरुध्येत्यर्थः। पुंस्त्वमूलं पौरुषहेतुर्वपुः शरीरं वसु धनं वा न। प्रकृष्टोत्तमा गणिका वेश्या तया प्रार्थ्यं याचनीयं यौवनं यस्य सः। वेश्ययोपभोगार्थं याच्यमान इत्यर्थः। स पुमान् पुंस्त्वं तत्रैवेत्यर्थः। युवतिललामभूता प्रमदाभूषणभूता काममञ्जरी तदभिधाना वेश्या यं कामयते प्रार्थयते स तस्याः प्रेमास्पदः पुमान् सुभग

पेत्यावां प्राहिणुव तस्यै दूतान् । अहमेव किलामुष्याः स्मरोन्मादहेतुरासम् । आसीनयोश्चावयोर्मामेवोपगम्य सा नीलोत्पलमयमिवापाङ्गदामाङ्गे मम मुञ्चन्ती तं जनमपत्रपयाधोमुखं व्यधत्त । सुभगंमन्येन च मया स्वधनस्य स्वगृहस्य स्वगणस्य स्वदेहस्य स्वजीवितस्य च सैवेश्वरीकृता । कृतश्चाहमनया मलमल्लकशेषः । हृतसर्वस्वस्तया चापवाहितः प्रपद्य लोकोपहासलक्ष्यतामक्षमश्च सोढुं धिक्कृतानि पौरवृद्धानामिहं जैनायतने मुनिनैकेनोपदिष्टमोक्षवर्त्मा सुकर एष वेषो वेशनिर्गतानामित्युदीर्णवैराग्यस्तदपि कौपीनमजहाम् । अथ पुनः प्रकीर्णमलपङ्कः प्रबलकेशलुञ्चनव्यथः प्रकृष्टतमक्षुत्पिपासादिदुःखः स्थानासनशयनभोजनेष्वपि द्विप इव

इति पताकां दैवशालीति जयचिन्हं हरतु बलाद्गृह्णातु । इति व्यवास्थापयन् एवं पणं रक्षितवन्तः। अभ्युपेत्य तं पणबन्धमङ्गीकृत्यावामुभावपि तस्यै काममञ्जर्यै दूतान् निजाभिलाषनिवेदकान् सेवकान् प्राहिणुव प्रेरितवन्तौ । किलेति निश्चये । अमुष्याः काममञ्जर्याः । स्मरोन्मादहेतुर्मदनवृद्धेः कारणम् । आसीनयोरुपविष्टयोरावयोर्मध्ये मामेवोपगम्य प्राप्य । नीलोत्पलमयमिव नीलकमलप्रचुरमिव । प्राचुर्ये मयट् । अपाङ्गदाम नेत्रप्रान्तेनावलोकनरूपां मालां ममाङ्गे शरीरे मुञ्चन्ती वर्षन्ती । तं जनं सुन्दरकमपत्रपया लज्जयाऽधोमुखं नतवदनं व्यधत्ताकरोत् । सुभगंमन्येनात्मानं सुभगं सुन्दरं मन्यते यस्तेन । 'आत्ममाने खश्चे' त्यनेन खश् । स्वधनस्य स्ववित्तस्य स्वगणस्य निजसेवकवर्गस्य स्वदेहस्य स्वीयशरीरस्य स्वजीवितस्य निजप्राणानां सैव काममञ्जर्येवेश्वरीकृता स्वामिनीकृता । अनया वेश्यया मलमल्लकं कौपीनं शेषोऽवशिष्टं यस्य तथाविधः । 'आच्छादनं संपिधानं कौपीनं मलमल्लकम्' इति वैजयन्ती । हृतं सर्वं सकलं स्वं धनं यस्य सः । तया वेश्ययाऽपवाहितो गृहान्निष्कासितः लोकानां जनानामुपहासस्य परिहासस्य लक्ष्यतां स्थानतां प्रपद्य प्राप्य पौरवृद्धानां नागरिकश्रेष्ठानां धिक्कृतानि तिरस्कारान् सोढुमक्षमोऽसमर्थः । इह जैनायतनेऽस्मिन्बुद्धविहारे । जिनशब्दस्य बुद्धवाचकत्वं पूर्वमुपदर्शितम् । मुनिना बुद्धसंन्यासिनोपदिष्टः कथितो मोक्षवर्त्म मोक्षमार्गो यस्य सः । वेशाद्वेश्यागृहान्निर्गतानामेष नग्नत्वरूपवेषः सुकरः सुलभ इत्युदीर्णमुत्पन्नं वैराग्यं यस्य सः । तदपि वेश्याहस्तादवशिष्टं कौपीनं संपिधानमजहामत्यजम् । 'शालीनकौपीने अधृष्ट' त्यनेन साधुः । अथेति । अथ कौपीनत्यागानन्तरं प्रकीर्णः प्रसृतो मलपङ्कः स्नानाभावजो गात्ररजःकर्दमो यस्य सः प्रबला केशानां शिरोरुहाणां लुञ्चनमुत्पाटनं तस्य व्यथा यस्य सः । प्रकृष्टतममतिशयितं क्षुत्पिपासादीनां क्षुधातृषादीनां

---

१ 'सुभगेन च मया' व. २ 'स्वगुणस्य' व. ३ 'सर्वस्वतया' न. ४ 'इहैवायतने' व. ५ 'दिष्ट उत्तमो वर्त्मा' व.

नवग्रहो बलवतीभिर्यन्त्रणाभिरुद्वेजितः प्रत्यवामृशम्। 'अहमस्मि द्विजातिः। अस्वधर्मो ममैष पाँषण्डपथावतारः। श्रुतिस्मृतिविहितेनैव वर्त्मना मम पूर्वजाः प्रावर्तन्त। मम तु मन्दभाग्यस्य निन्द्यवेषममन्दःदुखायतनं हरिहरहिरण्यगर्भादिदेवतापवादश्रवणनैरन्तर्यात्प्रेत्यापि निरयफलमफलं विप्रलम्भप्रायमीदृशमिदमधर्मवर्त्म धर्मवत्समाचरणीयमासीत्' इति प्रत्याकलितस्वदुर्नयः पिण्डीखण्डं विविक्तमेतदासाद्य पर्याप्तमश्रु मुञ्चामि' इति।

9 श्रुत्वा चैतदनुकम्पमानोऽब्रवम्—'भद्र, क्षमस्व। कंचित्कालमत्रैव निवस। निजेन द्युम्नेनासावेव वेश्या यथा त्वां योजयिष्यति तथा यतिष्ये। सन्त्युपायास्ता-

---

दुःखं पीडा यस्य सः। स्थानं स्थितिरासनं पीठादि शयनं स्वापः भोजनं भक्षणं तेष्वपि नित्यव्यवहारेष्वित्यर्थः। नवग्रहो नवो नूतनो ग्रहो ग्रहणं यस्य स द्विप इव गज इव। बलवतीभिः प्रबलाभिर्यन्त्रणाभिः रोधनैरुद्वेजितः खिन्नः। यथा नूतनगृहीतो गजो हस्तिपकस्य त्रासेन रोधनेन च दुःखितो भवति तद्वदिति भावः। प्रत्यवामृशं विचारमकरवम्। द्विजातिर्वैश्यः। अस्वधर्मः। न स्वकीयो धर्मः पाखण्डस्य नास्तिकस्य पन्था मार्गस्तत्रावतारो गमनं तन्मतानुसरणमिति यावत् 'ऋक्पूरब्धूःपथाम्०' इत्यनेन समासान्तोऽकारः। 'पालनाच्च त्रयीधर्मः पाशब्देन निगद्यते। तं खण्डयन्ति ते यस्मात्पाखण्डास्तेन हेतुना' इति। श्रुतयो वेदास्स्मृतयो मन्वादिप्रणीतास्ताभिर्विहितेन कृतेन वर्त्मना मार्गेण। पूर्वजा आद्याः। कुलपुरुषाः। मन्दभाग्यस्य दैवहीनस्य निन्द्यो निन्दनीयो वेषो नेपथ्यं यस्य तत्। अमन्दानां महतां दुःखानामायतनं स्थानं हरिर्विष्णुर्हरः शिवो हिरण्यगर्भो ब्रह्मा चादयो यासां देवतानामपवादो निन्दा तस्य श्रवणमाकर्णनं तस्य नैरन्तर्यं सांतत्यं तस्मात् प्रेत्यापि मृत्योरनन्तरमपि निरयो नरकः फलं यस्य तम्। अफलं निष्फलं विप्रलम्भप्रायं वञ्चनाबहुलमधर्मवर्त्माधर्ममार्गो धर्मवद्धर्म इव। 'विप्रलम्भो विसंवादो विरहो वञ्चना तथे' ति विश्वः। समाचरणीयं पालनीयम्। प्रत्याकलितो ज्ञातः स्वदुर्नयः स्वस्यासदाचरणं येन सः। विविक्तं जनसंपर्कशून्यं पिण्डीखण्डमशोकसमूहमासाद्य प्राप्य पर्याप्तं यथेष्टमश्रु नेत्रोदकं मुञ्चामि त्यजामि।

श्रुत्वेति। अनुकम्पमानो दयायुक्तः। भद्र कल्याणिन् निजेन त्वदीयेन द्युम्नेन धनेन। त्वां योजयिष्यति त्वदीयं हृत धनं यथा तुभ्यं प्रत्यर्पयिष्यति यतिष्ये यत्नं करिष्यामि। तादृशास्तथाविधाः। इत्याश्वास्य सान्त्वयित्वा तमनु तस्य पश्चाद्। आविशन्नेव प्रविशन्नेव लोकवादाज्जनानां भाषणात् लुब्धाः कृपणाश्च ते समृद्धाः श्रीमन्तस्तैः

---

६ 'पाखण्डि' न.

दशाः' इत्याश्वास्य तमनूत्थितोऽहम् । नगरमाविशन्नेव चोपलभ्य लोकवादाल्लुब्धसमृद्धपूर्णं पुरमित्यर्थानां नश्वरत्वं च प्रदर्श्य प्रकृतिस्थानमून्विधास्यन्कर्णीसुतप्रहिते पथि मतिमकरवम् । अनुप्रविश्य च द्यूतसभामक्षधूर्तैः समगंसि । तेषां च पञ्चविंशतिप्रकारासु सर्वासु द्यूताश्रयासु कलासु कौशलम्, अक्षभूमिहस्तादिषु चात्यन्तदुरुपलक्ष्याणि कूटकर्माणि, तन्मूलानि सावलेपान्यधिक्षेपवचनानि, जीवितनिरपेक्षाणि संरम्भविचेष्टितानि, सभिकप्रत्ययव्यवहारान्न्यायबलप्रतापप्रायानङ्गीकृतार्थसाधनक्षमान्, बलिषु सान्त्वनानि, दुर्बलेषु भर्त्सितानि, पक्षरचनानैपुणम्, उच्चावचानि प्रलोभनानि, ग्लहप्रभेदवर्णनानि, द्रव्यसंविभागौदार्यम्, अन्तरान्तराश्लीलप्रायान्कलकलान्, इत्येतानि चान्यानि चानुभवन्न तृप्तिमध्यगच्छम् । अहसं च किंचित्प्रमाददत्तशारे कचित्कितवे । प्रतिकितवस्तु निर्दहन्निव क्रोधताम्रया

पूर्णं व्याप्तं पुरं नगरमित्युपलभ्य ज्ञात्वा । अर्थानां धनानां नश्वरत्वं चञ्चलत्वं प्रदर्श्य दर्शयित्वाऽमून् लुब्धान् प्रकृतिस्थान् स्वभावस्थान् विधास्यन् करिष्यन् । कर्णीसुतेन स्तेयशास्त्रप्रवर्तकेन प्रहिते प्रवर्तिते पथि मार्गे । 'कर्णीसुतः करटकः स्तेयशास्त्रस्य कारक' इति वैजयन्ती । 'कर्णीसुतो मूलदेवो मूलभद्रः कलाङ्कुर' इति हारावली च । द्यूतसभां पाशक्रीडासक्तानां समाजमनुप्रविश्य गत्वा । अक्षधूर्तैः पाशनिपुणैः समगंसि । 'समो गम्यृच्छिभ्याम्' इति तङ् । तेषामक्षधूर्तानां पञ्चविंशतिस्तावत्संख्याकाः प्रकारा भेदा यासां तासु द्यूत आश्रयो यासां तासु कलासु विद्यासु कौशलं प्रावीण्यम् । अक्षभूमिरक्षक्षेपणस्थलं शारीपटो वा हस्तोऽक्षक्षेपणे क्रियमाणो हस्तरचनाविशेषश्च तावादी येषां तासु । अत्यन्तमतिशयं दुरुपलक्ष्याणि दुर्ज्ञेयानि कूटकर्माणि कपटक्रियाः । तन्मूलानि कूटकर्ममूलानि सावलेपानि सगर्वाण्यधिक्षेपवचनानि निन्दावादाः । जीवितनिरपेक्षाणि प्राणनिरपेक्षाणि संरम्भविचेष्टितानि वेगेन क्रियमाणाः क्रियाः । सभिकप्रत्ययस्य द्यूतकारविश्वासस्य व्यवहारान् न्यायो युक्तिर्बलं सामर्थ्यं प्रतापः पराक्रमश्चैमे प्राया बहुला येषु तान् अङ्गीकृतस्य स्वीकृतस्यार्थस्य साधने क्षमान्समर्थान् । बलिषु बलवत्सु सान्त्वनानि सामवचनानि । दुर्बलेष्वशक्तेषु भर्त्सितानि तर्जनवाक्यानि । पक्षरचना स्वपक्षनिर्माणं तत्र नैपुणं कौशलम् । उच्चावचानि नैकप्रकाराणि प्रलोभनानि मोहजनका व्यापाराः । ग्लहप्रभेदाः पणभेदास्तेषां वर्णनानि विवरणानि । द्रव्यस्य क्रीडायां लब्धस्य धनस्य संविभागः सम्यग्विभजनं तमौदार्यं स्वीयभागस्याल्पीकृत्य ग्रहणम् । अन्तरान्तरा मध्ये मध्ये । अश्लीलं ग्राम्यभाषणं प्रायो बहुलं येषु तान् कलकलान् कोलाहलान् । इत्येतान्युपर्युक्तान्यन्यानि भिन्नानि । तृप्तिं सन्तोषं नाध्यगच्छं नाप्नवम् । किंचित्स्वल्पं प्रमादेनानवधानतया दत्तः स्थापितः शारः शारी येन तस्मिन् कितवे धूर्ते ।

दृशा मामभिवीक्ष्य 'शिक्षयसि रे द्यूतवर्त्म हासव्याजेन । आस्तामयमशिक्षितो वराकः । त्वयैव तावद्विचक्षणेन देविष्यामि' इति द्यूताध्यक्षानुमत्या व्यत्यषजत् । मया जितश्चासौ षोडशसहस्राणि दीनाराणाम् । तदर्धं सभिकाय सभ्येभ्यश्च दत्त्वार्धं स्वीकृत्योदतिष्ठम् । उदतिष्ठंश्च तत्रगतानां हर्षगर्भाः प्रशंसालापाः । प्रार्थयमानसभिकानुरोधाच्च तदगारेऽत्युदारमभ्यवहारविधिमकरवम् । यन्मूलश्च मे दुरोदरावतारः स मे विमर्दको नाम विश्वास्यतरं द्वितीयं हृदयमासीत् ।

तन्मुखेन च सारतः कर्मतः शीलतश्च सकलमेव नगरमवधार्य धूर्जटिकण्ठकल्माषकालतमे तमसि नीलनिवसनार्धोरुकपरिहितो बद्धतीक्ष्णकौक्षेयकः फणि-

---

कर्मणोऽधिकरणत्वविवक्षया सप्तमी । अथवा दत्तसारे कितवे सति इति सप्तमी । 'शारः शारी च खेलनी' इति महीपः । प्रतिकितवः प्रतिकूलकितवो यमहमहसं तस्य विपक्षः । क्रोधेन रोषेण ताम्रया रक्तया दृशा दृष्टया अभिवीक्ष्य दृष्ट्वा । हासव्याजेन हास्यमिषेण द्यूतवर्त्म द्यूतमार्गं शिक्षयस्यध्यापयसि । अशिक्षितोऽपण्डितो वराको दीन आस्तां तिष्ठतु । विचक्षणेन कुशलेन देविष्यामि क्रीडिष्यामि । द्यूताध्यक्षो द्यूतगृहव्यवस्थापकस्तस्यानुमत्याऽनुमोदनेन व्यत्यषजत् क्रीडार्थं संगत आसीत् । 'दंशसञ्जस्वञ्जां शपि' त्यनेन नलोपः । असौ प्रतिकितवः 'गौणे कर्मणि दुह्यादे' रित्यनेन गुणकर्मणः कर्मणि प्रत्ययः । दीनाराणां निष्काणाम् । 'दीनारोऽपि च निष्कोऽस्त्री' इत्यमरः । तदर्धमष्टसहस्राणि सभिकाय द्यूतकारकाय सभ्येभ्यश्च सभास्तारेभ्यश्च दत्वाऽर्पयित्वा । अर्धमष्टसहस्रपरिमितं स्वीकृत्य स्वयं गृहीत्वोदतिष्ठमुत्थितोऽभवम् । तत्र द्यूतगृहे गतानां प्राप्तानां हर्षगर्भा आनन्दमिश्रा प्रशंसालापाः स्तुतिवचनानि उदतिष्ठन्नजायन्त । प्रार्थयमानो मत्प्रार्थनां कुर्वाणः सभिको द्यूताध्यक्षस्तस्यानुरोधात्तदगारे तस्य गृहे । अत्युदारमत्युत्तममभ्यवहारविधिं भोजनविधिमकरवमन्वतिष्ठम् । यन्मूलो यदर्थं दुरोदरे द्यूतेऽवतारोऽवतरणं गमनं स विश्वास्यतरमतिविश्वसनीयं द्वितीयं मन्मनसः पृथक् हृदयमन्तःकरणम् । 'दुरोदरं द्यूतभेदे द्यूतकृत्पणयोः पुमान्' इति मेदिनी ।

तन्मुखेनेति । तस्य विमर्दकस्य मुखेन । सारतो बलतो धनतो वा । 'सारो बले स्थिरांशे च' इति मेदिनी । कर्मतः क्रियाभिः शीलतः स्वभावतश्च । सकलमेव नगरं सकले पुरे को वा धनवान् बलवान् असद्वृत्तश्चेति ज्ञात्वेत्यर्थः । धूर्जटेः शिवस्य कण्ठकल्माषं गलनीलिमा तद्वत्कालतमेऽत्यन्तं कृष्णे । 'कल्माषो राक्षसे कृष्णे शबले' इति हैमः । तमस्यन्धकारे नीलनिवसनस्य नीलवस्त्रस्यार्धोरुकेण 'लहंगा' इति प्रसिद्धेनाच्छादनवस्त्रेण परिहितो वेष्टितः । बद्धो धृतस्तीक्ष्णो निशितः कौक्षेयकः खड्गो येन सः । 'कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेष्वि' ति ढकञ् । फणिमुखं खननशस्त्रं काकली जनानां

मुखकाकलीसंदंशकपुरुषशीर्षकयोगचूर्णयोगवर्तिकामानसूत्रकर्कटकरज्जुदीपभाजनभ्रमरकरण्डकप्रभृत्यनेकोपकरणयुक्तो गत्वा कस्यचिल्लुब्धेश्वरस्य गृहे संधिं छित्त्वा पेटभाक्षसूक्ष्मच्छिद्रालक्षितान्तर्गृहप्रवृत्तिरव्यथो निजगृहमिवानुप्रविश्य नीवीं सारमहतीमादाय निरगाम् । नीलनीरदनिकरपीवरतमोनिबिडितायां राजवीथ्यां झटिति शतह्रदासंपातमिव क्षणमालोकमलक्षयम् । अथासौ नगरदेवतेव नगरमोषरोषिता निःसंबाधवेलायां निःसृता संनिकृष्टा काचिदुन्मिषद्भूषणा युवतिराविरासीत्—'कासि वासु, क्व यासि' इति सदयमुक्ता त्रासगद्गदमगादीत्।

निद्राज्ञानार्थं मधुरध्वनियुतं वाद्यम्। 'काकली तु कले सूक्ष्मे' इत्यमरस्तथापि वाद्ये लाक्षणिकः । कर्तरीवाचकत्वमस्याप्रसिद्धमतो वाद्यवाचकत्वमेव युक्तम् । संदंशकः 'सांडशी' इति प्रसिद्धः । पुरुषशीर्षमिव पुरुषशीर्षकम् एवार्थे कः दरुमयी पुरुषशीर्षप्रतिकृतिः । योगचूर्णं जनानां सुप्तानां मूर्छोत्पादनोपयोगि चूर्णमित्यर्थः। अथवा निधिप्रदर्शकमौषधम् । योगवर्तिकोपायाञ्जनं जनमोहकरणमौषधमिति यावत् । भूषणाकारस्तु यस्या ज्वलनात्सर्वत्र सर्वा एव दृग्गोचरा भवन्ति सेत्याह। मानसूत्रं प्रमाणरज्जुः । कर्कटकं यन्त्रविशेषः । रज्जुरारोहणार्थम् । दीपभाजनं प्रदीपपात्रं गृहे जनाभावे तत्रत्यपदार्थावलोकनार्थं तस्योपयोगः । भ्रमरकरण्डको दीपनाशकपक्षिकरण्डको यत्सहायेन गृहस्थितो दीपो निर्वाप्यते । इमे प्रभृतयः प्रमुखा येषां तैरुपकरणैः साधनैर्युक्तः। लुब्धेश्वरस्य लुब्धानामीश्वरो लुब्धश्रेष्ठ इति यावत्तस्य गृहे भवने संधिं भित्तेरिष्टकासंधानं छित्त्वा विभिद्य। पटभाक्षेणेक्षणसाधनेन 'दुर्बीण' इति ख्यातेन सूक्ष्मच्छिद्रेणालक्षिता दृष्टा गृहप्रवृत्तिर्गेहान्तर्व्यवस्था येन सः। 'पटभाक्षः प्रेक्षणकम्' इति हलायुधः। अव्यथो निश्चिन्तः निजगृहमिव स्वगृहमिवानुप्रविश्य स्खलनाभावेनान्तर्गत्वा। सारेण दृढांशेन महतीं नीवीं मूलधनमादाय गृहीत्वा। 'नीवी स्त्रीकटीवस्त्रबन्धने। मूलद्रव्ये परिपण' इति हैमः। नीला नीलवर्णा नीरदा मेघास्तेषां निकरेण समूहेन पीवरं पुष्टं वृद्धिं गतं यत्तमोऽन्धकारस्तेन निबिडितायां व्याप्तायां राजवीथ्यां राजमार्गे। झटिति द्राक् शतह्रदाया विद्युतः संपातमिवोद्गममिवालोकं प्रकाशमलक्षयं दृष्टवान्। 'शम्पा शतह्रदा' 'सम्पातस्तु समुद्गम' इति चामरः। असौ विद्युत्प्रकाशो नगरस्य मोषेण स्तेयेन रोषिता क्रुद्धा नगरदेवतेव नगरस्वामिनीव निःसंबाधवेलायां संकटरहिते काले । मार्गे जनाभावान्निःसंबाधत्वम् । निःसृता निर्गता संनिकृष्टा समीपस्थोन्मिषन्ति स्फुरन्ति भूषणान्यलंकारा यस्याः सा । आविरासीत्प्रकटा बभूव। हे वासु बाले। सदयं सकृदमुक्ता पृष्टेत्यर्थः। त्रासेन पीडया गद्गदं रुद्धकण्ठं

---

१ 'पटभास' न.

'आर्य, पुर्यस्यामर्यवर्यः कुबेरदत्तनामा वसति । अस्म्यहं तस्य कन्या । मां जातमात्रां धनमित्रनाम्नेऽत्रत्यायैव कस्मैचिदिभ्यकुमारायान्वजानाद्भार्यां मे पिता । स पुनरस्मिन्नत्युदारतया पित्रोरन्ते वित्तैर्निजैः क्रीत्वेवार्थिवर्गाद्दारिद्र्यं दरिद्रति सत्यथोदारक इति च प्रीतलोकाधिरोपितापरश्लाघ्यनामनि वरयत्येव तस्मिन्मां तरुणीभूतामधन इत्यदत्त्वार्थपतिनाम्ने कस्मैचिदितरस्मै यथार्थनाम्ने सार्थवाहाय दित्सति मे पिता । तदमङ्गलमद्य किल प्रभाते भावीति ज्ञात्वा प्रागेव प्रियतमदत्तसंकेता वञ्चितस्वजना निर्गत्य बाल्याभ्यस्तेन वर्त्मना मन्मथाभिसरा तदगारमभिसरामि । तन्मां मुञ्च । गृहाणैतद्भाण्डम्' इत्युन्मुच्य मह्यमर्पितवती । दयमानश्चाहमब्रवम्—'एहि साध्वि, त्वां नयेयं त्वत्प्रियावसथम्' इति त्रिचतुराणि पदान्युदचलम् । आपतच्च दीपिकालोकपरिलुप्यमानतिमिरभारं यष्टिकृपाणपाणि नागरिकबलमन-

---

यथा तथा । अर्यवर्यो वैश्यश्रेष्ठः । 'अर्यः स्वामिवैश्ययोः' । जातमात्रामुत्पन्नामेव । अत्रत्यायेहस्थाय । 'अव्ययात्त्यप्' । इभ्यकुमाराय धनिकपुत्राय भार्यामन्वजानाद्दातुं निरचिनोत् । स इति । स मे पिता । अस्मिन्नगरे पित्रोरन्ते स्वीयमातापित्रोरवसाने निजैर्वित्तैः स्वधनैरर्थिवर्गाद्याचकसमूहाद्दारिद्र्यं दरिद्रतां क्रीत्वेव परिक्रीयेव । प्रीतैस्तुष्टैर्लोकैर्जनैरधिरोपितं स्थापितमपरमन्यत् श्लाघ्यं स्तुत्यं नामाभिधानं यस्य तस्मिन् । तस्मिन् धनमित्रे मां वरयत्येव स्वीकुर्वत्येव सति । तरुणीभूतां यौवनमापन्नां माम् । अधन इति निर्धन इति । अदत्त्वाऽसमर्प्य । यथार्थं सत्यं नाम यस्य तस्मै । सार्थवाहाय वणिजे दित्सति दातुमिच्छति । तदमङ्गलं तेन सह विवाहरूपमशुभम् । प्रभाते प्रातःकाले भावि भविष्यतीति । प्रियतमेन धनमित्रेण दत्तः संकेतो यस्यै सा । वञ्चिताः प्रतारिताः स्वजना बान्धवा यया सा । बाल्ये शैशवेऽभ्यस्तेन शिक्षितेन वर्त्मना मार्गेण । मन्मथो मदनोऽभिसरः सेवको यस्याः सा । तदगारं प्रियगृहमभिसरामि गच्छामि । तत्तस्मान्मुञ्च त्यज । भाण्डं भूषणम् । समूहे एकत्वम् । गृहाण स्वीकुरु । इत्युक्त्वेति शेषः । उन्मुच्य स्वागात्रादवतार्य । अर्पितवती दत्तवती । दयमानः सदयः । तव प्रियस्यावसथं गृहम् । त्रिचतुराणि 'त्र्युपाभ्यां चतुरोऽजिष्यत' इत्यच् । दीपिकाः 'दिवटी' इति लोकप्रसिद्धास्तासामालोकेन प्रकाशेन परिलुप्यमानो नश्यंस्तिमिरभरोऽन्धकाराधिक्यं येन तत् । 'दीपिका हस्तदीपः स्यात्' इति वैजयन्ती । यष्टयो दण्डाः कृपाणा असयश्च पाणिषु यस्य तदनल्पं महन्नागरिकबलं नगररक्षकसैन्यमापतत्प्राप्तम् । दृष्ट्वैवावलोकनेनैव प्रवेपमानां कम्पमानाम् । असिद्वितीयः खड्गसहायः । त्वदपेक्षया त्वद-

---

१ 'क्रीत्वैव' ब. २ 'नाम । निवारयत्येव' ब.

ल्पम् । दृष्ट्वैव प्रवेपमानां कन्यकामवदम्—'भद्रे, मा भैषीः । अस्त्ययमासिद्धितीयो मे बाहुः । अपि तु मृदुरयमुपायस्त्वदपेक्षया चिन्तितः । शयेऽहं भावितविषवेगविक्रियः । त्वयाप्यमी वाच्याः 'निशि वयमिमां पुरीं प्रविष्टाः । दष्टश्च ममैष नायको दर्वीकरेणामुष्मिन्सभागृहकोणे । यदि वः कश्चिन्मन्त्रवित्कृपालुः स एनमुज्जीवयन्मम प्राणानाहरेदनाथायाः' इति । सापि बाला गत्यन्तराभावाद्भयगद्गदस्वरा बाष्पदुर्दिनाक्षी बद्धवेपथुः कथंकथमपि गत्वा मदुक्तमन्वतिष्ठत् । अशयिषि चाहं भावितविषविक्रियः । तेषु कश्चिन्नरेन्द्राभिमानी मां निर्वर्ण्य मुद्रातन्त्रमन्त्रध्यानादिभिश्चोपक्रम्याकृतार्थः 'गत एवायं कालदष्टः । तथा हि स्तब्धश्यावमङ्गम्, रुद्धा दृष्टिः, शान्त एवोष्मा । शुचालं वासु, श्वोऽग्निसात्करिष्यामः । कोऽतिवर्तते दैवम्' इति सहेतरैः प्रायात् ।

11 उत्थितश्चाहमुदारकाय तां नीत्वाब्रवम्—'अहमस्मि कोऽपि तस्करः, त्वद्गतेनैव चेतसा सहायभूतेन त्वामिमामभिसरन्तीमन्तरोपलभ्य कृपया त्वत्समी-

---

नुरोधेन मृदुः कोमलोऽकठिन इत्यर्थः । भाविता प्रकाशिता विषवेगस्य विक्रिया विकारो येन सः । विषपीडित इवेत्यर्थः शये स्वपिमि । अमी रक्षका वाच्याः कथनीयाः । वयमिति द्वयोर्बहुत्वम् । 'अस्मदो द्वयोश्च' इत्यनुशासनेन । नायकः स्वामी । दर्वीकरेण सर्पेण सभागृहं बहूनां वासभवनं तस्य कोण एकदेशे । वो युष्माकं मध्ये । मन्त्रवित्सर्पविषघ्नमन्त्रज्ञः । एनं भवतोऽग्रे मृतमिव पतितमुज्जीवयन् विषान्मोचयन् । अनाथाया निराश्रयायाः प्राणान् जीवमाहरेदर्पयेत् । गत्यन्तराभावादुपायान्तराभावात् । भयेन भीत्या गद्गदः स्वरो यस्याः सा । बाष्पैर्नेत्रोदकैर्दुर्दिने व्याप्ते अक्षिणी नयने यस्याः सा । बद्धो धृतो वेपथुः कम्पो यया सा । कथं कथमपि महता कष्टेन मदुक्तं मया कथितमन्वतिष्ठदकरोत् । अशयिष्यस्वपम् । तेषु रक्षापुरुषेषु नरेन्द्राभिमान्यात्मानं विषवैद्यं मन्यमानो निर्वर्ण्य दृष्ट्वा । मुद्रा हस्तादिविन्यासः तन्त्रं विधानकर्म मन्त्रविषघ्नाक्षराणामुच्चारणं ध्यानं गरुडादिदेवताचिन्तनं च तदादिभिस्तत्प्रमुखैरुपक्रम्य चिकित्सित्वा । 'उपक्रमश्चिकित्सा स्याद्' इति वैजयन्ती । अकृतार्थोऽलब्धफलः । कालेन मृत्युना दष्टो गत एव मृत एव । शुचालं शोकेन कृतम् । अग्निसादग्न्यधीनम् । 'तदधीनवचने' इत्यनेन सातिः । दैवं भागधेयं कोऽतिवर्तत उल्लङ्घते न कोऽपीत्यर्थः । इतीत्यस्याग्र उक्त्वेति शेषः । इतरैरन्यैः सह प्रायादगच्छत् । उदारकाय जनैर्दत्तोदरकाभिधानाय धनमित्राय । तस्करः स्तेनः । त्वद्गतेन त्वय्यनुरक्तेन चेतसा मनसा । सहायभूतेन साहाय्यं कुर्वाणेन । इत्थंभूतलक्षणे तृतीया । त्वामभिसरन्तीं त्वद्गृहं प्रति यान्तीम् । नात्र 'कान्तार्थिनी तु या याति

---

१ 'स्तब्धश्याववर्णाङ्गम्' ब.

पमनघम् । भूषणमिदमस्याः ' इत्यंशुपटलपाटितध्वान्तजालं तदप्यर्पितवान् । उदारकस्तु तदादाय सलज्जं च सहर्षं च ससंभ्रमं च मामभाषत—' आर्य, त्वयैवेयमस्यां निशि प्रिया मे दत्ता । वाक्पुनर्ममापहृता । तथा हि न जाने वक्तुम् । त्वत्कर्मैतदद्भुतमिति ननु ते स्वशीलमद्भुतवत्प्रतिभाति । नैवमन्येनापि कृतपूर्वमिति प्रतिनियतैव वस्तुशक्तिः । न हि त्वय्यन्यदीया लोभादयः । त्वयाद्य साधुतोन्मीलितेति तत्प्रायस्त्वत्पूर्वावदानेभ्यो न रोचते । दृष्टमिदानीमौदार्यस्य स्वरूपमिति

संकेतमि ' ति लक्षणोक्त्या गृह्यतेऽस्यास्तथागमनाभावात् । अन्तरोपलभ्य मध्ये प्राप्य । अंशूनां किरणानां पटलेन समूहेन पाटितं विदारितं ध्वान्तजालं तमःसमूहो येन तत् । तदपि भूषणमपि । अपिशब्देन तस्करहस्तगतस्य पुनर्लाभ इति व्यज्यते । सलज्जं कान्तासंबन्धोऽन्येनावगत इति लज्जा । प्रियायाः लाभ इति हर्षस्तस्करस्येदृशकर्मणा तत्सभाजनाय संभ्रमश्चेति ज्ञेयम् । अस्यां निशि घोरतमोव्यापृतायां रात्रौ दत्ता अर्पिता । वाक् वाणी पुनरपहृता चोरिता । तदेव प्रतिपादयति । तथाहीति । वक्तुं न जाने किं वक्तव्यं तन्न जान इत्यर्थः । त्वदिति । अत्र भूषणाकाराः त्वत्कर्मैतदद्भुतमिति वक्तुं न जाने इत्यस्य कर्मत्वेन परिकल्पयन्ति पाठं चेतिशब्दरहितमङ्गीकुर्वन्ति । अग्रे चेदंशब्दयुतं पाठं स्वीकृत्य ' इदं द्रव्यस्य प्रियायाश्च समर्पणं चोरत्वेन व्यवहृतस्य स्वशीलं स्वभावो न भवतीत्यतोऽद्भुतवत्प्रतिभाति ' इति विवृण्वते परमस्मिन्पाठे इदं ते स्वशीलं नेति वाक्यस्याग्रिमेण ' अद्भुतवत् प्रतिभाति ' इत्यनेन संबन्धार्थम् ' अतः ' इति पदस्यावश्यकत्वं तदत्र पक्षेऽध्याहार्यं भवेत् तद्विना सोऽर्थो न रमणीयः । मम त्वत्रत्यः पाठ एव न चारुरवभात्यतो यथा कथंचिदुपर्युक्तप्रकारेण नेयोऽर्थः। नेत्यस्य स्थाने नन्विति पाठे त्वत्कर्माद्भुतमिति हेतोर्वक्तुं न जाने। अद्भुतवर्णने वाचोऽसमर्थत्वात् । ते तव स्वशीलं चोरस्य तेऽयमीदृशःस्वभावोऽद्भुतवदाश्चर्यजनकमिव प्रतिभाति नन्विति निश्चये इत्यर्थः । अयमेव पाठः साधीयान् अस्य च हेतुभूतं वाक्यं नैवमन्येन कृतपूर्वमिति । पूर्वं कृतं कृतपूर्वं सुप्सुपेति समासः । प्रतिनियता प्रतिविषयनिष्ठा । एकस्य वस्तुनः सामर्थ्यमन्यस्य नातस्तव कृतिर्नत्वत्पूर्वं केनापि कृतेत्यभिप्रायः । अन्यदीया अन्यत्र वर्तमाना लोभादयः धनाकाङ्क्षादयः न सन्ति । अद्य साधुता मत्प्रियासमर्पणं तद्धनास्वीकरणरूपं च सज्जनचरितमुन्मीलिता प्रकटीकृतेति हेतोस्तत् साधुताप्रकटीकरणं प्रायो बहुशस्तव पूर्वावदानेभ्यः पूर्वकर्मभ्यो न रोचते न स्वदते । ' अवदानं खण्डने स्यादतिवृत्ते च कर्मणि ' इति मेदिनी । औदार्यस्योदारतायाः स्वरूपं दृष्टमित्युदारमूर्ते-

---

१ ' न ' न.

त्वदाशयमननुमान्य न युक्तो निश्चयः। त्वयामुना सुकृतेन क्रीतोऽयं दासजन इत्यसारमतिगरीयसा क्रीणासीति स ते प्रज्ञाधिक्षेपः। प्रियादानस्य प्रतिदानमिदं शरीरमिति तदलाभे निधनोन्मुखमिदमपि त्वयैव दत्तम्। अथवैतावदत्र प्राप्तरूपम्। अद्यप्रभृति भर्तव्योऽयं दासजनः' इति मम पादयोरपतत्। उत्थाप्य चैनमुरसोपश्लिष्याभाषिषि—'भद्र, काद्य ते प्रतिपत्तिः' इति। सोऽभ्यधत्त—'न शक्नोमि चैनामत्र पित्रोरनभ्यनुज्ञयोपयम्य जीवितुम्। अतोऽस्यामेव यामिन्यां देशमिमं जिहासामि। को वाहम्, यथा त्वमाज्ञापयसि' इति। अथ मयोक्तम् 'अस्त्येतत्। स्वदेशो देशान्तरमिति नेयं गणना विदग्धस्य पुरुषस्य। किंतु बालेयमनल्पसौकुमार्या, कष्टाः प्रत्यवायभूयिष्ठाश्च कान्तारपथाः। शैथिल्यमिव किंचित्प्रज्ञासत्त्वयोरनर्थेनेदृशेन देशत्यागेन संभाव्यते। तत्सहानया सुखमिहैव वस्तव्यम्।

त्वदाशयमभिप्रायमननुमान्याविचार्य निश्चयो निर्णयो न युक्तो न योग्यः। त्वया महदौदार्यं विहितमतस्त्वदनुमत्यैव मया किमपि विधातव्यमिति भावः। अमुना सुकृतेन भार्यालंकारार्पणरूपपुण्येनायं मल्लक्षणो दासजनो भृत्यः क्रीतो गृहीत इत्यसारं निःसत्वमतिगरीयसा बहुमूल्येन क्रीणासीति प्रज्ञायाः बुद्धेरधिक्षेपो निन्दा। 'अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम्' इति कालिदासः। असमेन समस्य विनिमयात्परिवृत्तिरलंकारः। तल्लक्षणं तु 'परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः' इति। प्रियादानस्य वल्लभाया अर्पणस्य प्रतिदानं प्रत्यर्पणमिदं शरीरं देहस्तस्याः प्रेयस्या अलाभे निधने मरणे उन्मुखं समुद्युक्तं त्वयैव दत्तं प्रियां समर्पयता त्वयैव दत्तस्य देहस्य प्रत्यर्पणं न योग्यमिति भावः। प्राप्तरूपं प्रशंसं प्राप्तं प्राप्तरूपं योग्यमित्यर्थः। 'प्रशंसायां रूपप्' इत्यनेन रूपप्। दासजनो भृत्यो भर्तव्यः पोषितव्यो भृत्यत्वेनाङ्गीकारं मे कुर्विति भावः। उरसोपश्लिष्य वक्षसाऽऽश्लिष्य। अभाषिष्यवाचि। भाषतेः कर्मणि लुङ्। का प्रतिपत्तिः किं कर्तव्यं किं त्वयाऽनुष्ठीयतेऽग्र इति प्रश्नाशयः। पित्रोरस्या मातापित्रोरनभ्यनुज्ञयाऽननुमोदनेनाज्ञां विनेत्यर्थः। उपयम्य परिणीय। यामिन्यां रात्रौ जिहासामि हातुमिच्छामि। विदग्धस्य चतुरस्य पुरुषस्य स्वदेशः स्वीयो देशो देशान्तरं भिन्नो देश इति गणना संख्यानं न। स खलु सर्वत्र स्वीयं कार्यं सौकर्येण साध्नोतीति भावः। इयं बाला ते प्रेयसी अनल्पं महत् सौकुमार्यं सुकुमारता यस्याः सा। कष्टाः पीडोत्पादकाः प्रत्यवायैः संकटैर्भूयिष्ठा बहुलतमा व्याप्ता इति यावत्कान्तारस्य वनस्य पन्थानो मार्गाः। प्रज्ञा मतिः सत्त्वं बलं च तयोः किंचित्स्वल्पं शैथिल्यमिवाल्पत्वमिवानर्थेन प्रयोजनशून्येन देशत्यागेन संभाव्यते परिकल्प्येत। देशत्यागः बुद्धिबलयोरल्पतां सूचयतीति

एहि। नयावैनां स्वमेवावासम्' इति। अविचारानुमतेन तेन सद्य एवैनां तद्गृहमुपनीय तयैवापसर्पभूतया तत्र मृद्भाण्डावशेषमचोरयाव। ततो निष्पत्य क्वचिन्मुषितकं निधाय समुच्चलन्तौ नागरिकसंपाते मार्गपार्श्वशायिनं कंचिन्मत्तवारणमुपरिपुरुषमाकृष्याध्यारोहाव। ग्रैवेयप्रोतपादयुगलेन च मयोत्थाप्यमान एव पातिताधोरणपृथुलोरःस्थलपरिणतः पुरीतल्लतापरीतदन्तकाण्डः स रक्षिकबलमक्षिणोत्। अध्वंसयाव चामुनैवार्थपतिभवनम्। अपवाह्य च क्वचन जीर्णोद्याने शाखाग्राहिकया चावातराव। स्वगृहगतौ च स्नातौ शयनमध्यशिश्रियाव।

12 तावदेवोदगादुदधेरुदयाचलेन्द्रपद्मरागशृङ्गकल्पं कल्पद्रुमहेमपल्लवापीडपाटलं पतङ्गमण्डलम्। उत्थाय च धौतवक्त्रौ प्रगेतनानि मङ्गलान्यनुष्ठायास्मत्कर्म-

---

भावः। स्वमेवावासं तस्या एव गृहम्। न विचारो यस्मिंस्तथाभूतमनुमतमनुमोदनं यस्य तेन। तेन धनमित्रेण सद्य एव तत्क्षणे एव तद्गृहं तस्या गृहमुपनीय नीत्वा। अपसर्प एवापसर्पभूता तया चारभूतयेत्यर्थः। तत्र तस्मिन्गृहे। मृद्भाण्डं मृत्पात्रमवशेषोऽवशिष्टं यस्मिन्यथा तथाऽचोरयाव। ततो तद्गृहान्निष्पत्य बहिरागत्य क्वचित् कुत्रचिन्मुषितकं चोरितं पदार्थजातं निधाय संस्थाप्य। नागरिकसंपाते नगररक्षकसमुदाये मार्गस्य पार्श्वे एकभागे शेते तिष्ठति तं मत्तवारणमुन्मत्तं गजम्। उपरिपुरुषं गजनियन्तारमाधोरणमाकृष्याधो निपात्याध्यारोहावाध्यासावहि। ग्रैवेये कण्ठभूषणे तद्रज्जौ वा प्रोतेन प्रवेशितेन पादयुगलेन चरणद्वयेन। पातितोऽध आनीत आधोरणो हस्तिपकस्तस्य पृथुले विशाले उरःस्थले वक्षःस्थले परिणतः कृततिर्यग्दन्तप्रहारः 'तिर्यग्दन्तप्रहारस्तु गजः परिणतो मतः' इति। पुरीतल्लता अन्त्रवल्लयस्ताभिः परीतो व्याप्तो दन्तकाण्डो यस्य सः। स गजो रक्षिकबलं नगररक्षापुरुषसैन्यमक्षिणोत्क्षपितवान्। अमुनैव गजेनार्थपतेः धनमित्रशत्रोर्भवनं गृहमध्वंसयावानाशयाव। जीर्णोद्याने पुरातनोपवनेऽपवाह्य नीत्वा शाखाया ग्राहिका ग्रहणं तेन। 'धात्वर्थनिर्देशे ण्वुल् वक्तव्य' इत्यनेन ण्वुल्। अवातरावावतीर्णौ। वृक्षशाखां गृहीत्वा वृक्षे स्थितौ हस्तिनो गमनानन्तरं चाध आगतावित्यर्थः। शयनं शय्यामधिशिश्रियावाधिष्ठितौ।

तावदिति। उदधेः सागरात् उदयाचलेन्द्रस्य पूर्वपर्वतस्य पद्मरागश्टङ्गं रक्तवर्णमणिविशेषमयं शिखरं तत्कल्पं। ततः किंचिदूनम् 'ईषदसमाप्तौ कल्पब्०' इत्यनेन कल्पप्। कल्पद्रुमस्य कल्पवृक्षस्य हेमपल्लवानां सौवर्णपर्णानामापीडो गुच्छस्तद्वत्पाटलं रक्तवर्णं पतङ्गमण्डलं सूर्यबिम्बमुदगादुदगच्छत्। प्रगेतनानि मङ्गलानि प्रातःकरणीयानि माङ्गलिककृत्यान्यनुष्ठाय कृत्वा। अस्मत्कर्मणावयो रात्रिकार्येण तुमुलं पीडितं

---

१ 'अविचार्य २ 'नागरिकसंपातेन' ब. ३ ग्रैवेयकप्रतोद' ब. ' ब.
४ 'पतिताधोरण' ब.

तुमुलं पुरमनुविचरन्तावशृणुव वरवधूगृहेषु कोलाहलम्। अथार्थैरर्थपतिः कुबेरदत्तमाश्वास्य कुलपालिकाविवाहं मासावधिकमकल्पयत्। उपह्वरे पुनारित्यशिक्षयं धनमित्रम्—'उपतिष्ठ सखे, एकान्त एव चर्मरत्नभस्त्रिकामिमां पुरस्कृत्याङ्गराजम्। आचक्ष्व च जानात्येव देवो नैककोटिसारस्य वसुमित्रस्य मां धनमित्रं नामैकपुत्रम्। सोऽहं मूलहरत्वमेत्यार्थिवर्गादस्म्यवज्ञातः। मदर्थमेव संवर्धितायां कुलपालिकायां महादारिद्र्यदोषात्पुनः कुबेरदत्तेन दुहितर्यर्थपतये दित्सितायामुद्वेगादुज्झितुमसूनुपनगरभवं जरद्वनमवगाह्य कण्ठन्यस्तशस्त्रिकः केनापि जटाधरेण निवार्यैवमुक्तः—'किं ते साहसस्य मूलम्' इति। मयोक्तम्—'अवज्ञासोदर्यं दारिद्र्यम्' इति। स पुनरेवं कृपालुरन्वग्रहीत्—'तात, मूढोऽसि। नान्यत्पापिष्ठतममात्मत्या-

---

पुरं नगरमनुविचरन्तौ आहिण्डमानौ वरोऽर्थपतिः वधूः कुबेरदत्तकन्या तयोर्गृहेषु भवनेषु। विवाहार्थं समागतानां प्राघूर्णकानामाप्तानां निवासाय कल्पितानां गृहाणां बहुत्वाद्बहुवचनम्। कोलाहलं कलकलमशृणुव श्रुतवन्तौ। अथेति। अर्थैर्धनैः कुबेरदत्तं वधूपितरमाश्वास्य सान्त्वयित्वा। कुलपालिकायाः कन्याया विवाहं परिणयं तं मासोऽवधिर्यस्य तथाभूतम्। मासानन्तरं विवाहो भावीति निरणैषीदित्यर्थः। उपह्वर एकान्ते। आशिक्षयमबोधयम्। सखे इति धनमित्रसंबोधनम्। चर्मरत्नं चर्मश्रेष्ठमुत्तमं चर्म तस्य भस्त्रिका प्रसेविका 'भाता' इति प्रसिद्धश्चर्ममयपदार्थस्तां पुरस्कृत्याग्रेकृत्याङ्गराजमङ्गनाथमुपतिष्ठ गच्छाचक्ष्व च कथय च। नैकाःकोटयः शतलक्षाणि सारो धनं यस्य तस्य। अत्र नशब्देन समासो न तु नञा तेन 'नलोपो नञ' इत्यस्याप्रवृत्तिः। एकपुत्रमेकमेव तनयम्। अर्थिवर्गाद्याचकसमूहान्मूलहरत्वं नष्टमूलधनत्वमेत्य प्राप्यावज्ञातोऽस्म्यपमानितोऽस्मि। मदर्थमेव मत्कृत एव कुलपालिकायां कन्यायां संवर्धितायां पोषितायाम्। मह्यमेव देयेति निर्णीयापीत्यर्थः। मम दारिद्र्यदोषात्। दित्सितायां दातुमारब्धायाम्। उद्वेगात्त्रासादसून् प्राणानुज्झितुं त्यक्तुं उपनगरभवं नगरसमीपस्थो लघुग्राम उपनगरं तत्र भवं जरद्वनं जीर्णारण्यमवगाह्यालोड्य कण्ठे न्यस्ता स्थापिता शस्त्रिका छुरिका येन सः। जटाधरेण जटायुक्तशीर्षेण निवार्य परावर्त्यैवमग्रिमप्रकारेणोक्तः। साहसस्याविचारोद्यमस्य मूलं हेतुः किम्। अवज्ञाया अपमानस्य सोदर्यं बान्धवो दारिद्र्यं दरिद्रता। 'सोदराद्यः' इत्यनेन साधुः। 'दारिद्र्याद् ह्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो। निस्तेजाः परिभूयत' इति। स जटाधरोऽन्वग्रहीदनुग्रहं चकार। तात वत्स। 'तातस्तु जनकेऽर्भके' इति। पापिष्ठतममत्यन्तं पापिष्ठमतिपापजनकमिति यावत्। इष्ठनैवातिशये व्यक्तीकृते

---

१ 'उपपौरिकम्' व.

गात् । आत्मानमात्मनानवसाद्यैवोद्धरन्ति सन्तः । सन्त्युपाया धनार्जनस्य बहवः, नैकोऽपि च्छिन्नकण्ठप्रतिसंधानपूर्वस्य प्राणलाभस्य । किमनेन । सोऽस्म्यहं मन्त्रसिद्धः । साधितेयं लक्षग्राहिणी चर्मरत्नभस्त्रिका । चिरमहमस्याः प्रसादात्कामरूपेषु कामप्रदः प्रजानामवात्सम् । मत्सरिण्यां जरसि भूमिस्वर्गमत्रोद्देशे प्रवेक्ष्यन्नागतः । तामिमां प्रतिगृहाण । मदन्यत्र चेयं वणिग्भ्यो वीरमुख्याभ्यो वा दुग्धे इति हि तद्गता प्रतीतिः । किंतु यत्सकाशादन्यायापहृतं तत्तस्मै प्रत्यर्पणीयम् । न्यायार्जितं तु देवब्राह्मणेभ्यस्त्याज्यम् । अथेयं देवतेव शुचौ देशे निवेश्यार्च्यमाना प्रातःप्रातः सुवर्णपूर्णैव दृश्यते । स एष कल्पः' इति बद्धाञ्जलये मह्यमेनां दत्त्वा किमपि ग्रावच्छिद्रं प्राविशत् । 'इयं च रत्नभूता चर्मभस्त्रिका देवायानिवेद्य नोपजीव्येत्यानीता । परंतु देवः प्रमाणम्' इति । राजा च नियतमेव वक्ष्यति—'भद्र,

---

पुनस्तस्मात्तमप्रत्ययो न विशेषचारुतामावहति । आत्मानं स्वमात्मना स्वयमनवसाद्याविनाश्यैवोद्धरन्ति स्वापदमुत्तरिष्यन्ति सन्तः सज्जनाः । धनार्जनस्य द्रव्यसंपादनस्य बहवोऽनेक उपायाः साधनानि । छिन्नो भिन्नो यः कण्ठो गलस्तस्य प्रतिसंधानः पुनः संयोगः स पूर्वः प्रथमो यस्य तस्य प्राणानां लाभस्य प्राप्तेरेकोऽप्युपायो न नास्ति । मन्त्रसिद्धः सिद्धो मन्त्रो यस्य तथाभूतः आहिताग्न्यादिपाठकल्पनेन परनिपातः । अथवा मन्त्रेण सिद्धः संपन्नः । लक्षं गृह्णाति स्वस्यां समावेशयत्युत्पादनेन यच्छति सा । साधिता मन्त्रादिना संस्कृतोपन्युक्तसंपादने समर्थेत्यर्थः । चिरं बहुकालमस्याश्चर्मभस्त्रिकायाः प्रसादात् कृपायाः कामरूपेषु तत्संज्ञकदेशेषु प्रजानां जनानां कामप्रदः कामान् अभीष्टान्प्रददाति सः । 'आतोऽनुपसर्गे कः' इत्यनेन कः । अवात्सं निवासमकुर्वम् । वसतेर्लुङ् । मत्सरो विद्यते यस्यां तस्यां मत्सरिण्यां जरसि वार्धके । मयोपभुज्यमानं यौवनसुखं जरा नासहतेत्यर्थः । अत्रोद्देशेऽस्मिन्प्रदेशे भूमिस्वर्गं भूम्यां स्वर्गः स्वर्गसदृशस्तं भूमिस्थं स्वर्गतुल्यं प्रदेशमिति यावत् । प्रवेक्ष्यन्नागतः प्राप्तः । तां चर्मभस्त्रिकां प्रतिगृहाण स्वीकुरु । मदन्यत्र मद्भिन्ने वणिग्भ्यो वैश्येभ्यो वारमुख्याभ्यो वेश्यासु प्रधानाभ्यश्च दुग्धे फलं लक्षसंख्याकं यच्छतीत्यर्थः । तद्गता भस्त्रिकानिष्ठा प्रतीतिः ख्यातिः । अन्यायेनापहृतं चोरितं तस्मै मूलस्वामिने प्रत्यर्पणीयं देयम् । न्यायेनार्जितं संपादितं तु देवेभ्यो ब्राह्मणेभ्यश्च त्याज्यं देयम् । शुचौ देशे पवित्रे स्थले निवेश्य संस्थाप्यार्च्यमाना पूज्यमाना । सुवर्णेन पूर्णा भरिता । कल्पः प्रकारः । बद्धाञ्जलये प्रणमते मह्यम् । ग्रावच्छिद्रं प्रस्तरबिलं गुहामिति यावत् । देवाय भवतेऽनिवेद्याकथयित्वा नोपजीव्या नोपभोक्तुं शक्येत्यानीता भवत्सकाशमिति शेषः । देवो भवान् प्रमाणं

---

१ 'वारयोषिन्मुख्याभ्यः' व. २ 'कल्पविधिः । इति बद्धाञ्जलिरहमातिष्ठम् । बद्धाञ्जलये' व.

प्रीतोऽस्मि। गच्छ। यथेष्टमिमामुपभुङ्क्ष्व' इति। भूयश्च ब्रूहि—'यथा न कश्चिदेनां मुष्णाति तथानुगृह्यताम्' इति। तदप्यवश्यमसावभ्युपेष्यति। ततः स्वगृहमेत्य यथोक्तमर्थत्यागं कृत्वा दिने दिने वरिवस्यमानां स्तेयलब्धैरर्थैर्नक्तमापूर्य प्राह्णे लोकाय दर्शयिष्यसि। ततः कुबेरदत्तस्तृणाय मत्वार्थपतिमर्थलुब्धः कन्यकया स्वयमेव त्वामुपस्थास्यति। अथ कुपितोऽर्थपतिर्व्यवहर्तुमर्थगर्वादभियोक्ष्यते। तं च भूयश्चित्रैरुपायैः कौपीनावशेषं करिष्यावः। स्वकं चौर्यमनेनैवाभ्युपायेन सुप्रच्छन्नं भविष्यति' इति। हृष्टश्च धनमित्रो यथोक्तमन्वतिष्ठत्। तदहरेव मन्नियोगाद्विमर्दकोऽर्थपतिसेवाभियुक्तस्तस्योदारके वैरमभ्यवर्धयत्। अर्थलुब्धश्च कुबेरदत्तो निवृत्यार्थपतेर्धनमित्रायैव तनयां सानुनयं प्रादित्सत। प्रत्यबध्नाद्वार्थपतिः।

13 एष्वेव दिवसेषु काममञ्जर्याः स्वसा यवीयसी रागमञ्जरी नाम पञ्चवीरगोष्ठे संगीतकमनुष्ठास्यतीति सान्द्रादरः समागमन्नागरजनः। स चाहं सह सख्या

किमत्र विधेयं तस्य कथक इत्यर्थः। नियतमसंशयमेवमग्रिमोक्तं वक्ष्यति कथयिष्यति। इमां भव्रिकां न मुष्णाति न चोरयति। तथानुगृह्यतां दयया विधीयताम्। तदपि भव्रिकायाः स्तेनाद्रक्षणम् असौ नृपोऽभ्युपेष्यत्यङ्गीकारिष्यति। यथोक्तं नृपाग्रे प्रतिपादितानुरूपमर्थत्यागं धनदानं कृत्वा। दिने दिने वीप्सायां द्विरुक्तिः। वरिवस्यमानां पूज्यमानां 'नमोवरिवस्०' इत्यनेन क्यचि कर्मणि शानच्। स्तेयलब्धैश्चौर्येण प्राप्तैरर्थैर्धनैर्नक्तं रात्रावापूर्य पूरयित्वा प्राह्णे प्रातर्लोकाय दिदृक्षया समागतभ्यो जनेभ्यः। कुबेरदत्तः कन्यापिताऽर्थपतिं पूर्वनियुक्तं जामातरं तृणाय मत्वा तृणवदनादृत्य। 'मन्यकर्मण्यनादर०' इत्यनेन चतुर्थी। कन्यकयोपस्थास्यति कन्यादानपूर्वकं त्वामाराधयिष्यतीत्यर्थः। कुपितः भार्यापहरणात्क्रुद्धः अर्थगर्वाद्धनदर्पाद् व्यवहर्तुमधिकरणिकाग्रे विवादं कर्तुमभियोक्ष्यत उद्युक्तो भविष्यति। तं चार्थपतिं कौपीनं चीरमवशेषो यस्य तथाविधं चित्रैरुपायैश्चमत्कारिभिरुपायैः। स्वकं स्वीयं चौर्यं स्तेयम्। सुप्रच्छन्नं सुगूढम्। हृष्टस्तुष्टो यथोक्तं कथितानुरूपमन्वतिष्ठदाचरत्। तदहरेव तस्मिन्नेव दिवसे मन्नियोगान्मदाज्ञया विमर्दको द्यूतवेलायां संजातो मे सखाऽर्थपतेः सेवायामभियुक्तो नियोजितस्तस्यार्थपतेरुदारके मत्सुहृदि वैरं शत्रुत्वमभ्यवर्धयदपोषयत्। अर्थलुब्धः धनैकपरायणः कुबेरदत्तः कन्यापिताऽर्थपतेर्निवृत्य परावृत्य तनयां कन्यां सानुनयं सप्रश्रयं प्रादित्सत दातुमैच्छत्। अर्थपतिः प्रत्यबध्नाद्विरोधं चकार।

एष्विति। काममञ्जर्यास्तन्नामिकाया गणिकायाः स्वसा भगिनी यवीयसी कनीयसी। युवन्शब्दादीयसुन्। पञ्चवीरगोष्ठे जानपदानां सभागृहे 'तत्पञ्चवीरगोष्ठं तु यत्तु जानपदं सद' इति। संगीतं नृत्यं गीतं वाद्यं च 'गीतं वाद्यं च नृत्यं च त्रिभिः

धनमित्रेण तत्र संन्यधिषि । प्रवृत्तनृत्यायां च तस्यां द्वितीयं रङ्गपीठं ममाभून्मनः । तद्दृष्टिविभ्रमोत्पलवनसंचापाश्रयश्च पञ्चशरो भावरसानां सामग्र्यात्समुदितबल एव मामतिमात्रमव्यथयत् । अथासौ नगरदेवतेव नगरमोषरोषिता लीलाकटाक्ष-मालाशृङ्खलाभिर्नीलोत्पलपलाशश्यामलाभिर्मामबध्नात् । नृत्योत्थिता च सा सिद्धिलाभशोभिनी ,—किं विलासात् , किमभिलाषात् , किमकस्मादेव वा, न जाने ,—असकृन्मां सखीभिरप्यनुपलक्षितेनापाङ्गप्रेक्षितेन सविभ्रमारेचितभ्रूल-

---

संगीतमुच्यते ' इति संगीतसर्वस्वे । अनुष्ठास्यति विधास्यति । सान्द्रो घन आदरः प्रेमा यस्य सः । गानादिश्रवणलोलुप इत्यर्थः । नागरजनः पौरसमुदायः समागमत्प्राप्तवान् । सख्या सुहृदा । तत्र गानस्थले संन्यधिषि संगतोऽभूवम् । प्रवृत्तं समारब्धं नृत्यं यया तस्यां द्वितीयं तत्रत्याद्भिन्नं रङ्गपीठं नृत्यस्थानम् । मन्मनसि तां दृष्ट्वा विचाराणां तुमुलानां नर्तनमासीदित्यभिप्रायः । तस्या रागमञ्जर्या दृष्टेर्विभ्रमोऽवलोकनस्य विलास एवोत्पलवनं कमलसमूहस्तदेव सच्चापं समीचीनं धनुस्तस्याश्रयो यस्य स पञ्चशरो मदनः भावा विभावानुभावव्यभिचारिसंज्ञका रसोत्पादका रसाश्च शृङ्गारादयस्तेषां सामग्र्यात्संपूर्णतया समुदितं सम्यगुत्पन्नं बलं यस्य स इवातिमात्रमत्यन्तमव्यथयदपीडयत् । घटादित्वान्मित्त्वं ततश्च मितां ह्रस्व इति ह्रस्वः । ' तद्दृष्टिविभ्रमोत्पलवनसत्रापश्रय ' इति पाठे ' चा ' इत्यस्य स्थाने ' त्रा ' इति भ्रान्तलेखनमूलक इति भाति । अत एव कलिकतामुद्रिते ' चापाश्रय ' इत्येवाङ्गीकृतम् । महाराष्ट्रपुस्तकेषु सर्वत्रोपलभ्यमानः प्राचीनैष्टीकाकृद्भिरूरीकृतश्च 'सत्रापाश्रय' इति पाठः क्लिष्टो यथा कथंचिन्नेयः । तस्या दृष्टेर्विभ्रम एवोत्पलवनं कमलसमूहस्तदेव सत्रमाच्छादनं तस्यापाश्रय आश्रयो यस्य स मदनः। अत्र चापाश्रयपदमाश्रवाचकं ग्राह्यम् । अपगत आश्रयो यस्य इति तु भ्रममूलकम् । असौ रागमञ्जरी नगरस्य मोषेण स्तेयेन रोषिता कुपिता नगरदेवतेव नगरस्वामिनीव लीलाकटाक्षा हेलयाऽवलोकितानि तेषां माला पङ्क्तिरेव शृङ्खलाः बन्धनसाधनं लोहमयी रज्जुस्ताभिः नीलोत्पलं नीलकमलं तस्य पलाशमिव पर्णमिव श्यामलाः कृष्णवर्णास्ताभिः। प्रेम्णा स्वीयश्यामकटाक्षैरवलोकितानि नगरस्तेयात्कुपितया कृतेन कृष्णवर्णलोहमयशृङ्खलाबन्धनत्वेनोत्प्रेक्ष्यन्ते । नृत्योत्थिता समापितनर्तना सिद्धिलाभोऽभीष्टवस्तुप्राप्तिस्तेन शोभते सा । विलासात्प्रियदर्शनजान्मुखनेत्रादीनां विशेषात् । अभिलाषान्मद्विषयिण्या इच्छाया वा । अकस्माद्यदृच्छया वा । न जाने तत्कर्मणो हेतुं न निश्चिनोमीत्यर्थः । असकृद्वारं वारं सखीभिः सह विद्यमानाभिः सहचरीभिरपि । अपिशब्देनान्येषां निरासः । अनुपलक्षितेनादृष्टेनापाङ्गं नेत्रप्रान्तस्तेन प्रेक्षितमवलोकनं तेन सविभ्रमं सविलासमारेचिता

---

१ ' सत्रापाश्रयः ' ब-ब-न. २ ' पलाशदाम ' ब.

तमभिवीक्ष्य, सापदेशं च किंचिदाविष्कृतदशनचन्द्रिकं स्मित्वा, लोकलोचनमानसानुयाता प्रातिष्ठत ।

14 सोऽहं स्वगृहमेत्य दुर्निवारयोत्कण्ठया दूरीकृताहारस्पृहः शिरःशूलस्पर्शनमपदिशन्विविक्ते तल्पे मुक्तैरवयवैरशयिषि । अतिनिष्णातश्च मदनतन्त्रे मामभ्युपेत्य धनमित्रो रहस्यकथयत्—'सखे, सैव धन्या गणिकादारिका, यामेवं भवन्मनोऽभिनिविशते । तस्याश्च मया सुलक्षिता भाववृत्तिः । तामप्यचिरादयुग्मशरः शरशयने शाययिष्यति । स्थानाभिनिवेशिनोश्च वामयत्नसाध्यः समागमः । किंतु सा किल वारकन्यका गणिकास्वधर्मप्रतीपगामिना भद्रोदारेणाशयेन समगिरत—'गुणशुल्काहम्, न धनशुल्का । न च पाणिग्रहणादृतेऽन्यभोग्यं यौवनम्' इति । तच्च मुहुः प्रतिषिध्याकृतार्था तद्भगिनी काममञ्जरी माता च माधवसेना राजान-

---

कुटिलीकृता भ्रूलता भ्रुकुटिर्यस्मिन्यथा तथाऽभिवीक्ष्य दृष्ट्वा । सापदेशं सव्याजं किंचित्स्वल्पमाविष्कृता प्रकटिता दशनानां दन्तानां चन्द्रिका ज्योत्स्ना किरणानीति यावत् यस्मिन्यथा तथा स्मित्वा विहस्य । लोकानां जनानां लोचनानि नयनानि मानसान्यन्तःकरणानि च तैरनुयाताऽनुसृता प्रातिष्ठत । 'समवप्रविभ्यः स्थ' इत्यनेन तङ् ।

सोऽहमिति । सोऽहं तयेदृगवलोकितोऽहमित्यर्थः स्वगृहं स्वीयावासमेत्य प्राप्य । दुर्निवारया दुर्लङ्घयोत्कण्ठयोत्कलिकया दूरीकृता त्यक्ता आहारस्पृहा भोजनेच्छा येन सः शिरसः शूलस्पर्शनं वेदनाप्राप्तिमपदिशन् ख्यापयन् विविक्ते एकान्ते तल्पे शय्यायां मुक्तैः शिथिलितैरवयवैरित्थंभूतलक्षणे तृतीया । अशयिष्यस्वपम् । मदनतन्त्रे मन्मथशास्त्रेऽतिनिष्णातो निपुणतमः मामुपेत्य मत्समीपमागत्य रहस्येकान्ते । गणिकादारिका वेश्याकन्या धन्या स्तुत्या । भवन्मनस्तव मानसमभिनिविशते समासज्जति । 'नेर्विश' इति तङ् । भाववृत्तिरनुरागानुबन्धः सुलक्षिता सम्यगालोचिता । अयुग्मशरो मदनः शरशयने बाणशय्यायामथवा मदनस्य बाणाः कुसुमानि तेषां शय्यायामेतेन मदनपीडाशान्त्यर्थं सा पुष्पशय्यामधिवसेदिति द्योतितम् । प्रथमपक्षे च बाणैः सा पीड्येतेति ध्वनिः । शाययिष्यति स्वापयिष्यति । स्थाने योग्येऽभिनिवेशो विद्यते ययोस्तयोः । मत्वर्थीय इनिः । अथवा सुप्यजाताविति णिनिः । गणिकायाः स्वधर्मः कुलाचार उपभोक्तुर्धनग्रहणरूपस्तस्य प्रतीपमननुकूलं विरुद्धमिति यावद्गच्छति तेन भद्रोदारेण कल्याणोदारेणाशयेनाभिप्रायेण समगिरत प्रतिजज्ञे । 'समः प्रतिज्ञायाम्' इत्यनेन तङ् । गुणा एव शुल्कं वराद्ग्राह्यं धनं यस्याः सा । गुणलुब्धेत्यर्थः न धनशुल्का न धनाभिलाषिणीत्यर्थः । पाणिग्रहणादृते विवाहाद्विना । 'अन्यारादितरर्ते' इत्यनेन पञ्चमी । अन्येन भोग्यमुपभोग्यं यौवनं तारुण्यम् । तत् तस्याः प्रतिज्ञानं मुहुः पुनः पुनः प्रतिषिध्य निषिध्या-

मश्रुकण्ठ्यौ व्यजिज्ञपताम्— ‘देव, युष्मद्दासी रागमञ्जरी रूपानुरूपशीलशिल्पकौशला पूरयिष्यति मनोरथानित्यासीदस्माकमतिमहत्याशा । साद्य मूलच्छिन्ना । यदियमतिक्रम्य स्वकुलधर्ममर्थनिरपेक्षा गुणेभ्य एव स्वं यौवनं विचिक्रीषते । कुलस्त्रीवृत्तमेवाच्युतमनुतिष्ठासति । सा चेदियं देवपादाज्ञयापि तावत्प्रकृतिमापद्येत तदा पेशलं भवेत्’ इति । राज्ञा च तदनुरोधात्तथानुशिष्टा सत्यप्यनाश्रवैव सा यदासीत्, तदास्याः स्वसा माता च रुदितनिर्बन्धेन राज्ञे समगिरताम्—‘यदि कश्चिद्भुजङ्गोऽस्मादिच्छया विनैनां बालां विप्रलभ्य नाशयिष्यति स तस्करवद्वध्यः’ इति । तदेवं स्थिते धनादृते न तत्स्वजनोऽनुमन्यते । न तु धनदायासावभ्युपगच्छतीति विचिन्त्योऽत्राभ्युपायः’ इति । अथ मयोक्तम्—‘किमत्र चिन्त्यम् । गुणैस्तामावर्ज्य गूढं धनैस्तत्स्वजनं तोषयावः’ इति ।

ततश्च कांचित्काममञ्जर्याः प्रधानदूतीं धर्मरक्षितां नाम शाक्यभिक्षुकीं

कृतार्था तस्याः परिवर्तनेऽसमर्थेत्यर्थः । तद्भगिनी तस्याः स्वसा । अश्रूणि कण्ठे ययोस्ते । ‘अङ्गगात्रकण्ठेभ्यो वक्तव्यम्’ इत्यनेन ङीष् । व्यजिज्ञपतां विज्ञापनां चक्रतुः । देवेति नृपामन्त्रणम् । युष्मद्दासीत्यनेन संबन्धः सूचितस्तेन किमर्थं नृपाग्र आगमनमिति शङ्का परास्ता । रूपस्य सौन्दर्यस्यानुरूपं शीलं शिल्पेषु नृत्यगानादिषु कौशलं प्रावीण्यं च यस्याः सा । मनोरथान् बहुधनसंपादनरूपान् पूरयिष्यति सफलीकरिष्यतीति अतिमहत्याशा महेच्छा । साशा मूलच्छिन्ना समूलं विनष्टा । इयं रागमञ्जरी स्वकुलं गणिकाकुलं तस्य धर्ममतिक्रम्योल्लङ्घ्यार्थनिरपेक्षा धनाशारहिता गुणेभ्य एव गुणरूपशुल्केन यौवनं तारुण्यं विचिक्रीषते विक्रेतुमिच्छति । अच्युतमस्खलितं कुलस्त्रीवृत्तं पतिव्रताधर्ममनुतिष्ठासत्यनुष्ठातुमिच्छति । देवपादानामत्रभवतामाज्ञयाप्यादेशेनापि प्रकृतिं स्वस्वभावमापद्येत प्रायात् । पेशलं शोभनम् । राज्ञेति । तदनुरोधात्काममञ्जर्यादीनामनुरोधेन तथा तदुक्तप्रकारेणानुशिष्टा बोधिता । अनाश्रवैव नृपवचनमप्रतिपालयन्त्येव । ‘वचने स्थित आश्रव’ इत्यमरः । रुदितस्य रोदनस्य निर्बन्धेनाग्रहेण समगिरतामुक्तवत्यौ । भुजङ्गो विटः । विप्रलभ्य वञ्चयित्वा नाशयिष्यत्युपभोगेन दूषयिष्यति तस्करवच्चोर इव वध्यो हन्तव्यः । धनादृते धनदानं विना तस्याः स्वजनो बान्धववर्गोऽनुमन्यतेऽनुमोदते । धनदाय द्रव्यस्य दात्रेऽसौ रागमञ्जरी नाभ्युपगच्छति नाङ्गीकरोति । अत्रास्मिन्विषये उपायः साधनं विचिन्त्यो विचारणीयः । गुणैः शौर्यादिभिस्तां रागमञ्जरीमावर्ज्य वशीकृत्य गूढं गुप्तं धनैर्द्रव्यैस्तत्स्वजनं काममञ्जर्यादिकं तदाप्तं तोषयावः प्रीणयावः ।

तत इति । प्रधानदूतीं प्रमुखदासीं शाक्यभिक्षुकीं बौद्धसन्यासिनीं चीवरं वसनं पिण्डं भक्षणं तयोर्दानसादियेन तेनोपसंगृह्य वशीकृत्य तन्मुखेन दूत्या मुखतस्तया

चीवरपिण्डदानादिनोपसंगृह्य तन्मुखेन तया बन्धक्या पणबन्धमकरवम्—'अजिनरत्नमुदारकान्मुषित्वा मया तुभ्यं देयम् , यदि प्रतिदानं रागमञ्जरी' इति। सोऽहं संप्रतिपन्नायां च तस्यां तथा तमर्थं संपाद्य मद्गुणोन्मादितायाः रागमञ्जर्याः करकिसलयमग्रहीषम् । यस्यां च निशि चर्मरत्नस्तेयवादस्तस्याः प्रारम्भे कार्यान्तरापदेशेनाहूतेषु शृण्वत्स्वेव नागरमुख्येषु मत्प्रणिधिर्विमर्दकोऽर्थपतिगृह्यो नाम भूत्वा धनमित्रमुल्लङ्घ्य बह्वतर्जयत् । उक्तं च धनमित्रेण—'भद्र , कस्तवार्थो यत्परस्य हेतोर्मामाक्रोशसि । न स्मरामि स्वल्पमपि तवापकारं मत्कृतम्' इति । स भूयोऽपि तर्जयन्निवाब्रवीत्—'स एष धनगर्वो नाम , यत्परस्य भार्यां शुल्कक्रीतां पुनस्तत्पितरौ द्रव्येण विलोभ्य स्वीचिकीर्षसि । ब्रवीषि च—'कस्तवापकारो मत्कृतः' इति । ननु प्रतीतमेवैतत् 'सार्थवाहस्यार्थपतेर्विमर्दको बहिश्चराः प्राणाः' इति । सोऽहं तत्कृते प्राणानपि परित्यजामि । ब्रह्महत्यामपि न परिहरामि । ममैकरात्रजागरप्रतीकारस्तवैष चर्मरत्नाहंकारदाहज्वरः' इति । तथा ब्रुवाणश्च पौरमुख्यैः सामर्ष

बन्धक्या कुलटया काममञ्जर्या सह पणबन्धं शुल्कसंस्थापनम् । उदारकाद्धनमित्रान्मुषित्वा चोरयित्वा । प्रतिदानमजिनरत्नदानार्थं प्रत्यर्पणम् । तस्यां काममञ्जर्यां संप्रतिपन्नायामङ्गीकृतवत्याम् । पद्यतेर्गत्यर्थत्वत्कर्तरि क्तो 'गत्यर्थाकर्मके' त्यनेन । तमर्थं चर्मभस्त्रिकां मुषित्वा काममञ्जर्यै तद्दानरूपं संपाद्य । मम गुणैरुन्मादितायाः उन्मादमापन्नायाः करकिसलयं किसलयमिव करस्तमग्रहीषं पाणिग्रहणमकार्षम् । यस्यामिति । चर्मरत्नस्य स्तेयवादः चौर्यप्रसिद्धिः कार्यान्तरापदेशेनान्यकार्यमिषेणाहूतेष्वाकारितेषु नागरमुख्येषु पौरप्रधानेषु । मत्प्रणिधिर्मम चरोऽर्थपतिगृह्यस्तत्पक्षाश्रितो भूत्वा । 'पदास्वैरिबाह्यापक्षेषु च' इत्यनेन गृह्यतेः क्यप् । धनमित्रमुदारकापराभिधं मत्सुहृदमुल्लङ्घ्यापमान्य बह्वतिशयमतर्जयन्निरभर्त्सयत । कस्तवार्थः किं ते प्रयोजनं परस्य हेतोः 'षष्ठी हेतुप्रयोग' इत्यनेन षष्ठी । आक्रोशसि निन्दसि । मत्कृतं मया विहितं तवापकारमनिष्टम् । धनगर्वो द्रव्यमदः । शुल्केन द्रव्येण क्रीतां परस्य भार्यां परार्थं निश्चितां तस्याः पितरौ धनलोभेन द्रव्यलोभाद्विलोभ्य स्वीचिकीर्षस्यङ्गीकर्तुमिच्छसि । प्रतीतमेव प्रसिद्धमेव सार्थवाहस्य श्रेष्ठिनो बहिश्चराः प्राणा बाह्यं जीवितम् । तत्कृतेऽर्थपतेः कृते प्राणानपि परित्यजामि प्राणत्यागमपि न गणयामि । ब्रह्महत्यामपि ब्राह्मणवधमपि । 'अहःसर्वैकदेशे' त्यनेन संख्यापूर्वत्वादच् । तस्मिन् जागरो जागरणमेव प्रतीकारो यस्य स चर्मरत्नस्याहंकारो गर्वस्तस्य दाहज्वर उष्मज्वरः । एकरात्रजागरणेन चर्मरत्नं त्वत्तो मुषित्वा तेऽहंकारं शातयिष्यामीति भावः । तथा ब्रुवाण एवं वदन् पौरमुख्यैर्नागरिकप्रधानैः सामर्षं सक्रोधं निषिध्य

निषिध्यापवाहितोऽभूत् । इयं च वार्ता कृत्रिमार्तिना धनमित्रेण चर्मरत्ननाशमादा- वेवोपक्षिप्य पार्थिवाय निवेदिता । स चार्थपतिमाहूयोपह्वरे पृष्टवान्--'भद्र, किमस्ति काश्चिद्विमर्दको नामात्रभवतः' इति । तेन च मूढात्मना--'अस्ति देव, परं मित्रम् । कश्च तेनार्थः' इति कथिते राज्ञोक्तम्--'अपि शक्नोषि तमाह्वा- तुम्' इति । 'बाढमस्मि शक्तः' इति निर्गत्य[1] स्वगृहे वेशवाटे द्यूतसभायामापणे च निपुणमन्विष्यन्नोपलब्धवान् । कथं वोपलभ्येत स वराकः । स खलु विमर्दको मद्ग्राहितत्वदभिज्ञानचिह्नो मन्नियोगात्त्वदन्वेषणायोज्जयिनीं तदहरेव प्रातिष्ठत । अर्थपतिस्तु तमदृष्ट्वा तत्कृतमपराधमात्मसंबद्धं मत्वा मोहाद्भयाद्वा प्रत्याख्याय पुनर्धनमित्रेण विभाविते[2] कुपितेन राज्ञा निगृह्य निगडबन्धनमनीयत ।

16 तेष्वेव दिवसेषु विधिना[3] कल्पोक्तेन चर्मरत्नं दोग्धुकामा काममञ्जरी पूर्व-

---

निवार्यापवाहितो निष्कासितः । कृत्रिमा कृत्या निर्मिता न सत्या आर्तिः पीडा यस्य तेन । इयं वार्ता विमर्दकेनाजिनरत्नं हरिष्यामीति प्रतिज्ञातमिति वार्ता । सोऽङ्गराजः उपह्वर एकान्ते । अत्रभवतस्ते विमर्दको नाम तदाख्यः कश्चित्कोऽपि । मूढात्मना मूर्खेण परं मित्र- मत्यन्तसुहृत् कस्तेनार्थः किं तेन प्रयोजनम् । आह्वातुमत्रानेतुमित्यर्थः बाढमित्यङ्गीकारे । वेशवाटे वेश्यागृहमार्गे द्यूतसभायां द्यूतक्रीडास्थाने आपणे पण्यवीथिकायां निपुणं सम्यक् अन्विष्यन्मार्गयमाणो नोपलब्धवान् न प्राप्तवान् । कथं वा कया वा रीत्या स विमर्दको वराको दीन उपलभ्येत प्राप्येत । मया ग्राहितं बोधितं तव राजवाहनस्याभिज्ञानं प्रत्य- यज्ञानं तस्य चिन्हं यस्य सः मन्नियोगान्मदाज्ञया तवान्वेषणाय गवेषणाय तदहरेव तस्मि- न्नेवाहनि प्रातिष्ठत प्रस्थितः । तं विमर्दकमदृष्ट्वा प्रयत्नेनाप्यनवलोक्य । तत्कृतं विमर्दके- नाचरितमपराधं दोषमात्मसंबद्धं स्वीयं मत्वा ज्ञात्वा । तेन कृतस्यापराधस्य संबन्धः स्व- स्मिन्नागच्छतीति ज्ञात्वा । मोहान्मूर्खतया भयान्नृपदण्डभीत्या वा । प्रत्याख्याय विपरीत- मुक्त्वा पूर्वोक्तमनङ्गीकृत्य । 'तस्थौ' इत्यध्याहार्यमन्यथा क्रियाद्वयस्यैककर्तृकत्वा- भावात् 'मत्वा' 'प्रत्याख्याय' इति स्थलद्वये क्त्वाप्रत्ययस्यानुपपत्तेः । पुनर्भूयो विभा- विते स्वभाषितं प्रमाणादिना स्थिरीकृते कुपितेन राज्ञा परस्परविरुद्धभाषणादिना क्रुद्धेन नृपेण निगृह्य बलाद्गृहीत्वा निगडबन्धनं शृङ्खलाबन्धमनीयत प्रापितः ।

तेष्विति । कल्पोक्तेन पूर्वं नृपाग्रे प्रतिपादितानुसारेण विधिना विधानेन दोग्धुं कामोऽभिलाषो यस्याः सा । पूर्वं दुग्धो गृहीतधन इति यावत्तं क्षपणीभूतं बुद्धमतवर्तिनं

---

१ 'आकृष्य' व. २ 'विभावितेन' व. ३ 'विधिकल्पेन' व

दुग्धं क्षपणीभूतं विरूपकं रहस्युपसृत्य ततोऽपहृतं सर्वमर्थजातं तस्मै प्रत्यर्प्य सप्रश्रयं च बह्वनुनीय प्रत्यागमत्। सोऽपि कथंचिन्निर्ग्रन्थिकग्रहान्मोचितात्मा मदनुशिष्टो हृष्टतमः स्वधर्ममेव प्रत्यपद्यत। काममञ्जर्यपि कतिपयैरेवाहोभिरश्मन्तकशेषमजिनरत्नदोहाशया स्वमभ्युदयमकरोत्। अथ मत्प्रयुक्तो धनमित्रः पार्थिवं मिथो व्यज्ञापयत्—'देव, येयं गणिका काममञ्जरी लोभोत्कर्षाल्लोभमंजरीति लोकोपक्रोशपात्रमासीत्, साऽद्य मुशलोलूखलान्यपि निरपेक्षं त्यजति। तन्मन्ये मच्चर्मरत्नलाभं हेतुम्। तस्य खलु कल्पस्तादृशः। वणिग्भ्यो वारमुख्याभ्यश्च दुग्धे नान्येभ्य इति हि तद्गता प्रतीतिः। अतोऽमुष्यामस्ति मे शङ्का' इति। सा सद्य एव राज्ञा सह जनन्या समाहूयत। व्यथितवर्णेनेव मयोपह्वरे कथितम्—'नूनमार्ये, सर्वस्वत्यागादतिप्रकाशादाशङ्कनीयचर्मरत्नलाभा तदनुयोगायाङ्गराजेन समा-

---

संन्यासिनं रहस्यकान्त उपसृत्य गत्वा ततस्तस्मादपहृतं चोरितमर्थजातं धनसमूहं प्रत्यर्प्य पुनः समर्प्य सप्रश्रयं सविनयं बह्वतीवानुनीय तन्मनस्तोषं विधायेत्यर्थः। सोऽपि विरूपकोऽपि कथंचिन्महता कष्टेन निर्ग्रन्थिकग्रहान्नग्नकानां बौद्धानां ग्रहान्मतनिर्बन्धात्। 'निर्ग्रन्थो नग्नकेऽपि स्यात्' 'ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु' इति च मेदिनी। मोचितस्त्याजित आत्मा यस्य सः मदनुशिष्टो मयोपदिष्टो हृष्टतमोऽतीव संतुष्टः स्वधर्ममेव स्वीयं वर्णाश्रमप्रधानं सनातनधर्ममेव प्रत्यपद्यत प्राप्तोऽङ्गीचकारेत्यर्थः। एतेन तदा बुद्धादिधर्मस्थानां पुनः स्वधर्मसंग्रहप्रचार आसीदिति ज्ञायते। कतिपयैरेवाहोभिः स्वल्पैरेव दिवसैः। अश्मन्तकं चुल्लिः शेषो यस्य तथाभूतं स्वमभ्युदयं स्वीयमुत्कर्षम्। 'अश्मन्तमशुभे क्षेत्रे चुल्याम्' इति हेमचन्द्रः। अजिनरत्नं चर्मरत्नं तस्य दोहः सुवर्णप्रपूरणं तस्याशयेच्छया। स्वीयं सर्वं धनं येभ्यः संपादितं तेभ्यः प्रत्यर्पयामासेत्यर्थः। मत्प्रयुक्तो मया प्रेषितः पार्थिवं पृथ्व्या ईश्वरं नृपम्। 'तस्येश्वर' इत्यण्। लोभोत्कर्षाल्लोभाधिक्यात् लोकानां जनानामुपक्रोशस्य निन्दायाः पात्रं भाजनम्। सा तथाभूतलोभाविष्टा। मुशलोलूखलानि कुट्टनसाधनान्यपि निरपेक्षं मनसि कमपि हेतुमधृत्वेत्यर्थः। मम चर्मरत्नस्य लाभं प्राप्तिम्। इदं मन्ये इत्यत्र कर्मत्वेनान्वेति। तस्य चर्मरत्नस्य कल्पो विधानप्रकारस्तादृशोऽन्यायापहृतप्रत्यर्पणरूपः। वणिग्भ्यो वैश्येभ्यो वारमुख्याभ्यश्च वेश्याभ्यश्च दुग्धे फलतीति तद्गता चर्मरत्ननिष्ठा प्रतीतिः ख्यातिः। अतस्तस्मादमुष्यां काममञ्जर्यां मे शङ्का तया सा चोरितेत्येवंरूपा। सह जनन्या मात्रा सह। समाहूयत ह्वयतेः कर्मणि लङ्। व्यथितवर्णेनेव कृत्रिमं दुःखिताकारं कृत्वेत्यर्थः। उपह्वर एकान्ते नूनमसंशयं सर्वस्वस्य स्वीयस्य सकलधनादिकस्य त्यागात्प्रत्यर्पणादतिप्रकाशादत्यन्तं

---

१ 'निर्ग्रान्थिकाग्रहात्' ब. २ 'लाभहेतु' ब; 'लाभहेतुस्तस्याः' ब.

निर्विष्यापवाहितोऽभूत् । इयं च वार्ता कृत्रिमार्तिना धनमित्रेण चर्मरत्ननाशमादावेवोपक्षिप्य पार्थिवाय निवेदिता । स चार्थपतिमाहूयोपह्वरे पृष्टवान्--'भद्र, किमस्ति कश्चिद्विमर्दको नामात्रभवतः' इति । तेन च मूढात्मना--'अस्ति देव, परं मित्रम् । कश्च तेनार्थः' इति कथिते राज्ञोक्तम्--'अपि शक्नोषि तमाह्वातुम्' इति । 'बाढमस्मि शक्तः' इति निर्गत्य स्वगृहे वेशवाटे द्यूतसभायामापणे च निपुणमन्विष्यन्नोपलब्धवान् । कथं वोपलभ्येत स वराकः । स खलु विमर्दको मद्ग्राहितत्वदभिज्ञानचिह्नो मन्नियोगात्त्वदन्वेषणायोज्जयिनीं तदहरेव प्रातिष्ठत । अर्थपतिस्तु तमदृष्ट्वा तत्कृतमपराधमात्मसंबद्धं मत्वा मोहाद्भयाद्वा प्रत्याख्याय पुनर्धनमित्रेण विभाविते कुपितेन राज्ञा निगृह्य निगडबन्धनमनीयत ।

16 तेष्वेव दिवसेषु विधिना कल्पोक्तेन चर्मरत्नं दोग्धुकामा काममञ्जरी पूर्व-

---

निर्वार्यापवाहितो निष्कासितः । कृत्रिमा कृत्या निर्मिता न सत्या आर्तिः पीडा यस्य तेन । इयं वार्ता विमर्दकेनाजिनरत्नं हरिष्यामीति प्रतिज्ञातमिति वार्ता । सोऽङ्गराजः उपह्वर एकान्ते । अत्रभवतस्ते विमर्दको नाम तदाख्यः कश्चित्कोऽपि । मूढात्मना मूर्खेण परं मित्रमत्यन्तसुहृत् कस्तेनार्थः किं तेन प्रयोजनम् । आव्हातुमत्रानेतुमित्यर्थः बाढमित्यङ्गीकारे । वेशवाटे वेश्यागृहमार्गे द्यूतसभायां द्यूतक्रीडास्थाने आपणे पण्यवीथिकायां निपुणं सम्यक् अन्विष्यन्मार्गयमाणो नोपलब्धवान् न प्राप्तवान् । कथं वा कया वा रीत्या स विमर्दको वराको दीन उपलभ्येत प्राप्येत । मया ग्राहितं बोधितं तव राजवाहनस्याभिज्ञानं प्रत्यभिज्ञानं तस्य चिन्हं यस्य सः मन्नियोगान्मदाज्ञया तवान्वेषणाय गवेषणाय तदहरेव तस्मिन्नेवाहनि प्रातिष्ठत प्रस्थितः । तं विमर्दकमदृष्ट्वा प्रयत्नेनाप्यनवलोक्य । तत्कृतं विमर्दकेनाचरितमपराधं दोषमात्मसंबद्धं स्वीयं मत्वा ज्ञात्वा । तेन कृतस्यापराधस्य संबन्धः स्वस्मिन्नागच्छतीति ज्ञात्वा । मोहान्मूर्खतया भयान्नृपदण्डभीत्या वा । प्रत्याख्याय विपरीतमुक्त्वा पूर्वोक्तमनङ्गीकृत्य । 'तस्थौ' इत्यध्याहार्यमन्यथा क्रियाद्वयस्यैककर्तृकत्वाभावात् 'मत्वा' 'प्रत्याख्याय' इति स्थलद्वये क्त्वाप्रत्ययस्यानुपपत्तेः । पुनर्भूयो विभाविते स्वभाषितं प्रमाणादिना स्थिरीकृते कुपितेन राज्ञा परस्परविरुद्धभाषणादिना क्रुद्धेन नृपेण निगृह्य बलाद्गृहीत्वा निगडबन्धनं शृङ्खलाबन्धमनीयत प्रापितः ।

तेष्विति । कल्पोक्तेन पूर्वं नृपाग्रे प्रतिपादितानुसारेण विधिना विधानेन दोग्धुं कामोऽभिलाषो यस्याः सा । पूर्वं दुग्धो गृहीतधन इति यावत्तं क्षपणीभूतं बुद्धमतवर्तिनं

---

१ 'आकृष्य' व. २ 'विभावितेन' व. ३ 'विधिकल्पेन' व

दुग्धं क्षपणीभूतं विरूपकं रहस्युपसृत्य ततोऽपहृतं सर्वमर्थजातं तस्मै प्रत्यर्प्य सप्रश्रयं च बह्वनुनीय प्रत्यागमत्। सोऽपि कथंचिन्निर्ग्रन्थिकग्रहान्मोचितात्मा मदनुशिष्टो हृष्टतमः स्वधर्ममेव प्रत्यपद्यत। काममञ्जर्यपि कतिपयैरेवाहोभिरश्मन्तकशेषमजिनरत्नदोहाशया स्वमभ्युदयमकरोत्। अथ मत्प्रयुक्तो धनमित्रः पार्थिवं मिथो व्यज्ञापयत्—'देव, येयं गणिका काममञ्जरी लोभोत्कर्षाल्लोभमंजरीति लोकोपक्रोशपात्रमासीत्, साऽद्य मुशलोलूखलान्यपि निरपेक्षं त्यजति। तन्मन्ये मच्चर्मरत्नलाभं हेतुम्। तस्य खलु कल्पस्तादृशः। वणिग्भ्यो वारमुख्याभ्यश्च दुग्धे नान्येभ्य इति हि तद्गता प्रतीतिः। अतोऽमुष्यामस्ति मे शङ्का' इति। सा सद्य एव राज्ञा सह जनन्या समाहूयत। व्यथितवर्णेनेव मयोपह्वरे कथितम्—'नूनमार्ये, सर्वस्वत्यागादतिप्रकाशादाशङ्कनीयचर्मरत्नलाभा तदनुयोगायाङ्गराजेन समा-

---

संन्यासिनं रहस्यकान्त उपसृत्य गत्वा ततस्तस्मादपहृतं चोरितमर्थजातं धनसमूहं प्रत्यर्प्य पुनः समर्प्य सप्रश्रयं सविनयं बह्वतीवानुनीय तन्मनस्तोषं विधायेत्यर्थः। सोऽपि विरूपकोऽपि कथंचिन्महता कष्टेन निर्ग्रन्थिकग्रहान्नग्नकानां बौद्धानां ग्रहान्मतनिर्बन्धात्। 'निर्ग्रन्थो नग्नकेऽपि स्यात्' 'ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु' इति च मेदिनी। मोचितस्त्याजित आत्मा यस्य सः मदनुशिष्टो मयोपदिष्टो हृष्टतमोऽतीव संतुष्टः स्वधर्ममेव स्वीयं वर्णाश्रमप्रधानं सनातनधर्ममेव प्रत्यपद्यत प्राप्तोऽङ्गीचकारेत्यर्थः। एतेन तदा बुद्धादिधर्मस्थानां पुनः स्वधर्मसंग्रहप्रचार आसीदिति ज्ञायते। कतिपयैरेवाहोभिः स्वल्पैरेव दिवसैः। अश्मन्तकं चुल्लिः शेषो यस्य तथाभूतं स्वमभ्युदयं स्वीयमुत्कर्षम्। 'अश्मन्तमशुभे क्षेत्रे चुल्याम्' इति हेमचन्द्रः। अजिनरत्नं चर्मरत्नं तस्य दोहः सुवर्णप्रपूरणं तस्याशयेच्छया। स्वीयं सर्वं धनं येभ्यः संपादितं तेभ्यः प्रत्यर्पयामासेत्यर्थः। मत्प्रयुक्तो मया प्रेषितः पार्थिवं पृथ्व्या ईश्वरं नृपम्। 'तस्येश्वर' इत्यण्। लोभोत्कर्षाल्लोभाधिक्यात् लोकानां जनानामुपक्रोशस्य निन्दायाः पात्रं भाजनम्। सा तथाभूतलोभाविष्टा। मुशलोलूखलानि कुट्टनसाधनान्यपि निरपेक्षं मनसि कमपि हेतुमधृत्वेत्यर्थः। मम चर्मरत्नस्य लाभं प्राप्तिम्। इदं मन्ये इत्यत्र कर्मत्वेनान्वेति। तस्य चर्मरत्नस्य कल्पो विधानप्रकारस्तादृशोऽन्यायापहृतप्रत्यर्पणरूपः। वणिग्भ्यो वैश्येभ्यो वारमुख्याभ्यश्च वेश्याभ्यश्च दुग्धे फलतीति तद्गता चर्मरत्ननिष्ठा प्रतीतिः ख्यातिः। अतस्तस्मादमुष्यां काममञ्जर्यां मे शङ्का तया सा चोरितेत्येवंरूपा। सद्य जनन्या मात्रा सह। समाहूयत ह्वयतेः कर्मणि लङ्। व्यथितवर्णेनेव कृत्रिमं दुःखिताकारं कृत्वेत्यर्थः। उपह्वर एकान्ते नूनमसंशयं सर्वस्वस्य स्वीयस्य सकलधनादिकस्य त्यागात्प्रत्यर्पणादतिप्रकाशादत्यन्तं

---

१ 'निर्ग्रन्थिकाग्रहात्' ब. २ 'लाभहेतु' ब; 'लाभहेतुस्तस्याः' ब.

ह्रियसे। भूयोभूयश्च निर्बद्धया त्वया नियतमस्मि तदागतित्वेनाहमपदेश्यः। ततश्च मे भावी चित्रवधः। मृते च मयि न जीविष्यत्येव ते भगिनी। त्वं च निःस्वीभूता। चर्मरत्नं च धनमित्रमेव प्रतिभजिष्यति। तदियमापत्समन्ततोऽनर्थानुबन्धिनी। तत्किमत्र प्रतिविधेयम्' इति। तया तज्जनन्या चाश्रूणि विसृज्योक्तम्—'अस्त्येवैतदस्मद्बालिश्यान्निर्भिन्नप्रायं रहस्यम्। राज्ञश्च निर्बन्धाद्द्वित्रिश्चतुर्निह्नुत्यापि नियतमागतिरपदेश्यैव चोरितस्य त्वयि। त्वयि त्वपदिष्टे सर्वमस्मत्कुटुम्बमवसीदेत्। अर्थपतौ च तदपयशो रूढम्। अङ्गपुरप्रसिद्धं च तस्य कीनाशस्यास्माभिःसंगतम्। अमुनैव तदस्मभ्यं दत्तमित्यपदिश्य वरमात्मा गोपायितुम्' इति मामभ्युपगमय्य

व्यक्ततया कृतात् आशङ्कनीयः संभावनीयश्चर्मरत्नस्य लाभः प्राप्तिर्यस्याः सा। तस्य चर्मरत्नस्यानुयोगाय प्रश्नाय। 'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः। भूयो भूयः पुनः पुनर्निर्बद्धयाऽऽग्रहस्पृष्टया नियतं निश्चयेन तस्य चर्मरत्नस्यागतित्वेन प्राप्तिकारणत्वेनापदेश्यः कथनीयः। केन दत्तं चर्मरत्नमिति सानुबन्धं पृष्टा त्वमसंशयं मन्नाम निवेदयसीत्यर्थः। ततश्च मे मम चित्रवधो विचित्रेणोपायेन हननं भावी भविता। तस्य चौर्यस्य कर्तारं मां नृपो हन्यादिति तात्पर्यम्। भगिनी रागमञ्जरी न जीविष्यति प्राणान् न धारयिष्यति। निःस्वीभूता दरिद्रतां गता। चर्मरत्नं च यदाशया त्वया सर्वस्वं हारितं तदित्यर्थः। प्रतिभाजिष्यति तदधीनमेव भवेदित्यर्थः। इयं परापतितापद्विपत्तिः समन्ततः सर्वतोऽनर्थान् संकटान्यनुबध्नात्यानयति तथाभूता। तत्तस्मादत्रास्यां विपत्तौ किं प्रतिविधेयं को वा प्रतिकारोऽस्या इति प्रश्नाभिप्रायः। तया तथाभूतविपत्पराभूतया काममञ्जर्या तज्जनन्या रागमञ्जरीमात्रा च। अश्रूणि बाष्पं विसृज्य विमुच्य। अस्मद्बालिश्यादस्माकं मौर्ख्यात् निर्भिन्नप्रायं स्फुटीभूतमेव रहस्यं त्वया मुषित्वा अस्मभ्यं चर्मरत्नं दत्तमिति बालिशाद्भावे ष्यञ्। 'मूर्खवैधेयबालिशा' इत्यमरः। राज्ञो निर्बन्धान्नृपस्याग्रहात् द्विस्त्रिश्चतुः द्वित्रिचतुर्वारामित्यर्थः। 'द्वित्रिचतुर्भ्यः सुच्' निह्नुत्यापि निगूह्यापि नियतं निश्चयेन चोरितस्य चर्मरत्नस्यागतिरागमनं प्राप्तिरित्यर्थः त्वय्यपदेश्यैव त्वत्सकाशाल्लब्धमिति। निवेदनमवश्यकर्तव्यतामापद्येतेति भावः। अपदिष्टे कथितेऽस्मदीयं कुटुम्बं कुलमवसीदेन्नश्येत्। तदपयशश्चर्मरत्नस्तेयापकीर्तिः रूढं प्रसिद्धम्। कीनाशस्य कृपणस्य संगतं संगमनमङ्गपुरे प्रसिद्धं ख्यातम्। अमुनैवार्थपतिनैव तच्चर्मरत्नं दत्तमर्पितम्। इत्यपदिश्यैवं कथयित्वा। आत्मा गोपायितुं रक्षितुं वरं श्रेष्ठमस्माभिरिति शेषः। तेनात्मनः कर्मत्वेऽप्यभिहितत्वात्प्रथमा। मामभ्युपगमय्य बोधयित्वा। 'ल्यपि लघुपूर्वाद्' इत्यनेन

---

१ 'तदागत्वेन' ब. २ 'त्रिचतुरमतिनिन्हुत्यापि' ब.

राजकुलमगमताम् । राज्ञाऽनुयुक्ते च 'नैष न्यायो वेशकुलस्य यद्दातुरपदेशः । न ह्यर्थैर्न्यायार्जितैरेव पुरुषा वेशमुपतिष्ठन्ति' इत्यसकृदतिप्रणुद्य कर्णनासाच्छेदोपक्षेप-भीषिताभ्यां दग्धबन्धकीभ्यां स एव तपस्वी तस्करत्वेनार्थपतिरग्राह्यत । कुपितेन च राज्ञा तस्य प्राणेषूद्यतो दण्डः । प्राञ्जलिना धनमित्रेणैव प्रत्यषिध्यत—'आर्य, मौर्यदत्त एष वरो वणिजाम् । ईदृशेष्वपराधेष्वसुभिरवियोगः । यदि कुपितोऽसि हृतसर्वस्वो निर्वासनीयः पाप एषः' इति । तन्मूला च धनमित्रस्य कीर्तिरप्रथत । अप्रीयत च भर्ता । पटच्चरच्छेदशेषोऽर्थपतिरर्थमत्तः सर्वपौरजनसमक्षं निरवास्यत । तस्यैव द्रव्याणां तु केनाचिदवयवेन सा वराकी काममञ्जरी चर्मरत्नमृगतृष्णिकापवि-द्धसर्वस्वा सानुकम्पं धनमित्राभिनोदितेन भूपेनान्वगृह्यत । धनमित्रश्चाहनि गुणिनि कुरुपालिकामुपायंस्त । तदेवं सिद्धसंकल्पो रागमञ्जरीगृहं हेमरत्नपूर्णमकरवम् ।

ल्यप् । राजकुलं राजगृहमगमतां काममञ्जरी तन्माता चेति द्विवचनम् । राज्ञा नृपेणानु-युक्ते पृष्टे । वेशकुलस्य वेश्याजनस्यैष न्याय ईदृशी रीतिर्न । दातुरर्पयितुरपदेशः कथनम् । तत्कारणमाह । न हीति । न्यायेन योग्यमार्गेणोपार्जितैः संपादितैरेवार्थैर्धनैर्वेशं गणिकामु-पतिष्ठन्ति प्राप्नुवन्ति सेवन्त इति यावत् । असकृद्वारंवारमतिप्रणुद्यात्यन्तं तन्नामकथनं प्रच्छाद्य । कर्णसहिता नासा श्रवणसहिता नासिकेति समासः । अन्यथा शरीरावयवत्वा-देकवद्भावे द्वन्द्वसमासे कर्णनासच्छेदेति स्यात् । तथाभूताया नासिकायाश्छेदः कर्तनं तस्योपक्षेपः प्रस्तावस्तेन भीषिताभ्यामुत्पादितभयाभ्यां दग्धबन्धकीभ्यां दुष्टकुलटाभ्यां स एव पूर्वोक्तस्तपस्वी वराकः तस्करत्वेन चोरत्वेनाग्राह्यत ग्राहितः । तस्यार्थपतेः प्राणे-षु जीविते दण्ड उद्यतः स हन्तव्य इत्याज्ञप्तमित्यर्थः । प्राञ्जलिना कृतनमस्कारेण प्रत्य-षिध्यत न्यवार्यत । मौर्येण तत्संज्ञकनृपेण दत्तोऽर्पितः । ईदृशेषु चौर्यरूपेष्वपराधेषु । असुभिः प्राणैरवियोगोऽविरहः । न वणिजां स्तेयार्थे प्राणहरो दण्डो विधेयः । हृतसर्व-स्वो गृहीतसर्वधनो निर्वासनीयो राष्ट्रान्निःसारणीयः पापो दुष्टकर्मा । तन्मूला तादृशप्रा-र्थनया जातेत्यर्थः कीर्तिर्यशोऽप्रथत प्रसिद्धिं ययौ । भर्ता नृपोऽप्रीयत तस्योदाराशयेन तुतोष । पटच्चरस्य जीर्णवसनस्य छेदः खण्डः शेषोऽवशिष्टो यस्य सोऽर्थैर्धनैर्मत्तः । 'पट-च्चरं जीर्णवस्त्रम्' इत्यमरः । सर्वेषां पौराणां नागरिकाणां समक्षं पुरत इति यावत् । निरवास्यत निष्कासितः । तस्यैवार्थपतेरेव द्रव्याणामिति बहुत्वेन धनस्यापरिमेयत्वं दर्शितम् । केनचिदवयवेन स्वल्पेनांशेन वराकी दीना चर्मरत्नस्य मृगतृष्णिका मरीचिका तयाऽपविद्धं हारितं सर्वं सकलं स्वं धनं यया सा । सानुकम्पं सदयं धनमित्रेणाभिनो-दितः प्रेरितस्तेन भूपेन नृपेणान्वगृह्यतातोष्यत । गुणिन्यहनि शोभने दिवसे उपायंस्त पर्यणयत । तत्तस्मादेवमनया रीत्या सिद्धसंकल्पः पूर्णेच्छः रागमञ्जर्या गृहं हेमरत्नैः सुवर्णेन रत्नैश्च पूर्णं भरितमकरवं कृतवान् ।

17 अस्मिंश्च पुरे लुब्धसमृद्धवर्गस्तथा मुषितो यथा कपालपाणिः स्वैरेव धनैर्मद्विश्राणितैः समृद्धीकृतस्यार्थिवर्गस्य गृहेषु भिक्षार्थमभ्रमत् । न ह्यलमतिनिपुणोऽपि पुरुषो नियतिलिखितां लेखामतिक्रमितुम् । यतोऽहमेकदा रागमञ्जर्याः प्रणयकोपप्रशमनाय सानुनयं पायितायाः पुनःपुनः प्रणयसमर्पितमुखमधुगण्डूषमास्वादमास्वादं मदेनास्पृश्ये । शीलं हि मदोन्मादयोरमार्गेणाप्युचितकर्मस्वेव प्रवर्तनम् । यदहमुपोढमदः ' नगरमिदमेकयैव शर्वर्या निर्धनीकृत्य त्वद्भवनं पूरयेयम् ' इति प्रव्यथितप्रियतमाप्रणामाञ्जलिशपथशतातिवर्ती मत्तवारण इव रभसाच्छिन्नशृङ्खलः

अस्मिन्निति । लुब्धाः कदर्याश्च समृद्धाः श्रीमन्तश्च तेषां वर्गः समूहः । तथा मुषितस्तेन प्रकारेण चोरितः । एतेन श्रीमतामप्यलुब्धानां स्तेयं न विहितमिति प्रतीयते। कपालं खर्परं घटभागो पाणौ हस्ते यस्य स स्वैरेव स्वकीयैरेव मया विश्राणितैर्दत्तैर्धनैः समृद्धीकृतस्य सधनीकृतस्यार्थिवर्गस्य याचकसमूहस्य गृहेषु भिक्षार्थमुदरपूर्त्यर्थं भक्षणादियाचनायेत्यर्थः । अभ्रमदाटत् । अतिनिपुणोऽप्यतिप्रवीणोऽपि नियत्या दैवेन लिखितां लेखां ललाटे लिखितां स्वभाग्यपाङ्क्तिमतिक्रमितुमन्यथा कर्तुं नालं न समर्थः । तदेव प्रतिपादयति । यत इति । एकदैकस्मिन् काले प्रणयकोपः प्रीतिकलहस्तस्य शमनाय दूरीकरणाय सानुनयं ससान्त्वनं पायिताया मद्यपानं कारिताया रागमञ्जर्या मद्दयितायाः । क्रोधो हि मद्यपानजनितकामेच्छयान्तर्हितो भवति । प्रणयेन प्रीत्या समर्पितं सम्यग् दत्तं मुखमधुनः वदने धृतस्य मद्यस्य गण्डूषं पीतोच्छितं मद्यमास्वादमास्वादं पुनः पुनरास्वाद्येत्यर्थः । ' आभीक्ष्ण्ये णमुल् ' । मदेन मद्यपानाधिक्यजविकारेणास्पृश्ये स्पृष्टः । कर्मणि लङ् । ' गण्डूषो मुखपूरण ' इति हैमः । मदः स्वतुल्यान्याभावबुद्धिरुन्मादो मदजन्यो मानसरोगविशेषश्च तयोः शीलं स्वभावः । ' अहं महात्मा धनवान् मत्तुल्यः कोऽस्ति भूतले । इति यज्जायते चित्तं मदः प्रोक्तः स कोविदैः ' इति पाद्मे । ' मदयन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः । मानसोऽयमतो व्याधिरुन्माद इति कीर्तितः ' । अमार्गेणायोग्यपथेनाप्युचितकर्मसु पूर्वाभ्यस्तक्रियासु प्रवर्तनं प्रवृत्तिः । इयांस्तत्र भेदो मदोन्मादाभावे विचारपूर्विका प्रवृत्तिस्तत्सत्वे त्वमार्गेण । अत एवोन्मादस्वरूपवर्णनेऽगदङ्काराः ' प्रमोहयन्त्याशु नरस्य चेत ' इत्याहुः । यद्यस्मादुन्मादप्रभावादिति यावत् । उपोढमदो वृद्धिंगतमदः एकयैव शर्वर्याऽस्यामेव रात्रौ निर्धनीकृत्य निर्द्रव्यीकृत्य । नगरस्थं सकलमपि वित्तं मुषित्वेत्यर्थः । त्वद्भवनमर्थाद्रागमञ्जरीगृहं पूरयेयं पूर्णं कुर्याम् । आशंसायां लिङ् । इतीत्यस्याग्र उक्त्वेति शेषः । प्रव्यथिता मत्साहसश्रवणदुःखिता प्रियतमा रागमञ्जरी तस्याः प्रणामाञ्जलयो नमस्काराः शपथाश्च तेषां शतमतिवर्ततेऽतिक्रामति सः ।

१ ' लिखिते ' व. २ 'यापितायाः' व. ३ 'पुनःपुनः' इत्येतन्नास्ति व-ब-पुस्तकयोः. ४ ' इदमनयैकया' व ब.

कयापि धात्र्या शृगालिकाख्ययानुगम्यमानो नातिपरिकरोऽसिद्वितीयो रंहसा परेणोदचलम्। अभिपततोऽपि नागरिकपुरुषानशङ्कमेव विगृह्य तस्कर इति तैरभिहन्यमानोऽपि नातिकुपितः क्रीडन्निव मदावसन्नहस्तपतितेन निस्त्रिंशेन द्वित्रानेव हत्वावघूर्णमानताम्रदृष्टिरपतम्। अनन्तरमार्तरवान्विसृजन्ती शृगालिका ममाभ्याशमगमत्। अबध्ये चाहमरिभिः। आपदा तु मदापहारिण्या सद्य एव बोधितस्तत्क्षणोपजातया प्रतिभया व्यचीचरम्—'अहो, ममेयं मोहमूला महत्यापदापतिता। प्रसृततरं च सख्यं मया सह धनमित्रस्य, मत्परिग्रहत्वं च रागमञ्जर्याः। मदेनसा च तौ प्रोर्णुतौ श्वो नियतं निग्रहीष्येते। तदियमिह प्रतिपत्तिर्ययानुष्ठीयमानया

तत्प्रार्थनामविगणय्येत्यर्थः। मत्तवारण इव मत्तगज इव रभसेन वेगेन छिन्ना भिन्ना शृङ्खला लोहमयी बन्धनरज्जुर्येन सः अत्र शृङ्खलास्थानीयाः प्रेयस्या शपथनमस्कृतयः। धात्र्योपमात्रा। 'धात्री जनन्यामलकी वसुमत्युपमातृषु' इति मेदिनी। शृगालिकाख्यया तन्नामिकया। नातिपरिकरोऽगृहीतसेवकोऽसिद्वितीयः खङ्गसहायः परेण रंहसा महता वेगेनोदचलमुदपतम्। अभिपततः संमुखमागच्छतो नागरिकपुरुषान् पुररक्षकान् अशङ्कं शङ्कावर्जितं विगृह्य युद्ध्वा तस्कर इति चोर इति तैः रक्षापुरुषैरभिहन्यमानोऽपि ताड्यमानोऽपि नातिकुपितो नात्यन्तं संक्रुद्धः क्रीडन्निव रममाण इव मदेनावसन्नः शिथिलीभूतो यो हस्तः करस्तस्मात्पतितेन निस्त्रिंशेन खड्गेन। द्वित्रान् द्वौ वा त्रयो वा तान्। 'संख्ययाव्यये०' त्यनेन समासः। 'बहुव्रीहौ संख्येये०' इत्यनेन डच्। हत्वा व्यापाद्यावघूर्णमाना भ्राम्यन्ती ताम्रा मद्यक्रोधविकारतो रक्तवर्णा दृष्टिर्यस्य सः। अपतमस्खलम्। अनन्तरं मम पातानन्तरमार्तरवान् दुःखशब्दान् विसृजन्ती मुञ्चन्ती। अभ्याशं निकटम्। अरिभिः शत्रुभिरबध्ये बद्धः। मदमपहरति नाशयति तच्छीलया। ताच्छील्ये णिनिः। मद्यमत्तश्च संकटपतितो मदं विजहातीति प्रसिद्धम्। बोधितः प्रकृतिमापादितः। तस्मिन्नेव क्षणे जातयोत्पन्नया प्रतिभया प्रज्ञया। 'प्रज्ञा नवनवोल्लासशालिनी प्रतिभा मते' ति भरतः। व्यचीचरं विचारं कृतवान्। चरतेर्विपूर्वाण्णिजन्ताल्लुङ्। मोहमूलाऽज्ञानजनिता महत्यतिशयिताऽऽपद्विपत्तिरापतिता प्राप्ता। सख्यं सौहार्दं प्रसृततरमतिप्रसिद्धम्। मत्परिग्रहत्वं मत्पत्नीत्वम्। 'परिग्रहः परिजने पत्न्याम्' इति हैमः। मदेनसा मत्पापेन तौ मद्भार्यासुहृदौ प्रोर्णुतौ व्याप्तौ श्व आगामिन्यहनि नियतमसंशयम्। निग्रहीष्येते राजाधिकारिभिर्भन्त्स्येते। इयं वक्ष्यमाणा प्रतिपत्तिः कर्तव्यनिर्णयः। अनुष्ठीय-

---

१ 'अवगाह्य' ब. २ 'अपि' इत्येतन्नास्ति ब पुस्तके ३ 'निग्राहयिष्येते' ब-ब.

मन्नियोगतस्तौ परित्रास्येते । मां च कदाचिदनर्थादितस्तारयिष्यत ’ इति कमप्युपायमात्मनैव निर्णीय शृगालिकामगादिषम्—‘ अपेहि जरतिके, या तामर्थलुब्धां दग्धगणिकां रागमञ्जरिकामजिनरत्नमत्तेन शत्रुणा मे मित्रच्छद्मना धनमित्रेण संगमितवती, सा हतासि । तस्य पापस्य चर्मरत्नमोषाद्दुहितुश्च ते साराभरणापहारादहमद्य निःशल्यमुत्सृजेयं जीवितम् ’ इति । सा पुनरुद्घटितज्ञा परमधूर्ता साश्रुगद्गदमुदञ्जलिस्तान्पुरुषान्सप्रणाममासादितवती । सामपूर्वं मम पुरस्तादयाचत—‘ भद्रकाः, प्रतीक्षध्वं कंचित्कालं यावदस्मादस्मदीयं सर्वं मुषितमर्थजातमवगच्छेयम् ’ इति । तथेति तैः प्रतिपन्ने पुनर्मत्समीपमासाद्य ‘ सौम्य, क्षमस्वास्य दासीजनस्यैकमपराधम् । अस्तु स कामं त्वत्कलत्राभिमर्शी वैरास्पदं धनमित्रः । स्मरंस्तु चिरकृतां ते परिचर्यामनुग्रहीतुमर्हसि दासीं रागमञ्जरीम् । आकल्पसारो हि रूपा-

---

मानयाऽऽचरितया । मन्नियोगतः मयि जायमानादभियोगादित्यर्थः । परित्रास्येते रक्षिष्येते । मयि कृतेऽप्यभियोगे तयो रक्षणं मदीयया प्रतिपत्त्या स्यादित्यर्थः । अत्र नियोगशब्दोऽभियोगवाचकः स्वीकृतः । अथवा नियोगत आदेशादित्यर्थः । इतोऽनर्थादस्मात्संकटान् तारयिष्यतो रक्षिष्यतः । तारयिष्यतीति पाठस्तु प्रतिपत्तिकर्तृको यथाकथंचिन्नेयः । आत्मनैव स्वेनैव निर्णीय निश्चित्य । अगादिषमवादिषम् । जरतिके वृद्धेऽपेहि गच्छ । अर्थलुब्धां धनासक्तां दग्धगणिकां दुष्टां वेश्यामजिनरत्नेन मत्त उन्मत्तस्तेन मित्रच्छद्मना कपटसुहृदा संगमितवती संयोजितवती । तस्य पापस्य दुष्टस्य धनमित्रस्य चर्मरत्नस्य मोषात्स्तेयात् ते दुहितुः रागमञ्जर्याः साराभरणानां सारभूतानां बहुमूल्यानामलंकाराणां चौर्यात् । निःशल्यं निर्दुःखम् । उत्सृजेयं त्यजेयम् । उद्घटितं सूचितं जानाति सा । ‘ सूचनमुद्घटनं बोधिः ’ इत्यजयः । परमधूर्ताऽतिनिपुणा । उदञ्जलिर्बद्धकरपुटा साश्रुगद्गदमश्रुभिः सह गद्गदमस्पष्टोच्चारणं यस्मिन्यथा स्यात्तथा । सप्रणामं सनमस्कारम् । आसादितवती प्राप्ता तत्समीपं गतेत्यर्थः । सामपूर्वं ससान्त्वनमयाचत प्रार्थयत । भद्रकाः कल्याणरूपाः । स्वार्थे कः । कंचित्कालं स्वल्पं कालं प्रतीक्षध्वं स्वस्था भवत । अस्माद्भवद्भिर्गृहीताच्चोरात् । अस्मदीयं सर्वं मुषितमस्माकं हृतं सकलमर्थजातं धनसमूहमवगच्छेयं जानीयाम् । तथेत्येवमस्त्विति तैः रक्षापुरुषैः प्रतिपन्नेऽङ्गीकृते । आसाद्य प्राप्य । अस्य मद्रूपस्यैकं प्रथमकृतम् । काममत्यन्तं तव कलत्रं भार्यामभिमृशति स्पर्शादिना दूषयति स वैरास्पदं वैरस्थानम् । चिरकृतां बहुकालं विहितां परिचर्यां सेवां स्मरन्मनसा भावयन् दासीं परिचारिकामनुग्रहीतुमनुग्रहविषयभूतां कर्तुम् । आकल्पो वेशोऽर्थात् भूषणं सारः प्रधानो यस्य सः रूपाजीवाजनो वेश्यासमूहः । ‘ वारस्त्री गणिका

---

१ ‘ तारयिष्यति ’ न २ ‘ प्रतीक्ष्यताम् ’ व–न.

जीवाजनः। तद्ब्रूहि क्व निहितमस्या भूषणम्' इति पादयोरपतत्। ततो दयमान इवाहमब्रवम्—'भवतु, मृत्युहस्तवर्तिनः किं ममामुष्या वैरानुबन्धेन' इति। तद्ब्रुवन्निव कर्ण एवैनामशिक्षयम्—'एवमेवं प्रतिपत्तव्यम्' इति। सा तु प्रतिपन्नार्थेव 'जीव चिरम्, प्रसीदन्तु ते देवताः, देवोऽप्यङ्गराजः पौरुषप्रीतो मोचयतु त्वाम्, एतेऽपि भद्रमुखास्तव दयन्ताम्' इति क्षणादपासरत्। आनीये चाहमारक्षिकनायकस्य शासनाच्चारकम्।

18 अथोत्तरेद्युरागत्य दृप्ततरः सुभगमानो सुन्दरंमन्यः पितुरत्ययादचिराधिष्ठिताधिकारस्तारुण्यमदादनतिपक्वः कान्तको नाम नागरिकः किंचिदिव भर्त्सयित्वा मां समभ्यधत्त—'न चेद्धनमित्रस्त्रीजनरत्नं प्रतिप्रयच्छसि, न चेद्वा नागरिकेभ्यश्चोरितकानि प्रत्यर्पयसि, द्रक्ष्यसि पारमष्टादशानां कारणानामन्ते च मृत्युमुखम्' इति। मया तु स्मयमानेनाभिहितम्—'सौम्य यद्यपि दद्यामाजन्मनो मुषितं धनं न त्वर्थपतिदारापहारिणः शत्रोर्मे मित्रमुखस्य, धनमित्रस्य चर्मरत्नप्रत्याशां

वेश्या रूपाजीवे' त्यमरः। क्व निहितं कुत्र स्थापितम्। दयमान इव समुत्पन्नदय इव दयां नाटयित्वेति यावत्। मृत्योर्यमस्य हस्ते वर्तते तस्य समीपागतमरणस्य। अमुष्या रागमञ्जर्याः वैरानुबन्धेन वैरसांतत्येन किं क उपयोग इत्यर्थः। अशिक्षयमकथयम्। प्रतिपत्तव्यं कर्तव्यम्। प्रतिपन्नार्थेवाधिगतधनेव। प्रसीदन्तु प्रसन्ना भवन्तु देवो नृपः 'राजा भट्टारको देवः' इत्यमरः। पौरुषेण पराक्रमेण प्रीतस्तुष्टो मोचयतु मुक्तं करोतु। एतेऽपि पुरोवर्तिनो रक्षापुरुषाः दयन्तां दयां कुर्वताम्। तवेति 'अधीगर्थदयेशाम्' इत्यनेन षष्ठी। अपासरद्दूरं गतवती। आरक्षिकाणां रक्षापुरुषाणां नायकस्याधिपतेः शासनादाज्ञया। तत्र 'नियुक्त' इत्यनेन' 'आरक्ष' शब्दाट्ठक्। चारकं बन्धनालयम्।

अथेति। उत्तरेद्युरुत्तरस्मिन्नहनि। उत्तरपूर्वाद्विव्शब्दादेद्युस्। दृप्ततर उद्धततरः सुभगं सर्वश्रेष्ठमात्मानं मन्यते सः। 'आत्ममाने खश्च' इत्यनेन णिनिः। 'सर्वोन्नतत्वं सौभाग्यं तद्वान् सुभग उच्यते' इति दिवाकरः। अत एवैतत्पदस्याग्रिमपदेन न पौनरुक्त्यम्। सुन्दरंमन्यः स्वं सुरूपं मन्वान इत्यर्थः। पितुरत्ययाज्जनकमरणादचिराधिष्ठितो नूतनलब्धोऽधिकारो येन सः। एतेनाधिकारिपदस्थस्यापेक्षितगुणानां तस्मिन्नभाव इति सूचितम्। तारुण्यस्य यौवनस्य मदाद्दर्पादनतिपक्वः पूर्णतया व्यवहारानभिज्ञः। नागरिकः कारागृहाधिपः। 'कारापतिर्नागरिकः' इति वैजयन्ती। किंचिदिव स्वल्पं भर्त्सयित्वा तर्जयित्वा। समभ्यधत्तावादीत् प्रतियच्छसि प्रत्यर्पयसि। कारणानां यातनानामन्ते समाप्तौ। मृत्युमुखं यमवदनं द्रक्ष्यसि घातिष्यस इति यावत्। स्मयमानेन किंचिद्धसताऽभिहितमुक्तम्। आजन्मनो जन्मन आरभ्य मुषितं चोरितम्। अर्थपते

पूरयेयम् । अदत्त्वैव तदयुतमपि यातनानामनुभवेयम् । इयं मे साधीयसी संधा' इति । तेनैव क्रमेण वर्तमाने सान्त्वनतर्जनप्राये प्रतिदिनमनुयोगव्यतिकरेऽनुगुणान्नपानलाभात्कतिपयैरेवाहोभिर्विरोपितव्रणः प्रकृतिस्थोऽहमासम् ।

19 अथ कदाचिदच्युताम्बरपीतातपत्विषि क्षयिणि वासरे हृष्टवर्णा शृगालिकोज्ज्वलेन वेषेणोपसृत्य दूरस्थानुचरा मामुपश्लिष्याब्रवीत्—'आर्य, दिष्ट्या वर्धसे । फलिता तव सुनीतिः । यथा त्वयादिश्ये तथा धनमित्रमेत्याब्रवम्—'आर्य, तवैवमापन्नः सुहृदित्युवाच—'अहमद्य वेशसंसर्गसुलभात्पानदोषाद्बद्धः । त्वया पुनरविशङ्कमद्यैव राजा विज्ञापनीयः—'देव, देवप्रसादादेव पुरापि तदार्जितरत्नमर्थपतिमुषितमासादितम् । अथ तु भर्ता रागमञ्जर्याः कश्चिदक्षधूर्तः कलासु कवित्वेषु लोकवार्तासु चातिवैचक्षण्यान्मया समसृज्यत । तत्संबन्धाच्च वस्त्राभरणप्रेषणादिना

दारानपहरति तस्य । मित्रमुखस्य कपटसुहृदः । 'मुखं तु वदने मुख्ये ताम्रे छद्मनि वा पुमान्' इति भागुरिः । चर्मरत्नस्य प्रत्याशां पुनर्लाभेच्छाम् । 'प्रत्याशा पुनरार्शाच्छा' इति वैजयन्ती । न पूरयेयं न सफलां कुर्याम् । अदत्त्वैवासमर्प्यैव । अयुतं दश सहस्राणि । साधीयसी दृढतरा संधा प्रतिज्ञा । 'संधा प्रतिज्ञा' इत्यमरः । सान्त्वनं साम तर्जनं भर्त्सनं च प्रायो बहुलं यस्मिंस्तस्मिन् । अनुयोगस्य प्रश्नस्य व्यतिकरे प्रकारे । 'संपर्के च व्यतिकरः प्रकारे' इत्यजयः । अनुगुणे योग्ये अन्नं खाद्यं पानं पेयं च तयोर्लाभात् प्राप्तेः विरोपिता उपशान्ता व्रणाः क्षतजचिन्हानि यस्य सः । 'विरोपित उपशान्तश्चिकित्सित' इति बोपालितः । प्रकृतिस्थः पूर्ववत् सुस्थशरीर इति यावत् ।

अथेति । अच्युतो विष्णुः पीताम्बरस्तस्याम्बरमिव वसनमिव पीता पिशङ्गातपत्विट् प्रकाशकान्तिर्यस्य तस्मिन् । वासरे दिने क्षयिणि क्षीणे सति । सूर्यास्तवेलायामिति यावत् । उज्वलेन मनोरमेण वेषेण नेपथ्येनेतीत्थंभूतलक्षणे तृतीया । उपसृत्य प्राप्य । दूरस्थो दूरवर्ती अनुचरः सेवको यस्याः सा । उपाश्लिष्यालिङ्ग्य । दिष्ट्या दैवेन । आपन्नो विपत्तौ निमग्नः । वेशसंसर्गो वेश्यासंबन्धस्तस्य सुलभः सहजः पानदोषः मद्यपानजनितो दोषस्तस्मात् । अविशङ्कं निशङ्कम् । अर्थपतिना मुषितं चोरितमासादितं प्राप्तम् । अक्षेषु धूर्तः प्रवीणः । 'सप्तमी शौण्डै' रित्यनेन समासः । कलासु चतुःषष्टिसंख्याकासु कवित्वेषु काव्यकरणेषु । कवित्वस्य विभागबाहुल्याद्बहुत्वमनुसंधेयम् । अथवा पाण्डित्येषु । लोकवार्तासु लौकिकव्यवहारेषु । अतिवैचक्षण्यादतिनैपुण्यात्समसृज्यत समगंस्त । तस्य धूर्तशिरोमणेः संबन्धात् वस्त्रं वसनमाभरणं भूषणं च तयोः प्रेषणमादिर्यस्य

---

१ 'आपन्नसुहृदामुना चैवमादिष्टोऽसि' व

तन्नार्यां प्रतिदिनमन्ववर्ते । तदसावशङ्किष्ट निकृष्टाशयः कितवः । तेन च कुपितेन हृतं तच्चर्मरत्नमाभरणसमुद्गकश्च तस्याः । स तु भूयः स्तेयाय भ्रमन्नगृह्यत नागरिकपुरुषैः । आपन्नेन चामुनानुसृत्य रुदत्यै रागमञ्जरीपरिचारिकायै पूर्वप्रणयानुवर्तिना तद्भाण्डनिधानोद्देशः कथितः । ममापि चर्मरत्नमुपायोपक्रान्तो यदि प्रयच्छेदिह देवपादैः प्रसादः कार्यः ' इति । तथा निवेदितश्च नरपतिरसुभिर्मामवियोज्योपच्छन्दनैरेव स्वं ते दापयितुं प्रयतिष्यते । तन्नः पथ्यम् ' इति । श्रुत्वैव च त्वदनुभावप्रत्ययादनतित्रस्नुना तेन तत्तथैव संपादितम् । अथाहं त्वदभिज्ञानप्रत्यायिताया रागमञ्जर्याः सकाशाद्यथेप्सितानि वस्तूनि लभमाना राजदुहितुरम्बालिकाया धात्रीं माङ्गलिकां त्वदादिष्टेन मार्गेणान्वरञ्जयम् । तामेव च संक्रमीकृत्य रागमञ्जर्याश्चाम्बालिकायाः सख्यं परमत्रीवृधम् । अहरहश्च नवनवानि प्राभृतान्युपह-

---

तेन तन्नार्यां रागमञ्जरीमन्ववर्तेऽतोषयम् । तस्या रागमञ्जर्या आभरणानां भूषणानां समुद्गकः संपुटकः । स्तेयाय स्तेयं विधातुमिति यावत् । तुमर्थाच्चेति चतुर्थी । अथवा मुक्तये हरिं भजतीति वत्तादर्थ्ये चतुर्थी । नागरिकपुरुषैर्नगररक्षकैः । पूर्वप्रणयं पूर्वकालीनं प्रेमानुवर्ततेऽनुसरति तेन तस्या रागमञ्जर्या भाण्डं भूषणं तस्य निधानस्य स्थापनस्योद्देशः स्थलं कथितो निवेदितः । 'भाण्डं भूषणमात्रेऽपि' इति विश्वः । उपायैः साधनैरुपक्रान्तो वशीकृतः । 'उपक्रमो वशीकारे' इति वैजयन्ती । देवपादैः स्वामिचरणैः प्रसादोऽनुग्रहः कार्यो विधेयः । स न हन्तव्यो येन प्रतिदिनं तत्र गत्वा लभेय चर्मरत्नं तत्प्रार्थनादिभिरित्याशयः । असुभिः प्राणैरवियोज्य वियोगमकृत्वा । उपच्छन्दनैः सान्त्वनैः स्वं धनभूतं चर्मरत्नं ते त्वदीयम् । नोऽस्माकं पथ्यं हितम् । तवापहारवर्मणोऽनुभावप्रत्ययः सामर्थ्यविश्वासस्तस्मात् । अनतित्रस्नुनाऽतित्रासवर्जितेन 'त्रसिगृधि' इति क्नुः । तेन धनमित्रेण तत्त्वदुक्तं तथैव त्वदाज्ञानुगुणं संपादितं साधितम् । तवाभिज्ञानेन चिन्हेन प्रत्यायिताया विश्वासितायाः । यथेप्सितानि सुप्सुपेति समासः । यथार्थ्याव्ययीभावेऽव्ययत्वेन बहुत्वश्रवणानुपपत्तेः । वस्तूनि पदार्थान् । लभमाना प्राप्नुवती । वसूनीति पाठे धनानीत्यर्थः । बहुत्वेन च राजकन्यादासीमनुकूलयितुं प्रभूतं वित्तं व्ययीकृतमिति ज्ञायते । धात्रीमुपमातरं त्वयादिष्टेन कथितेन मार्गेण पथान्वरञ्जयमतोषयम् । तामेव माङ्गलिकामेव संक्रमीकृत्योपायीकृत्य द्वारीकृत्येत्यर्थः । परं सख्यं परमां मैत्रीं 'सख्युर्यः' इति भावे यः । अवीवृधं वृद्धिमनयम् । अहरहः प्रतिदिनं नवनवानि 'प्रकारे गुणवचनस्य' इति द्विरुक्तिः । प्राभृतान्युपायनान्युपहरन्त्यर्पयन्ती । चित्रा भिन्नाः चित्त-

---

१ 'निकृष्टाशयतया' ब. २ 'वसूनि' न.

रन्ती कथाश्चित्राश्चित्तहारिणीः कथयन्ती तस्याः परं प्रसादपात्रमासम्। एकदा च हर्म्यगतायास्तस्याः स्थानस्थितमपि कर्णकुवलयं स्रस्तमिति समादधती प्रमत्तेव प्रच्याव्य पुनरुत्क्षिप्य भूमेस्तेनोपकन्यापुरं कारणेन केनापि भवनाङ्गणं प्रविष्टस्य कान्तकस्योपरि प्रवृत्तकुहरपारावतत्रासनापदेशात्प्रहसन्ती प्राहार्षम्। सोऽपि तेन धन्यंमन्यः किंचिदुन्मुखः स्मयमानो मत्कर्मप्रहासिताया राजदुहितुर्विलासप्रायमाकारमात्माभिलाषमूलमिव यथा संकल्पयेत्तथा मयापि संज्ञयैव किमपि चतुरमाचेष्टितम्। आकृष्टधन्वना च मनसिजेन विद्धः सन्दिग्धफलेन पत्रिणातिमुग्धः कथंकथमप्यपासरत्। सायं च राजकन्याङ्गुलीयकमुद्रितां वासताम्बूलपट्टांशुकयुगल-

---

हारिणीर्मनोहारिणीः कथा वार्ताः कथयन्ती निवेदयन्ती। परं श्रेष्ठं प्रसादपात्रं कृपास्थानम्। हर्म्यगताया गृहस्थितायाः स्थानस्थितमपि स्थानादचलितमपि कर्णकुवलयं श्रवणारूढं कमलं स्रस्तमिति स्वस्थानाद्भ्रष्टमिति समादधती सज्जयन्ती प्रमत्तेवानवधानेव प्रच्याव्य पातयित्वा। उत्क्षिप्योद्धृत्योपकन्यापुरं कन्यान्तःपुरसमीपे भवनाङ्गणं गृहाङ्गणं प्रविष्टस्य समागतस्य कान्तकस्य कारागृहाधिपस्य। प्रवृत्तं प्रारब्धं कुहरं सुरतं येन तस्य पारावतस्य कपोतस्य त्रासनं पीडनं तस्यापदेशान्मिषात् प्राहार्षं प्राक्षिपम्। सोऽपि कान्तकोऽपि तेन मत्कृतेन ताडनेन धन्यंमन्यः स्वं धन्यं मन्यमानः किंचित्स्वल्पमुन्मुख ऊर्ध्ववदनः स्मयमानः किंचिद्धसन्। मम कर्मणा कुवलयप्रक्षेपणेन प्रहसिताया हास्यं कुर्वन्त्याः विलासप्रायं विलासबहुलमाकारमात्मनोऽभिलाष इच्छा मूलं हेतुर्यस्य तम्। 'कामी स्वतां पश्यति' इति न्यायेन मुग्धावस्थासुलभतया कृताश्चेष्टा मदर्थमेवेति स तर्कयेदिति भावः। संकल्पयेच्चिन्तयेत्। संज्ञया हस्तनेत्रादिभिः। चतुरं मनोहरमाचेष्टितमाचरितम्। आकृष्टं सज्जीकृतं धनुश्चापो येन तेन। 'धनुषश्च' इत्यनङ्। मनसिजेन मदनेन सम्यग् दिग्धं विषमिश्रितं फलं यस्य तेन पत्रिणा बाणेन विद्धस्ताडितः। 'दिग्धलिप्तौ विषाक्ते च' इति वैजयन्ती। अतिमुग्धोऽत्यन्तं मूढः। राजदुहितुस्तथाविधा चेष्टा नाभिलाषमूलिकेत्यजानतस्तस्य मूढत्वं व्यक्तमेव। कथं कथमपि महता कष्टेनापासरन्निरगात्। राजकन्याया अङ्गुलीयं मुद्रा तया मुद्रितां चिन्हितां वासताम्बूलं सहकारकर्पूरादिभिः सुगन्धीकृतं ताम्बूलं पट्टांशुक-

---

१ 'हर्म्याङ्गणगताया' ब. २. कुहरप्रसक्तपारावत' ब. ३ 'तेन' इत्येतन्नास्ति ब-ब-पुस्तकयोः ४ 'प्रहसितायाः' ब

भूषणावयवगर्भां च वञ्जेरिकां कयाचिद्बालिकया ग्राहयित्वा रागमञ्जर्या इति नीत्वा कान्तकस्यागारमगाम्। अगाधे च रागसागरे मग्नो नावमिव मामुपलभ्य परमहृष्यत्। अवस्थान्तराणि च राजदुहितुः सुदारुणानि व्यावर्णयन्त्या मया स दुर्मतिः सुदूरमुदमाद्यत। तत्प्रार्थिता चाहं त्वत्प्रियाप्रहितमिति ममैव मुखताम्बूलोच्छिष्टानुलेपनं निर्माल्यं मलिनांशुकं चान्येद्युरुपाहरम्। तदीयानि च राजकन्यार्थमित्युपादाय च्छन्नमेव प्रांक्षिपम्।

20 इत्थं च संधुक्षितमन्मथाग्निः स एवैकान्ते मयोपमन्त्रितोऽभूत्—'आर्य, लक्षणान्येव तवाविसंवादीनि। तथा हि मत्प्रातिवेश्यः कश्चित्कार्तान्तिकः 'कान्तकस्य हस्ते राज्यमिदं पतिष्यति, तादृशानि तस्य लक्षणानि' इत्यादिक्षत्। तदनुरूपमेव च त्वामियं राजकन्यका कामयते। तदेकापत्यश्च राजा तया त्वां समागत-

---

युगलं पट्टवस्त्रद्वयं भूषणावयवाः स्वल्पानि भूषणानि च गर्भे मध्ये यस्यास्ताम्। 'घनसारादिभिर्यत्तु वासितं वासमुच्यते' इति वैजयन्ती। वञ्जेरिकां वेत्रपुटिकां 'वञ्जेरी वेत्रपुटिका' इति वैजयन्ती। बालिकया ग्राहयित्वा बालिकाहस्तेन नीत्वेत्यर्थः। रागमञ्जर्या इतीति तु वस्तूनां बहिर्नयने रोधो मा भूदित्येतदर्थं प्रख्यापनम्। अगारं गृहम्। अगाधेऽतलस्पर्शे रागसागरे प्रेमोदधौ मग्नोऽन्तः प्रविष्टो नावमिव नौकामिव। उपलभ्य प्राप्याहृष्यदतुष्यत्। अवस्थान्तराणि भिन्ना भिन्ना अवस्थाः सुदारुणान्यसह्यानि व्यावर्णयन्त्या विवृण्वत्या दुर्मतिर्मूढः स कान्तकः सुदूरमत्यन्तमुदमाद्यतोन्मत्तः कृतः। तेन प्रार्थिता याचिता तव प्रियया राजदुहित्रा प्रहितं प्रेषितमिति निवेद्येति शेषः। मुखताम्बूलं चर्विततांबूलमुच्छिष्टानुलेपनमुपभुक्ताङ्गरागावशिष्टं निर्माल्यमुपभुक्तपुष्पं मलिनांशुकं मलिनं वस्त्रमुपाहरमुपायन्यकरवम्। तदीयानि तत्संबन्धीनि राजकन्यार्थं राजकन्याया इत्युपादाय गृहीत्वा छन्नमेव गुप्ततया। अपोढानीति पाठो न ग्रंथकृत्सरणिमनुसरति। स तु सर्वत्र तिङन्तमेव प्रयुङ्क्ते न क्तान्तम्।

इत्थमिति। इत्थमनया रीत्या संधुक्षितो वर्द्धितो मन्मथाग्निर्मदनवह्निर्यस्य सः। स एव कान्तक एव। एकान्ते रहस्युपमन्त्रित उपदिष्टः। लक्षणान्येव चिन्हान्येवाविसंवादीनि सुसंबद्धानि। तदेव प्रतिपादयति। तथाहीति। मम प्रातिवेश्यो मद्गृहसमीपवासी कार्तान्तिको लक्षणज्ञः। तादृशानि नृपार्हाणि तस्य कान्तकस्य लक्षणानि चिन्हानि। आदिक्षदकथयत्। दिशतेर्लुङि क्सः। तदनुरूपं तस्य कथनानुगुणं राजकन्या नृपसुता कामयते प्रार्थयते। सा एवैकमपत्यं यस्य स तया स्वकन्यया समागतं संगतं त्वामुपलभ्य ज्ञात्वा

---

१ 'पेटिकाम्' व. २ 'अपोढानि' ब–न.

मुपलभ्य कुपितोऽपि दुहितुर्मरणभयान्नोच्छेत्स्यति। प्रत्युत प्रापयिष्यत्येव यौवराज्यम्। इत्थं चायमर्थोऽर्थानुबन्धी। किमिति तात, नाराध्यते। यदि कुमारीपुरप्रवेशाभ्युपायं नावबुध्यसे ननु बन्धनागारभित्तेर्व्यामत्रयमन्तरालमारामप्राकारस्य केनचित्तु हस्तवतैकागारिकेण तावतीं सुरङ्गां कारयित्वा प्रविष्टस्योपवनं तवोपरिष्टादस्मदायत्तैव रक्षा। रक्ततरो हि तस्याः परिजनो न रहस्यं भेत्स्यति' इति। सोऽब्रवीत्—'साधु भद्रे, दर्शितम्। अस्ति कश्चित्तस्करः खननकर्मणि सगरसुतानामिवान्यतमः। स चेल्लब्धः क्षणेनैतत्कर्म साधयिष्यति' इति। 'कतमोऽसौ, किमिति न लभ्यते' इति मयोक्ते येन तद्धनमित्रस्य चर्मरत्नं मुषितमिति त्वामेव निरदिक्षत्। 'यद्येवमेहि, त्वयास्मिन्कर्मणि साधिते चित्रैरुपायैस्त्वामहं मोचयिष्यामि' इति शपथपूर्वं तेनाभिसंधाय सिद्धेऽर्थे भूयोऽपि निगडयित्वा 'योऽसौ चोरः

कुपितोऽपि क्रुद्धोऽपि दुहितुः स्वकन्याया मरणस्य भयाद्भीतेः नोच्छेत्स्यति नोन्मूलयिष्यति प्रत्युत किंतु यौवराज्यं युवराजपदवीं प्रापयिष्यति नेष्यति। युवराजपदे त्वामभिषेक्ष्यतीत्यर्थः। इत्थमेवमयमर्थो राज्यप्राप्तिरूपोऽर्थानन्याननुबध्नाति तथाभूतः। किमिति कस्माद्धेतोः तातेति कोमलार्थकमामन्त्रणं तेन च कान्तके प्रेमाप्याविष्कृतं भवति। कुमारीपुरे कन्यान्तःपुरे प्रवेशस्याभ्युपायं साधनं नावबुध्यसे न जानासि। बन्धनागारं कारागृहं तस्य भित्तेः व्यामत्रयं परिमाणविशेषत्रयं 'वांव' इति महाराष्ट्रभाषायाम्। 'प्रमाणे द्वयसज्०' त्यनेन मात्रच् तस्य च 'प्रमाणे ल' इत्यनेन लुक्। तेन तादृशपरिमाणविशिष्टमित्यर्थः। अन्तरालमभ्यन्तरालम्। आरामप्राकारस्योपवनवरणस्य। हस्तवता कुशलेनैकागारिकेण स्तेनेन। 'ऐकागारिकट् चोरे' इत्यनेन साधुः। तावतीं व्यामत्रयपरिमाणां 'यत्तदेतेभ्यः परिमाणे वतुप्' इत्यनेन वत्। सुरङ्गां भूविवरमार्गविशेषं कारयित्वा निष्पाद्य। उपरिष्टादुपरि। रक्षा रक्षणम्। 'गुरोश्च हल' इत्यनेनाकारः। अस्मदायत्ताऽस्माकमधीना। रक्ततरोऽत्यनुरक्तः परिजनः सेवकः रहस्यं गोपनीयं त्वदागमनं न भेत्स्यति न प्रकटीकरिष्यति। साधु दर्शितं सम्यगुपदिष्टम्। खननकर्मणि विवरनिर्माणे सगरसुतानां सगर इति प्रसिद्धः सूर्यवंशोद्भवो नृपस्तस्य पुत्राणां षष्टिसहस्राणामन्यतम एकः। पुराऽश्वमेधशतेन यजमानस्य सगरस्याश्वः इन्द्रेणापहृतः। तत्प्रत्यानयनाय तत्पुत्रैरुत्खातः सागर इति पौराणिकी कथा। स चेल्लब्धः प्राप्तः क्षणेन स्वल्पेन कालेनैतत्कर्म सुरङ्गानिर्माणं साधयिष्यति सिद्धं विधास्यति। किमिति न लभ्यते कुतः न प्राप्यते। चित्रैरुपायैश्चमत्कृतिजनकैरनेकैः साधनैः। अभिसंधाय प्रतिज्ञाय। सिद्धेऽर्थे कार्ये जाते भूयोऽपि पुनरपि निगडयित्वा बद्ध्वा। सर्वथा सर्वप्रकारेणोपक्रान्त-

स सर्वथोपक्रान्तः न तु धाष्टर्यभूमिः प्रकृष्टवैरस्तदजिनरत्नं दर्शयिष्यति ' इति राज्ञे विज्ञाप्य चित्रमेनं हनिष्यसि। तथा च सत्यर्थः सिध्यति, रहस्यं च न स्रवति ' इति मयोक्ते सोऽतिहृष्टः प्रतिपद्य मामेव त्वदुपप्रलोभने नियुज्य बहिरवस्थितः। प्राप्तमितः परं चिन्त्यताम् ' इति।

21 प्रीतेन च मयोक्तम्—' मदुक्तमल्पम्, त्वन्नय एवात्र भूयान्। आनयैनम्' इति। अथानीतेनामुना मन्मोचनाय शपथः कृतः, मया च रहस्यानिर्भेदाय। विनिगडीकृतश्च स्नानभोजनविलेपनान्यनुभूय नित्यान्धकारात्काराभित्तिकोणादारभ्योरगास्येन सुरङ्गामकरवम्। अचिन्तयं चैवम्—' हन्तुमनसैवामुना मन्मोचनाय शपथः कृतः। तदेनं हत्वापि नासत्यवाददोषेण स्पृश्ये ' इति। निष्पततश्च मे निगडनाय प्रसार्यमाणपाणेस्तस्य पादेनोरसि निहत्य पतितस्य तस्यैवासिधेन्वा शिरो न्यकृन्तम्। अकथयं च शृगालिकाम्—' भण भद्रे, कथंभूतः कन्यापुरसंनिवेशो महानयं प्रयासो मा वृथैव भूत्। अमुत्र किंचिच्चोरयित्वा निवर्तिष्ये ' इति।

श्चिकित्सितः धाष्टर्यभूमिः धृष्टतायाः स्थलमत्यन्तं धृष्ट इति यावत्। प्रकृष्टमतिभूमिं गतं वैरं यस्य सः। इत्येवं विज्ञाप्य निवेद्य। चित्रं विचित्रया रीत्या। एनं सुरङ्गाकारिणं तस्करम्। तथा च सति तस्मिन्हते सति। अर्थो नृपकन्याप्राप्तिरूपः। रहस्यं सुरङ्गानिर्माणरूपं न स्रवति लोके प्रसिद्धिं न गच्छति। प्रतिपद्याङ्गीकृत्य तवोपप्रलोभने वशीकरणे नियुज्य। प्राप्तं कर्तव्यं चिन्त्यतां विचार्यताम्।

प्रीतेनेति। मदुक्तं मयोपदिष्टमल्पं स्वल्पं तव नयो नीतिरेवात्र कार्यसाधने भूयान् बहुतरः। एनं कान्तकम्। मम मोचनाय कारागृहतो मुक्तये शपथः प्रतिज्ञा कृतः विहितः। रहस्यं सुरङ्गाखननरूपं तस्यानिर्भेदायाप्रकटीकरणाय। विनिगडीकृतः मुक्तशृङ्खलः नित्यं सर्वदा अंधकारः प्रकाशाभावो यत्र तस्मात् काराभित्तेः कोणात् बन्धनागारभित्ते कोणादारभ्य। उरगास्येनः फणिमुखाकारखननसाधनेन। सुरङ्गां भूविवरम्। हन्तुमनसैव मद्घातेच्छुनैव। असत्यवाददोषोऽसत्यभाषणापराधस्तेन। मे निगडनाय बन्धनाय निष्पततः प्राप्तवतः प्रसार्यमाणः पुरः कृतः पाणिर्हस्तो येन तस्योरसि वक्षसि पादेन चरणेन निहत्य ताडयित्वा। पतितस्य भूमौ समागतस्य तस्यैव कान्तकस्यैवासिधेन्वा छुरिकया शिरो मूर्धानं न्यकृन्तमच्छिनदम्। भण कथय कथंभूतः कीदृक् कन्यापुरस्य संनिवेशो रचना स्वरूपमिति यावत्। महानयं सुरङ्गानिष्पादनप्रयासो वृथैव

---

१ ' घातयिष्यसि ' ब. २ ' प्राप्तरूपम् ' ब.

तदुपदर्शितविभागं चावगाह्य कन्यान्तःपुरं प्रज्वलत्सु मणिप्रदीपेषु नैकक्रीडाखेदसुप्तस्य परिजनस्य मध्ये महितमहार्घरत्नप्रत्युप्तसिंहाकारदन्तपादे हंसतूलगर्भशय्योपधानशालिनि कुसुमलवच्छुरितपर्यन्ते पर्यङ्कतले दक्षिणपार्ष्ण्यधोभागानुवलितेतरचरणाग्रपृष्ठम्, ईषद्विवृत्तमधुरगुल्फसंधि, परस्पराश्लिष्टजङ्घाकाण्डम्, आकुञ्चितकोमलोभयजानु, किंचिद्वेल्लितोरुदण्डयुगलम्, अधिनितम्बस्रस्तमुक्तैकभुजल-

व्यर्थो मा भूदित्यत्राटोऽभावः 'न माङ्योगे' इत्यनेन । अमुत्र कन्यान्तःपुरे । तया शृगालिकयोपदर्शितो निर्दिष्टो विभागः प्रदेशो यस्य तद् विलोक्य गत्वेति यावत् । मणिप्रदीपेषु रत्नमयदीपेषु प्रज्वलत्सु प्रकाशमानेषु नैका क्रीडा बहवः क्रीडास्तासां खेदेन तज्जन्यश्रमेण सुप्तस्य निद्रितस्य परिजनस्य सेवकसमूहस्य समूह एकवचनम् । महितान्युत्कृष्टानि महार्हाणि बहुमूल्यानि रत्नानि हीरकादिमणयस्तैः प्रत्युप्ताः खचिताः सिंहाकारा सिंहस्येवाकाराः येषां तथाभूता दन्तपादा हस्तिदन्तनिर्मिताः पादा यस्य तस्मिन् । हंसतूलाः हंसस्य पक्षा गर्भे मध्ये ययोस्ताभ्यां शय्ययोपधानेन 'उशी' इति भाषायां प्रसिद्धेन च शालते शोभते तस्मिन् । कुसुमलवैः पुष्पपरागैश्छुरितो व्याप्तः पर्यन्तः प्रान्तभागो यस्य तत्र पर्यङ्कस्य तले पृष्ठे । दक्षिणपादस्यापसव्यचरणस्य पार्ष्णिः पादाधोभागः 'टांच' इति महाराष्ट्रभाषायां प्रसिद्धस्तस्याधोभागेऽनुवलितं संवलितं वेष्टितमिति यावदितरचरणस्य सव्यपादस्याग्रपृष्ठं यस्मिन्यथा स्यात्तथा । इदमग्रिमाणि च 'आननेन्दुसंमुखागतालकलतम्' इत्यन्तानि सर्वाणि क्रियाविशेषणानि नाव्ययीभावास्तेषां च विस्रब्धप्रसुप्तामित्यत्रसुप्तक्रियायां संबन्धः । एतेषामव्ययीभावत्वकथका एव तत्र प्रमाणं नान्यत् । बहुव्रीहेः क्रियाविशेषणत्वेऽव्ययीभाववचनं त्वप्रामाणिकं तथाभूतस्याव्ययीभावेष्वनन्तर्भावात् । प्रत्युत 'अनेकमन्यपदार्थे' इत्येनेनान्यपदेन तिङन्तग्रहणे न क्षतिं पश्यामः । पार्ष्णिः स्त्रीपुंसयोः पादमूले स्यात्' इति रन्तिदेवः । ईषद्विवृत्तः किंचिद्वलितो मधूरो मनोहरो गुल्फसंधिर्घुटिकासंयोगो यस्मिन्यथा तथा । 'तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः । परस्परमन्योन्यमाश्लिष्टौ संयुक्तौ जङ्घाकाण्डौ प्रसृतास्तम्भौ पोटरी' इति महाराष्ट्रभाषायां यस्मिन्यत्र तथा । आकुञ्चितौ संकुचितौ कोमलौ मृदू उभौ जानू ऊरुपर्वणी यत्र यथा तथा । किंचिद्वेल्लितं स्वल्पं वक्रितमूरुदण्डयुगलं सक्थिद्वयं यत्र यथा तथा । नितम्बे कटिपश्चाद्भाग इत्यधिनितम्बं विभक्त्यर्थेऽव्ययीभावः । तत्र स्रस्तं गलितं यथा तथा मुक्तस्त्यक्त एकभुजलताया एकहस्तस्याग्रोऽग्रभागस्तेन पेशलं मनोहरम् । स्रस्तीमति मोचनक्रियाया विशेषणम् । अपाश्रयान्ते शिरोभागान्ते निमितं

१ 'विभागः' व; 'विभागे' न. २ 'प्रसुप्त' न. ३ 'गर्भकोमल' ब–ब. ४ 'अनुवेल्लित' व. ५ 'निवृत' व.

ताम्रपेशलम्, अपाश्रयान्तर्निमिताकुञ्चितेतरभुजलतोत्तानतलकरकिसलयम्, आभुग्न-श्रोणिमण्डलम्, अतिश्लिष्टचीनांशुकान्तरीयम्, अनतिवलिततनुतरोदरम्, अत-नुतरनिःश्वासारम्भकम्पमानकठोरकुचकुड्मलम्, आतिरश्चीनबन्धुरशिरोधरोद्देशदृ-श्यमाननिष्टप्ततपनीयसूत्रपर्यस्तपद्मरागरुचकम्, अर्धलक्ष्याधरकर्णपाशनिभृतकुण्ड-लम्, उपरिपरावृत्तश्रवणपाशरत्नकर्णिकाकिरणमञ्जरीपिञ्जरितविषमव्याविद्धशिथि-लशिखण्डबन्धम्, आत्मप्रभापटलदुर्लक्ष्यपाटलोत्तराधरविवरम्, गण्डस्थलीसंक्रा-

---

स्थापितमाकुञ्चितं संकुचितमितरभुजलताया बाहुवल्ल्या उत्तानतलमूर्ध्वमुखं करकिसलयं पर्णमिव कोमलः करो यस्मिन्यथा तथा। आभुग्नमिषत्कुटिलं श्रोणिमण्डलं कटिवलयं यत्र यथा तथा। मण्डलशब्देन कटेर्वृत्तत्वं ज्ञायते। अतिश्लिष्टमत्यन्तं संलग्नं चीनांशुकस्य चीनदेशोद्भवस्य वस्त्रस्यान्तरीयमधोवासो यत्र यथा तथा। 'अन्तरीयोपसंव्यानपरिधा-नान्यधोंशुक' इत्यमरः। अनतिवलितं स्वल्पं वक्रीकृतं तनुतरं कृशतरमुदरं यस्मिन् यथा तथा। अतनुतरा महान्तो निश्वासा नासामारुतास्तेषामारम्भैः कम्पमाने चलिते कठोरे कुचकुड्मले स्तनकलिके यत्र यथा तथा। निद्रायां निश्वासानां दैर्घ्येण स्तनकम्प-कत्वम्। दीर्घश्वासयुता निद्रा च सुखनिद्रा। आतिरश्चीनो निद्रास्थितिवशादीषद्वक्रो बन्धुरो हृद्यः शिरोधराया ग्रीवाया उद्देशः प्रदेशस्तत्र दृश्यमानं लक्ष्यमाणं निष्टप्तं वह्नौ शोधितं यत्तपनीयं सुवर्णं तस्य सूत्रे तन्तौ पर्यस्तं खचितं यत्पद्मरागरुचकं पद्मरागमयं ग्रीवाभरणं 'कंठी' इति भाषायां प्रसिद्धं यत्र यथा तथा। 'सौवर्चलं मातुलुङ्गं शिला-चन्दनपेषणी। ग्रीवाभरणकं चैव चतुर्षु रुचकं स्मृतम्' इत्यनेकार्थे। अर्धं लक्ष्यं न पूर्ण-तया दृश्यमधरकर्णपाशे श्रवणस्याधोभागे निभृतं निश्चलं कुण्डलं कर्णभूषणं यत्र अथवार्ध-लक्ष्येति कर्णपाशविशेषणं तथाभूते कर्णपाशे निश्चलं कर्णभूषणं यत्र। शयने शिरसा रुद्धः कर्णः कुण्डलं वा सकलं न दृश्यमासीदिति तात्पर्यार्थः। 'अधस्तादपि चाधरः' इत्य-मरः। उपरि परावृत्तः समुत्तानः श्रवणपाशः पाशसदृशः कर्णस्तस्य कर्णिका कर्णभूषणं तस्य किरणमञ्जरीभिः रश्मिभिः पिञ्जरितः पिशङ्गीकृतो विषममयाथातथ्येन व्याविद्धो बद्धोऽत एव शिथिलः स्रस्तः शिखण्डबन्धः केशबन्धो यत्र यथा तथा 'कर्णललाटात्कन-लंकारे' इत्यनेन कन्। आत्मप्रभापटलं स्वकान्तिसमूहस्तेन दुर्लक्ष्यं दुर्निरूप्यं पाटलयो रक्तयोरुत्तराधरयोरुत्तरोष्ठाधरोष्ठयोर्विवरं बिलं यत्र यथा तथा। एतेन सा मुखं व्यादा-यास्वपीत्परं मुखविवरं प्रभाव्याप्तत्वान्न दृश्यमासीदिति ज्ञायते। गण्डस्थल्यां गल्लप्रान्ते संक्रान्तो गतो हस्तपल्लवो हस्त एव पल्लवस्तेन दर्शितं संपादितं कर्णावतंसस्य कर्णभूषण-

---

१ 'निहित' ब. २ 'अणुतर' व.-ब. ३ 'शिरोदेश' ब. ४ 'किरणम्' ब. ५ 'व्याविद्धशिथिल' न.

न्तहस्तपल्लवदर्शितकर्णावतंसकृत्यम्, उपरिकपोलादर्शतलनिषिक्तचित्रवितानपत्रजातिजनितविशेषकक्रियम्, आमीलितलोचनेन्दीवरम्, अविभ्रान्तभ्रूपताकम्, उद्भिद्यमानश्रमजलपुलकभिन्नशिथिलचन्दनतिलकम्, आननेन्दुसंमुखालकलतं च विश्रब्धप्रसुप्तामतिधवलोत्तरच्छदनिमग्नप्रायैकपार्श्वतया चिरविलसनखेदनिश्चलां शरदम्भोधरोत्सङ्गशायिनीमिव सौदामिनीं राजकन्यामपश्यम्। दृष्ट्वैव स्फुरदनङ्गरागश्चकितश्चोरयितव्यनिस्पृहस्तयैव तावच्चोर्यमाणहृदयः किंकर्तव्यतामूढः क्षणमतिष्ठम्। अतर्कयं च—'न चेदिमां वामलोचनामाप्नुयां न मृष्यति मां जीवितुं वसन्तबन्धुः। असंकेतितपरामृष्टा चेयमतिबाला व्यक्तमार्तस्वरेण निहन्यान्मे मनोर-

स्य कृत्यं कार्यं यस्मिन् यथा तथा। अत्र हस्त एव पल्लव इति मयूरव्यंसकादित्वात् समासो रूपकानुगुणोऽङ्गीकरणीयः। कपोल एवादर्शः स्वच्छत्वात्प्रतिबिम्बग्राहकत्वाच्च दर्पणस्तस्य तलस्योपरि निषिक्ता प्रतिबिम्बिता चित्रवितानस्य नानावर्णयुतोल्लोचस्य पत्रजातिः पल्लवविशेषस्तया जनिता कृता विशेषकस्य तिलकस्य क्रिया यत्र यथा तथा 'अस्त्री वितानमुल्लो च' इत्यमरः। 'विशेषकोऽस्त्री तिलक' इति मेदिनी। आमीलिते सम्यक् संकुचिते लोचने नयने इन्दीवरे इव यत्र यथा तथा। नेत्रयोरिन्दीवरसाम्यं रात्रौ संकोचत्वात्तत्तुल्यकान्तिमत्वाच्च। अविभ्रान्ता स्थिरा भ्रूपताका पताका सदृशी भ्रुकुटिर्यत्र यथा तथा। उद्भिद्यमाना उत्पद्यमानाः श्रमजलस्य घर्मस्य बिन्दवस्तैः भिन्नो द्विधा कृतोऽत एव शिथिलस्तिलको यत्र यथा तथा। निद्रायां प्रायो ललाटे घर्माधिक्यम्। आननेन्दोर्वदनचन्द्रस्य संमुखागताऽलकलता केशवल्लिर्यत्र यथा तथा। विस्रब्धं सविश्वासं प्रसुप्तां निद्रिताम्। अतिधवलोऽत्यन्तं स्वच्छ उत्तरच्छद उपर्यास्तरणवस्त्रं तस्मिन् निमग्नः संसक्त एकपार्श्वो यस्यास्तस्या भावस्तया। चिरं विलसनं प्रकाशनं तस्य खेदेन श्रमजत्रासेन निश्चलां कम्परहितां शरदोऽम्भोधरः शारदो मेघस्तस्योत्सङ्गे मध्ये शेते तथाभूतां सौदामिनीमिव विद्युतमिव। 'मध्योन्नतौ समुत्सङ्गौ' इति वैजयन्ती। राजकन्यां नृपदुहितरम्। दृष्ट्वैवेति। एवकारेण भाषणादीनां व्यावृत्तिः। स्फुरदनङ्गरागो समुत्पन्नमदनावेशः चकितः संभ्रान्तः चकितत्वं 'कुतोऽपि दयितस्याग्रे चकितं भयसंभ्रम' इति साहित्यदर्पणस्थलक्षणानुसारतो नायिकागुणो नायकेऽपि संभ्रमत्वरूपेणोन्नेयः। चोरयितव्ये हार्ये वस्तुनि निस्पृहो निरिच्छः तयैव राजकन्ययैव चोर्यमाणं ह्रियमाणं हृदयं मानसं यस्य सः। किंकर्तव्यतायां मूढः किं प्राप्तकालमिति ज्ञातुमसमर्थः इमां पुरतः सुप्तां वामलोचनां शोभननयनाम्। वसन्तबन्धुर्मदनो न

१ 'कपोलदेशतलनिषक्त' ब. २ 'निमग्नाम्' ब.

थम् । ततोऽहमेवाघ्नीय । तदियमत्र प्रतिपत्तिः' इति नागदन्तलग्नंनिर्यासकल्कवर्णितं फलकमादाय मणिसमुद्गकाद्वर्णवर्तिकामुद्धृत्य तां तथाशयानां तस्याश्च मामाबद्धाञ्जलिं चरणलग्नमालिखमार्यां चैताम्—

'त्वामयमाबद्धाञ्जलि दासजनस्तमिममर्थमर्थयते ।
स्वपिहि मया सह सुरतव्यतिकरखिन्नैव मा मैवम्' ॥

22 हेमकरण्डकाच्च वासताम्बूलवीटिकां कर्पूरस्फुटिकां पारिजातकं चोपयुज्यालक्तकपाटलेन तद्रसेन सुधाभित्तौ चक्रवाकमिथुनं निरष्ठीवम् । अङ्गुलीयकविनिमयं

मृष्यति न सहते । असंकेतिता पूर्वमनवबोधिता चासौ परामृष्टा स्पृष्टा अतिबालाऽनाधिगतमदनवृत्तान्ताऽतएवाभिलाषजस्पर्शज्ञानाभाववतीत्यर्थः । आर्तस्वरेण चोरादिभयजस्वरेण मनोरथं मनीषितं निहन्यान्नाशयेत् । आघ्नीयेति । आङ्पूर्वस्य हन्तेः 'आङो यम हन' इत्यनेन तङि विधिलिङि उत्तमैकवचनम् । तस्य च सौकर्येण हतो भवेयमित्यर्थः । तथार्थश्च कर्मणः कर्तृत्वविवक्षया कर्मणि च क्रियाकृतविशेषाभावमाश्रित्येति बोध्यम् । तेन कर्मकर्तरि न यगित्यलम् । नागदन्ते भित्तेर्निर्गते 'खुंटी' इति प्रसिद्धे काष्ठे लग्नं संस्थितं निर्यासस्य चिक्कणद्रव्यस्य कल्केन क्वाथेन वर्णितं वर्णो रङ्गो लोहितादिः संजातो यत्र तथाभूतं फलकं काष्ठपट्टिकामादाय गृहीत्वा । 'नागदन्तो द्विपरदे गृहान्निर्गतदारुणि' इति विश्वः । मणिसमुद्गकाद्रत्नकरण्डकात् वर्णवर्तिकां तूलिकामुद्धृत्य गृहीत्वा । तथाशयनां तथासुप्तां चरणलग्नं पादपतितमाबद्धाञ्जलिं कृतकरसंपुटं मामार्यां च तत्संज्ञकछन्दोबद्धां कविताम् । 'यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि । अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या' इति श्रुतबोधे । त्वामिति । अयं ते पादपतितो दासजनः सेवकजन आबद्धाञ्जलि कृतनमस्कारं यथा तथा प्रणामपूर्वकमिति यावत् । त्वामिममर्थमभिममपेक्षितमर्थयते याचते । मया ते दासेन सह सुरतस्य क्रीडाया व्यतिकरः संबन्धस्तेन खिन्नैव श्रान्तैव सुरतश्रमजनितां ग्लानिमनुभूयैव स्वपिहि शेष्व । एवं सुरतखेदं विना मा मा नैव स्वपिहीत्यर्थः । 'अमानोनाः प्रतिषेधे' । नित्यवीप्सयोरित्यनेन द्वित्वम् ।

हेमेति । हेमकरण्डात्सुवर्णपेटकाद्वासताम्बूलवीटिकां सुगन्धि ताम्बूलं कर्पूरस्फुटिकां कर्पूरखण्डं पारिजातकं सुगन्धिद्रव्यविशेषं चोपयुज्य भुक्त्वा । 'नागवल्लीपलाशानां तैलाक्तानां रसालतः । वेष्टनं वीटिका प्रोक्ता चन्द्रमन्दारवर्णयुक्' इति वात्स्यायनः । अलक्तक इव यावक इव पाटलो रक्तस्तेन तद्रसेन ताम्बूलरसेन सुधाभित्तौ शुभ्रचूर्णेन धवलायां भित्तौ चक्रवाकमिथुनं चक्राह्वद्वन्द्वं निरष्ठीवं निष्ठीवनेनालिखमि-

१ 'आघ्नीये' ब-न. २ 'निर्यासवालुकाक्तकवर्णितफलकम्' ब. ३ 'मदन' ब. ४ 'खिन्नैव' ब.

च कृत्वा कथंकथमपि निरगाम् । सुरङ्गया च प्रत्येत्य बन्धनागारं तत्र बद्धस्य नागरिकवरस्य सिंहघोषनाम्नस्तेष्वेव दिनेषु मित्रत्वेनोपचरितस्य 'एवं मया हतस्तपस्वी कान्तकः, तत्त्वया प्रतिभिद्य रहस्यं लब्धव्यो मोक्षः' इत्युपदिश्य सह शृगालिकया निरक्रामिषम् । नृपतिपथे च समागत्य रक्षिकपुरुषैरगृह्ये । अचिन्तयं च—'अलमस्मि जवेनापसर्तुमनामृष्ट एवैभिः । एषा पुनर्वराकी गृह्येत । तदिदमत्र प्राप्तरूपम्' इति तानेव चपलमभिपत्य स्वपृष्ठसमर्पितकूर्परः पराङ्मुखः स्थित्वा 'यद्यहमस्मि तस्करः, भद्राः, बध्नीत माम् । युष्माकमयमधिकारः, न पुनरस्या वर्षीयस्याः' इत्यवादिषम् । सा तु तावतैवोन्नीतमदभिप्राया तान्सप्रणाममभ्येत्य 'भद्रमुखाः, ममैष पुत्रो वायुग्रस्तश्चिरं चिकित्सितः । पूर्वेद्युः प्रसन्नकल्पः प्रकृतिस्थ एव जातः । जातास्थया मया बन्धनान्निष्क्रमय्य स्नापितोऽनुलेपितश्च परिधाप्य निष्प्रवाणियुगलमभ्यवहार्य परमान्नमौशीरेऽद्य कामचारः कृतोऽभूत् । अथ

त्यर्थः । अङ्गुलीयविनिमयमङ्गुलिभूषणव्यत्यासं कृत्वा । मदङ्गुलिं तत्करे तस्याश्च मत्करे कृत्वेत्यर्थः । कथं कथमपि महता कष्टेन । सुरङ्गया विवरेण । नागरिकवरस्य पौरमुख्यस्य तपस्वी दीनः हतो नाशितः । रहस्यं गोप्यं प्रतिभिद्य कथयित्वा । मोक्षोऽतो मुक्तिर्लब्धव्यः प्राप्यः । निरक्रामिषं निरगमम् । नृपतिपथे राजमार्गे रक्षिकपुरुषैर्नगररक्षकैरगृह्ये रुद्धः । जवेन वेगेनापसर्तुं पलायितुमलं समर्थोऽस्मि । एभी रक्षापुरुषैरनामृष्ट एवास्पृष्टः एव । वराकी दीनैषा शृगालिका गृह्येत रुध्येत । तत्तस्मादिदं वक्ष्यमाणमत्रास्मिन्संकटे प्राप्तरूपं कर्तव्यम् । इतीत्यस्याग्रे विचार्येति शेषः । तानेव रक्षकानेव चपलं सत्वरमभिपत्य गत्वा । स्वस्य पृष्ठे पृष्ठभागे समर्पितौ स्थापितौ कूर्परौ येन सः । बन्धनं तु कूर्परौ पृष्ठे कृत्वैव भवत्यतो बन्धनार्थं सज्जोऽस्मीति प्रदर्शयितुमियं युक्तिः । पराङ्मुखो मुखं परावृत्त्येत्यर्थः । तस्करश्चोरः युष्माकं राजपुरुषाणामयमधिकारश्चोरबन्धनाधिकारः । वर्षीयस्या वृद्धायाः । तावतैव तथाभूतमद्वचसैवोन्नीतस्तर्कितो मदभिप्रायो ममाशयो यया सा । सप्रणामं सनमस्कारम् । अभ्येत्य समीपमागत्य । वायुग्रस्तो वातविकारेण पीडितः चिरं चिकित्सितो बहुकालं कृतोपचारः । पूर्वेद्युः पूर्वस्मिन्नहनि । सद्यः परुदित्यनेन साधुः । प्रसन्नकल्प ईषन्न्यूनः प्रसन्नः 'ईषदसमाप्तौ' इत्यनेन कल्पप् । प्रकृतिस्थः स्वभावस्थः । जातास्थयोत्पन्नविश्वासया । बन्धनान्मत्तागारान्निष्क्रमय्य निष्कास्य । 'ल्यपि लघु पूर्वात्' इत्यनेनायादेशः । स्थापितोऽभिषेचितोऽनुलेपितश्चर्चितः । निष्प्रवाणियुगलं नूतनवस्त्रद्वयं परिधाप्य प्राहयित्वा । 'निष्प्रवाणिश्च' इत्यनेन कबभावः । अभ्यवहार्य भोजयित्वा परमान्नं पायसम् । औशीरे शयनासनयोः ।

---

१ 'समापत्य' ब.

निशीथे भूय एव वायुनिघ्नः 'निहत्य कान्तकं नृपतिदुहित्रा रमेयम्' इति रंहसा परेण राजपथमभ्यपतत्। निरूप्य चाहं पुत्रमेवंगतमस्यां वेलायामनुधावामि। तत्प्रसीदत। बद्धं नं मह्यमर्पयत' इति यावदसौ क्रन्दति तावदहं 'स्थविरे, केन देवो मातरिश्वा बद्धपूर्वः। किमेते काकाः शौङ्गेयस्य मे निग्रहीतारः। शान्तं पापम्' इत्यभ्यधावम्। असावप्यमीभिः 'त्वमेवोन्मत्ता यानुन्मत्त इत्युन्मत्तं मुक्तवती। कस्तमिदानीं बध्नाति' इति कदर्थिता रुदत्येव मामन्वधावत्। गत्वा च राजमन्दिरगृहं चिरविरहखेदविह्वलामिमां बहुविधं समाश्वास्य तं निशाशेषमनयम्। प्रत्यूषे पुनरुदारकेण च समगच्छे।

23 अथ भगवन्तं मरीचिं वेशकृच्छ्रादुत्थाय पुनः प्रतितप्ततपःप्रभावप्रत्यापन्नदिव्यचक्षुषमुपसंगम्य तेनास्म्येवंभूतत्वद्दर्शनमवगमितः। सिंहघोषश्च कान्तकापचारं निर्भिद्य तत्पदे प्रसन्नेन राज्ञा प्रतिष्ठापितः। तेनैव चारकसुरङ्गापथेन कन्या-

'आशीः शयनासनम्' इति हलायुधः। कामचारः स्वेच्छाचारः। निशीथेऽर्धरात्रे। वायुनिघ्नो वाताधीनः। 'अधीनो निघ्न आयत्त' इत्यमरः। रमेयमित्यस्याग्रे इति जल्पन् इति शेषः। 'अनुदात्तेत्त्वलक्षणमात्मनेपदमानित्यमिति रमेयमिति साधुः। परेण रंहसा महता वेगेन। एवंगतमीदृशीमवस्थां प्राप्तम्। अस्यां वेलायामर्धरात्रे। बद्धा बन्धनं विधाय। असौ शृगालिका। स्थविरे वृद्धे मातरिश्वा वायुः। बद्धपूर्वः पूर्वं बद्धः सुप्सुपेति समासः। शौङ्गेयस्य 'ससाणा' इति प्रसिद्धस्य पक्षिणः। काकानां तद्ग्रहणेऽसामर्थ्यं तस्य वेगाधिक्यादिति भावः। अनुन्मत्तः प्रकृतिमापन्न इति। कदर्थिता निन्दिता। 'निन्दिता क्लेशने चैव वर्णने च कदर्थन' इति रुज्जनः। चिरविरहस्य बहुकालवियोगस्य खेदेन विह्वलां पीडिताम्। बहुविधमनेकप्रकारं समाश्वास्य सान्त्वयित्वा प्रत्यूषे प्रभाते उदारकेन मत्सुहृदा समगच्छे संगतवान्। 'समो गम्यृच्छिभ्याम्' इति शासनेन तङ्।

अथेति। वेशकृच्छ्राद्वेश्यासंकटादुत्थायात्मानं निर्मोच्य प्रतितप्तं पुनराचरितं यत्तपस्तस्य प्रभावेण सामर्थ्येन प्रत्यापन्नं समधिगतं दिव्यं चक्षुरलौकिकं ज्ञानं येन तमुपसंगम्य मिलित्वा। अत्र च पृष्टवानित्यर्थकं भिन्नक्रियावाचकमुपसंगमिनैककर्तृकं चाध्याहार्यम्। अन्यथा क्त्वोऽनुत्पत्तेः। अवगमित इत्यस्य कर्तृत्वं च मरीचिनिष्ठम्। एवंभूतमनया रीत्या जायमानं तव राजवाहनस्य दर्शनमवलोकनमवगमितो बोधितः। सिंहघोषः कारागृहतो मया मोचितो मे सुहृत्। निर्भिद्य प्रकटीकृत्य। अत्रापि ल्यपः प्राप्तिः समानकर्तृकोत्तरकालीनक्रियाभावान्न प्रामाणिकी। तदर्थं च स्थित इति क्रिम-

१ 'निन्दिता कदर्थिता' ब.न. २ 'प्रतिपन्न' ब

पुरप्रवेशं भूयोऽपि मे समपादयत्। समगंसि चाहं शृगालिकामुखविसृतवार्तानुर- क्तया राजदुहित्रा। तेष्वेव दिवसेषु चण्डवर्मा सिंहवर्मावधूतदुहितृप्रार्थनः कुपि- तोऽभियुज्य पुरमवारुणत्। अमर्षणश्चाङ्गराजो यावदरिः पारिग्रामिकं विधिमाचि- कीर्षति तावत्स्वयमेव प्राकारं निर्भिद्य प्रत्यासन्नानपि सहायानप्रतीक्षमाणो निर्ग- त्याभ्यधिकबलेन विद्विषा महति संपराये भिन्नवर्मा सिंहवर्मा बलादगृह्यत। अम्बा- लिका च बलवदभिगृह्य चण्डवर्मणा हठात्परिणेतुमात्मभवनमनीयत। कौतुकं च स किल क्षपावसाने विवाह इत्यबध्नात्। अहं च धनमित्रगृहे तद्विवाहायैव पिनद्धम- ङ्गलप्रतिसरस्तमेवमवोचम्—' सखे, समापतितमेवाङ्गराजाभिसरं राजमण्डलम्। सुगूढमेव संभूय पौरवृद्धैस्तदुपावर्तय। उपावृत्तश्च कृत्तशिरसमेव शत्रुं द्रक्ष्यसि '

प्यध्याहार्यम्। तत्पदे कान्तकस्थाने प्रसन्नेन तुष्टेन प्रतिष्ठापितो नियोजितः। तेनैव मत्कृतेन चारकसुरङ्गापथेन कारागृहस्थभूविवरमार्गेण 'ऋक्पूरब्धूःपथामानक्षे' इत्य- नेन समासान्तोऽकारः। समपादयदित्यस्य कर्तृत्वं सिंहघोषनिष्ठम्। शृगालिकाया मुखेन विसृताभिः प्रहिताभिर्वार्ताभिर्वृत्तान्तैरनुरक्ता समासक्ता तया। चण्डवर्मा राजवाहन- बन्धनकर्ता। सिंहवर्मणाऽधूता तिरस्कृता दुहितृप्रार्थना कन्याविषयिणी याञ्चा यस्य सः। अभियुज्याभिभूय पुरं नगरम्। अमर्षणः क्रोधनः क्रुधाशील इत्यर्थः। 'क्रुधमण्डार्थे- भ्यश्च' त्यनन युच्। 'क्रोधनोऽमर्षणः कोपी' त्यमरः। पारिग्रामिकं ग्रामस्यपरितःक्रियमा- णमिति यावत् विधिं रोधनविधिम्। ग्रामरोधने क्रियमाणमुपायं यावत्कर्तुमिच्छति ताव- दिति भावः। 'ग्रामात्पर्यनुपूर्वात्' इत्यनेन टञ्। यद्यपि सर्वेषु पुस्तकेषु 'पारग्रामि- कम्' इति पाठो दृश्यते तथापि परग्रामशब्दाट्ठञोऽप्राप्तेः पारिग्रामिकमिति पाठेनैव भाव्यं भूषणाकारश्चानुकूलोऽत्र। प्राकारं निर्भिद्य पुरद्वारमुद्घाट्येत्यर्थः। अभ्यधिकबलेन बलीयसा विद्विषाऽरिणा। संपराये युद्धे भिन्नं वर्म तनुत्रं 'चिलखत' इति प्रसिद्धं यस्य सः। बलादित्यनेन स यावच्छक्त्ययुध्यतेति व्यज्यते। बलवद्बलेन तदनिच्छयेति यावत्। हठाद्बलात्कारेण परिणेतुं उपयन्तुमात्मभवनं स्वगृहमुज्जयिनीं नीतवान्। कौतुकं विवाहसूत्रं स चण्डवर्मा क्षपावसाने रात्रेश्चरमे भागे। 'कौतुकं नर्मणीच्छायामु- त्सवे कुतुके मुदि। पारंपर्यागतख्याते मङ्गलोद्वाहसूत्रयोः' इति हैमः। तद्विवाहायैवा- म्बालिकायाः परिणयनायैव पिनद्धं बद्धं मङ्गलप्रतिसरो विवाहसूत्रं येन सः। समापतितं समीपमागतम्। अङ्गराजमभिसरति सहायं करोति तत् सहायभूतं राजमण्डलं नृपच- क्रम्। सुगूढं सुगुप्तमेव पौरवृद्धैर्नागरिकश्रेष्ठैः संभूयैकीभूय। नागरिकसाहाय्यं गुप्ततया संपाद्येत्यर्थः। तद्राजमण्डलमुपावर्तय नगरं प्रवेशयेत्यर्थः। उपावृत्तः प्रत्यागतः कृत्तशि-

---

१ 'पारग्रामिकम्' व-ब-न २ 'सालम्' व-ब. ३ 'भिन्नमर्मा' व. ४ 'अम्बालिकाम्' ब. ५ 'अस्मात्परं ' कृतकृत्यः ' इत्याधिकं ब· पुस्तके.

इति। 'तथा' इति तेनाभ्युपगते गतायुषोऽमुष्य भवनमुत्सवाकुलमुपसमाधीयमानपरिणयोपकरणमितस्ततःप्रवेशनिर्गमप्रवृत्तलोकसंबाधमलक्ष्यशस्त्रिकः सह प्रविश्य मङ्गलपाठकैरम्बालिकापाणिपल्लवमग्नौ साक्षिण्याथर्वणेन विधिनार्प्यमाणमादित्समानस्यायामिनं बाहुदण्डमाकृष्य च्छुरिकयोरसि प्राहार्षम्। स्फुरतश्च कतिपयानन्यानपि यमविषयमगमयम्। हतविध्वस्तं च तद्गृहमनुविचरन्वेपमानमधुरगात्रीं विशाललोचनामभिनिशाम्य तदालिङ्गनसुखमनुबुभूषुस्तामादाय गर्भगृहमविक्षम्। अस्मिन्नेव क्षणे तवास्मि नवाम्बुवाहस्तनितगम्भीरेण स्वरेणानुगृहीतः' इति।

रसं छिन्नमूर्धानं शत्रुं चण्डवर्माणम्। अभ्युपगतेऽङ्गीकृते। गतं नष्टप्रायमायुरायुषं यस्य तस्य। आयुषोऽसमाप्तत्वाद्गतेत्यादिकर्मणि क्तः। गन्तुं प्रवृत्तमिति तदर्थः। उत्सवेनाकुलं संबाधमुपसमाधीयमानानि सज्जीक्रियमाणानि परिणयस्य विवाहस्योपकरणानि साधनीभूतवस्तूनि यत्र तत्। प्रवेशोऽन्तर्गमनं निर्गमो बहिरागमनं च तयोः प्रवृत्तैर्लोकैर्जनैः संबाधं संकटम्। अलक्ष्याऽदृश्या शस्त्रिका छुरिका यस्य सः। मङ्गलपाठकैः बन्दिभिः सह प्रविश्य। तैः सह गमने समीपगमनलाभः। बन्दिनो हि विवाहवेद्याः समीपे तिष्ठन्ति। अम्बालिकायाः पल्लवमिव पाणिर्हस्तस्तम्। अग्नौ साक्षिणि वह्निसमक्षमाथर्वणेन पुरोधसा। 'आथर्वणः पुरोधाः स्याच्छान्तिपुष्टिकरो द्विजः' इति कामन्दकः। विधिना शास्त्रोक्तप्रकारेणार्प्यमाणं दीयमानमादित्समानस्यादातुमिच्छोः। आङ्पूर्वाद्दातेः सनि शानच्। आयामिनं दीर्घं बाहुदण्डं दण्डाकारं भुजमाकृष्य गृहीत्वा। उरसि वक्षसि छुरिकयाऽसिपुत्रिकया प्राहार्षमताडयम्। स्फुरतो निरुन्धतः। यमविषयं यमदेशम्। हतविध्वस्तं नष्टप्रायं तद्गृहं चण्डवर्मभवनमनुविचरन्नाहिण्डमानः। वेपमानानि कम्पमानानि मधुराणि मनोहराणि गात्राण्यवयवा यस्यास्तां विशाललोचनामायतनयनामभिनिशाम्य दृष्ट्वा तस्या आलिङ्गनस्याश्लेषस्य सुखमनुबुभूषुरनुभवितुमिच्छुः। गर्भगृहं वासगृहम्। 'गर्भागारं वासगृहम्' इत्यमरः। अस्मिन्निति। क्षणे समये नवो नूतनो जलपूर्ण इति यावदम्बुवाहो मेघस्तस्य स्तनितमिव गर्जितमिव गम्भीरस्तेन स्वरेण ध्वनिना।

24 श्रुत्वा च स्मित्वा च देवोऽपि राजवाहनः 'कथमसि कार्कश्येन कर्णीसुतमप्यतिक्रान्तः' इत्यभिधाय पुनरवेक्ष्योपहारवर्माणम् 'आचक्ष्व, तवेदानीमवसरः' इत्यभाषत। सोऽपि सस्मितं प्रणम्यारभताभिधातुम्—

इति श्रीदाण्डिनः कृतौ दशकुमारचरितेऽपहारवर्मचरितं नाम द्वितीय उच्छ्वासः।

श्रुत्वेति। स्मित्वा तदीयाद्भुतचरिताकर्णनेन विस्मय इत्यर्थः। कार्कश्येन कठिम्ना कर्णीसुतमपि स्तेयशास्त्रप्रवर्तकमप्यतिक्रान्तोऽतिशयानस्तदपेक्षयाऽप्यधिकप्रवीणः। अभिधायोक्त्वा। आचक्ष्व कथय। अवसरः कालः। सस्मितं किंचिद्विहस्येत्यर्थः प्रणम्य नमस्कृत्याभिधातुं वक्तुमारभतारब्धवानिति शम्।

श्रीमध्वसंस्तुतहरेः पदपङ्कजं मे श्रेयः करोतु सहबन्धुगणस्य नित्यम्।
अस्मत्कुले निवसतां निखिलार्तिहन्त्री तुष्टा हरेः प्रणयिनी च सरस्वती च॥

इत्यात्रेयगजेन्द्रगडकरकुलोत्पन्नसर्वशास्त्रपारंगतविद्वत्समितिसंस्तुत-
बाळाचार्यापरनामकश्रीराघवेन्द्राचार्यचरणपद्माराधकेन
तत्तनूजेन सुमङ्गलीलक्ष्मीगर्भसमुद्भवेन बटोदरनरा-
धीशतो लब्धव्याकरणनिष्णातपदवीकेन
स्वान्वयालंकारश्रीधीरेन्द्राचार्यपु-
त्रीकृतेन सेतुमाधवेन कृतायां
दशकुमारचरितव्याख्यायां
बालबोधिन्यां
द्वितीय उच्छ्वासः।

॥ श्रीकृष्णार्पणमस्तु ॥

श्रीवेङ्कटेशो विजयते.

Notes on Dashakumâracharita

PÛRVA PÎTHIKÂ CHAPTER I.

दशकुमारचरितम् Explain this as (1) दश च ते कुमाराश्च दशकुमाराः। तेषां चरितानि दशकुमारचरितानि। तानि अधिकृत्य कृतं काव्यम् a poetica l com position having the deeds or adventures of the ten princes as its subject. Note that such compounds are formed according to 'अधिकृत्य कृते ग्रन्थे' पा. 4· 3· 87, which prescribes the *taddhita* affix अण्. Now this affix causes the Vriddhi of the first vowel of the word according to 'तद्धितेष्वचामादेः' पा. 7. 2. 117. So strictly our form would be दाशकुमारचरितम्. Kâtyâyana however comes to our help at this stage and lays down in his Vârtika 'लुबाख्यायिकाभ्यो बहुलम्' that the *taddhita* affix अण् may optionally be dropped in the case of Âkhyâyikâs and as Dashakumâracharita is an Âkhyâyikâ we safely drop the अण् and legitimately obtain the form दशकुमारचरितम्. Two other ways of explaining the title दशकुमारचरितम् may be suggested. (2) दशकुमाराणां चरितम् (जात्येकवचनम् or समूहैकवचनम्) दशकुमारचरितम् and this word is by लक्षणा transferred to the literary work that describes the Charita or life of the ten princes. (3) दशकुमाराणां चरितानि यस्मिन् काव्ये तद् दशकुमारचरितम्· पूर्वपीठिका the preliminary or introductory section. The Pûrva Pîthikâ is not the work of Dandin but appears to have been written by a pupil of his. It serves to introduce the main work, the Dashakumâracharita, which has neither a beginning nor an end. Vide 'The Authors of the Dashakumâracharita' in our Introduction. उच्छ्वासः (from उद् + श्वस्) a chapter or division of a book, probably from the fact that the poet or the reader after going to the end of a chapter breathes freely before he enters on another. Uchchhvâsa, however, is a name peculiar to the chapters of Âkhyâyikâs such as Bâna's Harshacharita or Dandin's Dasha-

kumâracharita. Vide 'Âkhyâyikâ and Kathâ' in our Introduction. In Sanskrit more words than one are used to signify chapters or divisions of literary works. Vide the following for some of these: 'सर्गो वर्गः परिच्छेदोद्घाताध्यायाङ्कसंग्रहाः । उच्छ्वासः परिवर्तश्च पटलः काण्डमाननम् । स्थानं प्रकरणं चैव पर्वोल्लासाह्निकानि च । स्कन्धांशौ तु पुराणादौ प्रायशः परिकीर्तितौ ।'.

Stanza 1. It is a well-known traditional custom of Sanskrit writers to begin their works with a salutation or benediction. This is called **मंगल**. It is credited with the power of removing obstacles and leading to safe completion the work undertaken. It is to be noted that Daṇḍin's proper work has neither a **मंगल** nor a conclusion. It begins as abruptly as it ends. Vide for the efficacy and desirability of the Mangala 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति' पतञ्जलि's महाभाष्य; 'ननु मङ्गलस्य समाप्तिसाधनत्वं नास्ति । मङ्गले कृतेऽपि कादम्बर्यादौ निर्विघ्नपरिसमाप्त्यदर्शनात् । मङ्गलाभावेऽपि किरणावल्यादौ समाप्तिदर्शनादन्वयव्यतिरेकव्यभिचारादिति चेत् । न । कादम्बर्यादौ विघ्नबाहुल्यात्समाप्त्यभावः । किरणावल्यादौ तु ग्रन्थाद्बहिरेव मङ्गलं कृतमतो न व्यभिचारः । ननु मङ्गलस्य कर्तव्यत्वे किं प्रमाणमिति चेत् । न । शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात् । 'समाप्तिकामो मङ्गलमाचरेत्' इति श्रुतेः' अन्नंभट्ट's दीपिका. The principal clause is त्रैविक्रमः अङ्घ्रिदण्डः वः श्रेयः वितरतु may the massive foot of Vishṇu bestow on you eternal felicity. त्रयः विक्रमाः यस्य स त्रिविक्रमः one who took three strides *i. e.* Vishṇu. त्रिविक्रमस्य अयं त्रैविक्रमः. The reference is to the fifth incarnation of Vishṇu when the Lord, at the request of the gods who were much oppressed by the powerful demon Bali, a son of Virechana, the son of Pralhâda, descended on earth as a son of Kashyapa and Aditi in the form of a dwarf (Vâmana). Assuming the dress of a mendicant he went to Bali and prayed for as much earth as he could cover in three steps (Krama or Vikrama). Bali, who was noted for his liberality, unhesitatingly acceded to this apparently simple request. But the dwarf soon assumed a mighty form and began to measure the three steps. The first step covered the earth, the second the heavens; and not knowing where to place the

third, he planted it on the head of Bali and sent him and al his legions to the Pâtâla and allowed him to be its ruler. This story is often referred to in literature. Note 'श्यामः पादो बलिनियमनेऽभ्युद्यतस्येव विष्णोः' Megh. 59; Raghu 7.35; Si. 13·12; 'छलयसि विक्रमणे बलिमद्भुतवामन पदनखनीरजनितजनपावन । केशव धृतवामनरूप जय जगदीश हरे ।' Gît. 1. For the story of वामनावतार vide हरिवंश अ. 261. The kernel of this Puranic story viz. Vishṇu's exploit in taking the three strides is found even in the *Ṛ*igveda (1. 22. 17) ' इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूळ्हमस्य पांसुरे'. अङ्घ्रिः दण्डः इव अङ्घ्रिदण्डः a foot resembling a rod or club *i. e.* a powerful foot. The compound is formed according to ' उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ' पा 2.1.56 (उपमेयं व्याघ्रादिभिः सह प्राग्वत् *i. e.* समस्यते साधारणधर्मस्याप्रयोगे सति । विशेष्यस्य पूर्वनिपातार्थं सूत्रम् । पुरुषव्याघ्रः नृसोमः । व्याघ्रादिराकृतिगणः । सामान्याप्रयोगे किम् । पुरुषो व्याघ्र इव शूरः । सि. कौ·). श्रेयः means eternal bliss, the bliss of absolution, as opposed to प्रेयः which signifies worldly bliss or joy. Note for this distinction काठकोपनिषत् 2. 1, 2 ' अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः । तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥ श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः । श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद्वृणीते ॥'· वः refers in general to the student world. This form of Mangala is rather unusual. Generally the Mangala of a Kâvya is a salutation to or glorification of a favourite deity. The present stanza which is benedictory in form has a tinge of the dramatic Nândî about it. The reading ते for वः found in most editions is to be rejected for obvious reasons. The other words in the stanza qualify अंघ्रिदण्डः and are in apposition to it. ब्रह्मा...दण्डः the pole of the umbrella in the form of Brahmâ's egg *i. e* the universe. The idea is Vishṇu supports the whole universe. This is natural enough; because Vishṇu is the deity whose work is the preservation of the entire creation. By a kind of Sanskrit synecdoche or Lakshaṇâ Vishṇu's foot stands for Vishṇu. ब्रह्माण्ड is the primordial egg from which the universe sprang. It is declared in मनुस्मृति (1. 8-13) that in the beginning the Lord created water in which he deposited a seed. This seed became a golden egg in which he himself was born as Brahmâ, the progenitor of all the world.

Hence the egg is known as Brahmâṇḍa. The lord then divided the egg into two parts with which he constructed heaven and earth. Thus Brahmâṇḍa means the whole universe. शत...नालदण्डः the powerful stalk of the lotus, the birth-place or residence (भवनम्) of Brahmâ. नालः–लम् the stalk of a lotus. अम्भोरुह् *n* (ह्) a lotus. The more common word is अम्भोरुहम्. शतधृतिः means both Brahmâ and Indra. For the former sense vide महिम्नस्तोत्र 18. Originally this word like शतक्रतु signified Indra the god *of hundred intellects or powers.* The latter frequently occurs as Indra's epithet in the *R*igveda. The reference here is to the story of the birth of Brahmâ, the first deity of the sacred Hindu Trinity to whom is entrusted the work of creating the world. Mythology represents him to have been born from and to be always residing in a lotus which has sprung from the naval of Vishṇu. Vishṇu therefore is the support of Brahmâ's abode. Note म. भा. वनपर्व 273 'प्रध्यानसमकालं तु प्रजाहेतोः सनातनः । ध्यातमात्रे तु भगवन्नाभ्यां पद्मः समुत्थितः ॥ 44 ततश्चतुर्मुखो ब्रह्मा नाभिपद्माद्विनिसृतः । तत्रोपविष्टः सहसा ब्रह्मा लोकपितामहः ॥ 45'; also शांतिपर्व 357. 22; and 'संज्ञाप्य नः स्वध्वजभृत्यवर्गान् दैत्यारिरत्यब्जनलास्यतुल्ये । तत्संकुचन्नाभिसरोजपीताद्धातुर्विलज्जं रमते रमायाम् ॥' N. 3. 34. Compare also 'अङ्घ्रिदण्डो हरेरूर्ध्वमुत्क्षिप्तो बलिनिग्रहे । विधिविष्टरपद्मस्य नालदण्डो मुदेऽस्तु वः ॥' quoted in कुवलयानन्द p. 59 (निर्णय॰). क्षोणी...दण्डः the pole of the mast (कूपः–पकः) of the vessel (नौः) in the form of the earth. Vishṇu guides the destinies of the earth like the mast which regulates the course of a vessel. क्षरत्...दण्डः the flag-staff of the banner (पट्टिका) in the form of the flowing celestial river. Wilson translates क्षरदमरसरित् as 'ambrosia-shedding river,' which is wrong. अमरसरित्, the river of the gods, is the sacred Ganges which on account of its whiteness is considered to be a banner and Vishṇu's foot from which it issues is said to be the flag-staff. The reference is to the Puranic story which says that the Ganges sprang from the foot of Vishṇu, when in his Dwarf incarnation he began to assume gigantic proportions and touched the vault of heaven in Brahmaloka with his foot which being washed with water by Brahmâ gave rise to the sacred river. Note 'विष्णुपादविनिष्क्रान्ता प्लावयित्वेन्दुमण्डलम् । समन्ताद् ब्रह्मणः पुर्यां गंगा पतति वै दिवः ॥' वि. पु. 2. 2. 31; 'वामपादाम्बुजाङ्गुष्ठनखस्रोतोविनिर्गता ।

विष्णोर्बिभर्ति यां भक्त्या शिरसाहर्निशं शिवः ॥' Ibid 2. 8. 110; also Ibid 4. 4. 15 and मार्कण्डेय 56. ज्योति...दण्डः the pole-staff or axle (अक्षदण्डः) of the wheel in the form of the (revolving) luminaries (ज्योतिस्). The idea is that the working of the planetary systems and the movements of all the luminaries in the firmament depend on Vishṇu. त्रिभुवन...दण्डः the massive column or pillar of victory over the three worlds. Vishṇu's foot marks his triumph or pre-eminence in the three worlds. Perhaps there is here again a reference to his Vâmanâvatara. The custom of erecting huge columns to commemorate victories prevailed in India from very ancient times. विबुध...दण्डः the death-dealing club to the enemies of gods. There is a reference to the special work of Vishṇu who now and then allows himself to be born in this mortal world with the avowed object of bringing about the destruction of the wicked demons. This stanza contains a few suggestions. First the word त्रैविक्रमः suggests that the Dashakumâracharita is not the work of a single author, but is the joint result of the exploits or labours (विक्रमः) of three different men. Then the stanza may suggest, in the manner of a Nândî, the greatness of the hero of the work, Râjavâhana, who, we may gather, would be the master of the earth and hence its support and the guide of its destinies, a friend of all valiant and lustrous people (*e. g.* the Kumâras), a great conqueror and a chastiser of his enemies and the enemies of the god-like learned people (विबुध). We have further to note the conscious effort on the part of the author of this stanza to weave into it as many times as possible the word daṇḍa with the obvious object of suggesting the name of the original author. In this stanza an Alankârika would find a poetic defect known as समाप्तपुनरात्तत्व (for which vide K. P. p. 3:4); for the sense of the stanza is complete for all practical purposes with the word वितरतु and the following clause is used apparently without any special motive just to swell the number of adjectives. Hence the defect. If however we argued that the clause used after the completion of the sense serves the special purpose of prominently bringing to our notice the fact that Vishṇu is particularly known for destroying his enemies and thus suggests the exploits of the hero in overcoming his foes,

the defect would vanish. This stanza is quoted in the सरस्वतीकण्ठाभरण of भोज to illustrate समस्तोऽनेकगुणो लाटीयानुप्रासः (p. 248-249 Benares edition), but the name of the author is not given. It is also found in the Shârngadharapaddhati(No. 127)and is there attributed to Daṇḍin

Par. 1. अस्ति...पुष्पपुरी नाम नगरी is the principal sentence. The three adjectives qualify पुष्पपुरी. समस्त...माणा acting as a touch-stone for all (other) cities. Pushpapurî served the purpose of a standard to which all other cities could be compared. It was an ideal city. निकषायमाणा *pres. part.* of निकषायते, निकष इव आचरति, formed according to 'कर्तुः क्यङ् सलोपश्च' पा. 3. 1. 11 (उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात्।...कृष्ण इव आचरति कृष्णायते। सि. कौ.). शश्वत् always, at all times of the year. This suggests that the merchants of Pushpapurî were universally prosperous. Their fortunes did not ebb and flow. अगण्य...महात्म्या that loudly (वि) proclaimed (आख्यात) the greatness of the ocean by the number (जातम्) of articles such as collections of gems and others exposed (for sale) among countless commodities. The idea is: collections of gems of various kinds were exposed to sale among countless other commodities in the markets of Pushpapurî. The city therefore thus seemed to proclaim the richness of the ocean in precious stones. पण्य an article or commodity to be sold. 'विक्रेयं पणितव्यं च पण्यं क्रय्यादयस्त्रिषु' अमरः. The word is formed according to 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु' पा. 3. 1. 101 (पण्या गौः। व्यवहर्तव्येत्यर्थः। पाण्यमन्यत्। स्तुत्यर्हमित्यर्थः। सि. कौ.। यद्यपि पणितव्यशब्दोऽर्थद्वयसाधारणस्तथापि निपातनस्येह रूढ्यर्थत्वाद् व्यवहर्तव्य एव अयं निपात्यते। तत्वबोधिनी). रत्नाकरः the ocean, because it is the mine or store-house (आकरः) of gems. Note 'गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः कापि कवीश्वराणाम्। रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः॥' विक्रमाङ्कदेवचरित 1. 12. रत्नाकर would also mean a regular mine of jewels. In that case the suggestion would be that Pushpapurî possessed rich mines of jewels. This meaning is not so good. मगध...भूता which has become the crest or chief ornament of the Magadha country. The ancient Magadha corresponded with the modern Behar (South) and its capital was Pushpapura or Pushpapurî

the same as Kusumapura, better known as Pâtaliputra. It is referred to as Palibothra in the classical accounts of India *e g.* by Arrian. It was situated near the confluence of the Hiraṇyabâhu (so glowingly described by Bâṇa in his Harshacharita) or the modern Shoṇa and the Ganges. It is said to have been destroyed by a river inundation about the middle of the eighth century A. D. How Pushpapurî received the name of Pâtaliputra is explained by a story in the Kathâsaritsâgara 1. 3. शेखरीभूता (अशेखरः शेखर इव संपद्य. माना) is what is technically called a च्वि form obtained according to 'कृभ्वस्तियोगे संपद्यकर्तरि च्विः' पा. 5. 4. 50 'अभूततद्भाव इति वक्तव्यम्' वा. (विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशद्बात्स्वार्थे च्विर्वा स्यात्करोत्यादिभि-र्योगे ।....अकृष्णः कृष्णः संपद्यते, तं करोति–कृष्णीकरोति । ब्रह्मीभवति । गङ्गीस्यात् । सि. कौ.). Such forms are properly used when a certain thing be-comes *i. e.* is looked upon as another when originally it is not so. The rule may best be remembered by the following famous example 'अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन । यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ॥ Raghu. 2. 36. Here the tree though really not a son is looked upon as one. It is to be noted that the च्वि form is sometimes used in literature without the strict अभूततद्भाव sense. The next sentence is तत्र...राजहंसो नाम...भूपो बभूव and contains the description of the king. वीर...दण्डः whose formidable (समुद्दण्डः समुद्यतः दण्डः यत्र lit. having in it a club raised) arm acted like the Mandara mountain in churning the ocean of the army of the whole collection (गणः) of his enemies, terrific on account of the sharks or alligators (मकरः) in the form of the horses and elephants and full of mighty (उद्) waves in the form of the heroes and hired soldiers (भटः). By a bold metaphor the king's arm stands for the Mandara mountain, the army of his enemies for the ocean, the horses and elephants for the sharks and the warriors and soldiers for the waves. मथन is parono-mastic and means both churning and destruction. The idea is the king's powerful arm used to destroy hostile armies, the reference being to the churning of the ocean by gods and demons for the sake of nectar, when they used the Mandara mountain as the churning

rod and Vâsuki the serpent as the rope. For समुद्रमन्थन vide रामायण बालकाण्ड अ. 45 and वि. पु. 1· 9 'मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्। मथ्यताममृतं देवाः साहाय्ये मय्यवस्थिते ॥ 76' ;also 'मन्थानं मन्दरं कृत्वा तथा योक्त्रं च वासुकिम्। देवा मथितुमारब्धाः समुद्रं निधिमम्भसाम् । अमृतार्थे पुरा ब्रह्मन् तथैवासुरदानवाः ॥' म. भा. आदिपर्व अ. 18· 13. पुरन्दर...मानया (qualifying कीर्त्या) which was being repeatedly sung by a number of youthful courtesans (the Apsarases) of the gods (गीर्वाणः or गीर्बाणः) intent on or engaged in (परायण) diverting themselves in the gardens attached to the courtyards (अंगणम् or अंगनम्–अंग्यते गृहान्निसृत्य गम्यते अत्र) of Indra's capital. The idea is that the king's fame had reached as far as heaven and that young Apasarases always used to sing it in joy. पुरंदर, 'the destroyer of cities,' is an epithet of Indra because he is described in the *R*igveda as demolishing the cities or fortresses of his enemies *i. e.* the clouds. His principal exploits are mentioned in one stanza *viz. R*igveda 10. 89. 7 'जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो अरदन्न सिन्धून्। बिभेद गिरिं नवमिन्न कुम्भमागा इन्द्रो अकृणुत स्वयुग्भिः ॥'. जेगीयमानया *pres. part.* from जेगीयते frequentative of गै-गायति-to sing. अतिमानया=मानमतिक्रान्तया which was beyond all measure. Or अतिशयितं मानं यस्याः तया whose measurement was exceedingly great. For a similar idea note 'आरूढमद्रीनुदधीन्वितीर्णं भुजंगमानां वसतिं प्रविष्टम्। ऊर्ध्वं गतं यस्य न चानुबन्धि यशः परिच्छेत्तुमियत्तयालम् ॥' Raghu. 6. 77. शरदिन्दु...मूर्त्या whose form resembled (नीकाश) the autumnal moon, the Kunda flower, camphor (घनसारः), snow (नीहारः), the pearl necklace, the (white) lotus-stalk (मृणालम्), the swan (मरालः), the celestial elephant (Airâvata), water, milk, the cachinnation (अट्टहासः) of Shiva, the Kailâsa mountain and the Kâsha flower. Fame and laughter are white according to the convention of Sanskrit poets, for which vide Appendix A. In this compound all the conventional white things are brought together and the king's fame is compared to them all. ०कैलासकाशैः नीकाशा मूर्तिः यस्याः तया. 'अथ कर्पूरमस्त्रियाम्। घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका' अमरः. Camphor is so called (घनः सारः यस्य) because it is possessed of a powerful essence in as much as camphor when burnt

attains greater fragrance and coolness, they say. Compare 'कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने । नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे ॥' quoted in K. P. p. 659; also N. 7. 25. नीकाश— words such as निभ, सन्निभ, संकाश, नीकाश etc. used as the latter member of compounds have the sense of 'similar to' or 'resembling.' Note 'स्युरुत्तरपदे त्वमी । निभसंकाशनीकाशप्रतीकाशोपमादयः' अमरः । अमी निभादय उत्तरपदस्था एव सदृशवचना वाच्यलिङ्गाः स्युः । व्या. सु. रचित...पूर्णा which had filled the spaces (अन्तरालं) of the quarters. कीर्त्या...भित: who was made fragrant by (*i. e.* who possessed) his fame (described above). For the general idea compare 'हंसश्रेणिषु तारासु कुमुद्वत्सु च वारिषु । विभूतयस्तदीयानां पर्यस्ता यशसामिव' Raghu. 4. 11; 'निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।' Ibid 2.3 where Mallinâth explains सुरभि as charming, quoting 'सुरभिः स्यान्मनोज्ञेऽपि' विश्वः. स्वर्लोक...वान् who was fortunate in the enjoyment of the loveliness of the attractive woman (रमणी) in the form of the earth encircled by the girdle in the form of the border of the ocean containing jewels, large and charming like those on the peaks of Mount Meru. That the earth is a legitimate wife of the king is a conceit common enough in Sanskrit literature. As the earth is surrounded by the sea, its border serves as the girdle the jewels of which are naturally the jewels to be found in the ocean. स्वर्लोकशिखरेषु (वर्तमानानि रत्नानि) इव उरूणि रुचिराणि च रत्नानि यस्मिन्. Bühler translates 'jewels large and brilliant as Mount Meru.' This would be too astounding an exaggeration even for the notorious Sanskrit poets! स्वर्लोकः (heaven) means here Mount Meru, because heaven is said to be situated on that Mountain. Meru is a fabulous mountain of gold, whose peaks are made of jewels and which, is the residence of the gods. It is this mountain around which according to Purâṇic accounts, all planets revolve. Note 'मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः' अमरः. For Meru's peaks abounding in jewels compare 'सद्रत्नमुक्ताफलवज्रभाञ्जि विचित्रधातूनि सकाननानि । स्त्रीभिर्युतान्यप्सरसामिवौघैर्मेरोः शिरांसीव गृहाणि यस्याम्' भट्टिकाव्य 1. 7. वलयित- (वलयमस्य संजातम्) 'encirled or girded' is formed according to 'तदस्य संजातं तारकादिभ्य इतच्' पा. 5. 2. 36 (तारकाः संजाता अस्य–तारकितं नभः ।

आकृतिगणोऽयम् । सि. कौ.). For the earth being the wife of the reigning king note ' आसीन्नाथ पितामही तव मही माता ततोऽनन्तरं । संप्रत्येव हि साम्बुराशिरशना जाया जयोद्भूतये ॥ पूर्णे वर्षशते भविष्यति पुनः सैवानवद्या स्नुषा । युक्तं नाम समस्तशास्त्रविदुषां लोकेश्वराणामिदम् ' सुभाषितावलि St. 2546; also Raghu. 6. 63, 8. 63; M. 1. 15. Note that रमणीसौभाग्य is a Sanskritisim for सौभाग्ययुता रमणी, for the object of enjoyment is not सौभाग्य but रमणी. Similar construction occurs in 'कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं । पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ' Me. 49 where नेत्रकौतूहलानां = कौतूहलयुतनेत्राणाम्. Mark that the compound ॰सौभाग्यभोगः एव भाग्यम्, तद् विद्यते यस्य सः ॰भाग्यवान् is against the grammatical rule which says that no affix showing possession should be added to a Karmadhâraya if its sense could be had by the use of a Bahuvrîhi. ' न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः.' Here the same sense could be obtained if we had ॰सौभाग्यभोगः एव भाग्यं यस्य सः ॰भाग्यः. The possessive termination वत् is therefore unnecessary. But this rule is not strictly followed by the poets. Vide Me. 11; Raghu 4. 47. Grammarians do not consider this rule to be inviolable as Patanjali has used the form असुब्वतः in his Mahâbhâshya. अनवरत...निकरः who patronised or protected, with gifts in continuous sacrifices, a collection of wise (शिष्ट) and eminent (विशिष्ट) Brâhmaṇas, resplendent with their load of learning. The idea is he continually performed sacrifices and distributed rich gifts to learned Brâhmaṇas. शिष्ट technically means a Brâhmaṇa who has learnt, according to strict rules, the Vedas together with the subsidiary lores and the Purâṇas. ' धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः । ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ' Manu. 12. 109. भूसुरः a Brâhmaṇa, because he was entitled to the respect of a god on earth. विरचित...हंस॰ who always equalled (तुलित) the sun (हंसः) in the middle of the sky by his valour (also 'extreme heat') that inflicted torments on the enemies. On account of the heat of his valour the king *always* looked like the mid-day sun, who of course assumes that position only for a

short time. Thus there is a suggestion of the king's not only equalling but excelling and hence despising the sun, both of which senses are contained in तुलित. Note 'प्रासादास्त्वां तुलयितुमलं यत्र तस्तैर्विशेषैः' Me. 66; 'अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वाम्' Ibid. 20. For the various senses of हंस vide 'हंसो स्यान्मानसौकसि। निर्लोभनृपविष्णवर्केषु परमात्मनि मत्सरे। योगिभेदे मन्त्रभेदे शारीरमरुदन्तरे। तुरंगमप्रभेदे च' मेदिनी. The metahor of the sun being spoken of as the swan of the sky is however as old as the *R*igveda wherein the sun is often described as the bird or eagle traversing space. घनदर्प... रूपः whose attractive (हृद्य) and flawless (निरवद्य) beauty was allied to (सोदर्यः a co-uterine brother) that of Cupid possessed of excessive pride. Note that घनदर्प is really a useless adjective of Kandarpa brought in for the sake of alliteration. The author of the Pûrva pîṭhikâ is very fond of this. It makes no difference in Cupid's beauty, if he is excessively proud or not. The use of such an adjective technically constitutes a blemish, called अपुष्टार्थत्व, exemplified in in the stock sentence 'विलोक्य वितते व्योम्नि विधुं मुञ्च रुषं प्रिये' where वितत is such an adjective. कन्दर्पः is explained as (1) कम् इति अव्ययं कुत्सायाम्। कुत्सितो दर्पः अस्य कन्दर्पः (2) कं सुखं तत्र तेन वा दृप्यति (3) कं दर्पयामीति मदाज्जातमात्रो जगाद च। तेन कन्दर्पनामानं तं चकार चतुर्भुजः। कथासरित्सागर 20. 64. सोदर्य is explained as समाने उदरे शयितः स्थितः समानोदर्यः or सोदर्यः. हृदयस्य प्रियः हृद्यः. निरवद्य faultless, free from any blemish. अवद्य *pot. p.* from वद् has the special sense 'censurable,' as distinguished from अनुद्य another *pot. p.* which means only 'what ought not to be uttered.' Note 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु' (वदनोऽत्र उपपदे वदः सुपीति यत्क्यपोः प्राप्तयोर्यदेव सोऽपि गर्हायामेवत्युभयार्थं निपातनम्। अवद्यं पापम्। गर्ह्यं किम्। अनुद्यं गुरुनाम। तद्धि न गर्ह्यं वचनानर्हं च। सि. कौ.). सुमती—this word presents a difficulty and has again been used for alliteration the poet's fondness for which has already been referred to. सुष्ठु मतिः यस्याः सा सुमतिः. This is the correct form. We must either say that मती as well as मतिः is a word for 'intellect,' of course against the authority of all lexi-

cons, or explain the word as being the feminine form of सुमत्, 'possessed of all good things or blessings (सु).' लीला...मणिः the crest-jewel (*i. e.* the chief or foremost) of the whole tribe of sportive ladies. लीला is technically defined as 'अंगवेषैरलंकारैः प्रेमिभिर्वचनैरपि । प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः' S. D. 3. 98; 'प्रियानुकरणं लीला मधुरांगविचेष्टितैः' D R. 2. 37. रमणी a wife. रोषणेक्षणेन...समभूवन्निव The idea in this sentence is: when Shiva in anger burnt Kâma (vide Ku. 3) who at the command of Indra had tried to swerve the great God's mind from his usual equanimity, all the paraphernalia of Kâma including his retinue resorted in dread to Vasumatí, thinking that she, being the type of matchless and flawless beauty, was the next best person for them to serve after Kâma and that she being a woman would be immune from Shiva's anger. रोषणे... केतने when Madana had his life reduced to ashes by Shiva of angry (रोषण) eyes. Note that चेतना or the vital principle of life or the consciousness cannot be reduced to ashes. The word must therefore be understood to have been used metaphorically for 'body.' The author obviously has selected it to rhyme with केतने. Kâma or Cupid is called मकरकेतन because a crocodile (मकरः) is his banner or emblem (केतनम्). Shiva is निटिलेक्षण because he has a third eye on his forehead. भयेन is to be construed with समभूवन्, because all these objects connected with Kâma resorted to Vasumatî *i. e.* became her various limbs in dread of Shiva's anger. अनवद्या...मत्वा thinking her to be a flawless woman. Construe: रोलम्बावली तस्याः केशजालं समभूद् इव and the following clauses are to be similarly construed The row (आवली) of bees (रोलम्बः), which, according to the poetic convention, forms the bowstring of Cupid, became as though Vasumatî's mass of hair. The idea is her hair were as dark as bees and charming and attractive withal. Compare 'अलिपंक्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता' Ku. 4. 15; *R*it. 6. 1; 'धनुः पौष्पं मौर्वी मधुकरमयी चंचलदृशां दृशां कोणो बाणः सुहृदपि जडात्मा हिमकरः । स्वयं चैकोऽनंगः सकलभुवनं व्याकुलयति क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥' भोजप्रबन्ध St. 171. It is to be

noted that the author does not here represent the line of bees as Cupid's bow-string, though that is the express convention. For below he speaks of two fibrous lotus-stalks as being Madana's bow-strings. The bees, therefore must, according to our author, be understood to be only attending on the bow-string. **प्रेमाकरो...वदनम्** the moon, the receptacle or storehouse (आकरः) of his (Kâma's) love, became her face that had conquered the lotus in beauty. The moon as being a great excitant of love is fitly spoken of as the special object of Kâma's affection, for he greatly helps Kâma in his purposes. It is also in the fitness of things that the moon who is hostile to the Aravindas (day-lotuses) should seek shelter with one (*viz*. the face) who had conquered the day-lotuses. The ultimate idea is that Vasumatî's face possessed the beauty of both the moon and the lotus. Note 'चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम्। उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः॥' Ku. 1. 43. **जय...युगलम्** the fish, that acted as his banner of victory became, together with his wife, her two eyes. The adjective जायायुतः is necessary in order to account for the two eyes. Cupid has both the crocodile and the fish as his emblem or banner. **'मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः।...पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः'** **अमरः. सकल...निःश्वासः** the Malaya breeze, the principal hero from among all his soldiers, became her breath. The idea is her breaths were fragrant. Sanskrit poets often describe the breaths of great and beautiful men and women as being perfumed. Malaya is a mountain range in the south of India abounding in sandal trees. The wind coming from this mountain is usually represented as wafting the odour of sandal trees and other fragrant plants growing thereon which peculiarly affects persons who are smitten with love. Note that अंगवीरः literally means 'the subordinate hero' as opposed to 'the principal hero (प्रधानवीरः).' But the required sense is here obtained by admitting an emphasis on the word and saying 'Malaya is subordinate *only to his master Kâma*.' **पथिक...बिम्बम्** the tender sprout (प्रवालः), that sword to pierce the hearts of travellers (*i. e.* lovers separated from their beloveds), became her bimba-like (*i e.* red) lower lip. Sprouts

such as those of mango trees have a very exciting influence on seperatted lovers. करवालः a sword. 'म्लेच्छनिवहनिधने कलयसि करवालं धूमकेतुमिव किमपि करालम्। केशव धृतकल्किशरीर जय जगदीश हरे' Gît. 1. जय...कन्धरा his victorious conch became her beautiful (बन्धुर) and lovely neck. Possession of a conch-shaped neck *i. e.* a little tapering above and marked with three lines is a sign of feminine beauty and good fortune. Compare words like कम्बुग्रीवा, कम्बुकण्ठी and read 'कवित्वगानप्रियवादसत्यान्यस्या विधाता व्यचिताधिकण्ठम्। रेखात्रयन्यासमिषादमीषां वासाय सोऽयं विबभाज सीमाः' N. 7. 67; 'रोमप्रवर्जितमुरो मृदु चांगनानां ग्रीवा च कम्बुनिचितार्थसुखानि धत्ते' बृ. सं. 69. 5. 'रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते'. जयावहः or जयघोषकः शंखः जयशंखः (मध्यमपदलोपी) the conch which brings or proclaims victory. Note 'स्मरस्य कम्बुः किमयं चकास्ति दिवि त्रिलोकीजयवादनीयः।' N. 22. 22. बन्धुर beautiful. 'बन्धूरबन्धुरौ रम्ये नम्रे, हंसे तु बन्धुरः। बन्धूके च विडङ्के च बन्धुरा पण्ययोषिति।' विश्वः. लावण्यधरा–लावण्यं धरति सा one which possesses loveliness. Or लावण्यस्य धरा the abode (lit. the earth) of loveliness. लावण्य is thus defined: 'मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते'. पूर्ण..धरौ his two full jars became her breasts resembling the Chakravâka birds. Pitchers full of water are kept outside the bed-chamber as a sign of auspiciousness. Note 'तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टां प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाम् (नवोपकार्यामध्युवास)।' Raghu. 5. 63. The comparison of the breasts of a woman with Chakravâkas is not unusual in Sanskrit. Compare 'निःशेषसंकोचितपंकजोऽयमस्यामुदीतो मुखमिन्दुबिम्बः। चित्रं तथापि स्तनकोकयुग्मं न स्तोकमप्यश्नाति विप्रयोगम्' Subhâ. p. 278. ज्यायमाने...बाहू the two fibrous stalks of lotuses (बिसः), unparalled in softness, that served as his bow-strings, became her arms. The idea is her hands were soft and delicate and long. लता gives to बिस the sense of 'long', if any. ज्यायमाने *pres. p.* of ज्या इव आचरति ज्यायते. The notion of stalks of lotuses forming Cupid's bow-strings is rather unusual. ईषत्...नाभिः the slightly blown lotus-bud, that formed his sportive ear-ornament (अवतंसः), became her naval resembling an eddy (आवर्तः) of the Ganges. A round and deep naval is admired

by Sanskrit poets as a mark of beauty. Compare 'नृपं तमावर्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री ।' Raghu. 6. 52; 'वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः । संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः' Megh. 28; 'नाभिर्गभीरा विपुलांगनानां प्रदक्षिणावर्तगता च शस्ता' बृ स. 69. 4. सनाभिः resembling. It is a word belonging to the class of निभ, संकाश etc. and means literally 'uterine (समानो नाभिः यस्य)' and is here specially used for the purpose of alliteration. दूरीकृत...जघनम् his victorious chariot which puts off to a long distance (the fulfilment of) the desires of ascetics, became her extremely weighty (घन) buttocks. The idea is when Kâma starts on his expedition in his ever-victorious chariot, he swerves the minds of Yogins from their equanimity and enkindles love therein with the result that their cherished desire of obtaining absolution from this world is postponed *sine die*, as they become entangled in matters of love. The suggestion is that Vasumatî's buttocks were very charming and exercised the same fascinating influence on ascetics' minds. Note that it is generally the wheels of the chariot and not the chariot itself with which the posteriors of women are compared. रथः therefore must here be metaphorically taken in the sense of a part of the chariot *viz.* the wheel. For a similar expression note 'यदयं रथसंक्षोभादंसेनांसो रथोपमश्रोण्याः । स्पृष्टः सरोमविक्रियमंकुरितमिव मनासिजेन' V. 1. 11. जैत्र habitually or ever victorious. जेतुं शीलमस्य. Wilson reads चैत्ररथः for जैत्ररथः. चैत्ररथम् is the name of Kubera's garden. चैत्ररथः makes no sense. जय...युगम् the two plantain trees, which were like his columns of victory, were the very essence of beauty and had put obstacles in (the way of) the efforts (आरम्भः) of sages, became her two thighs. Comparision of women's thighs with the plump and tapering trunks of plantain trees is common enough in Sanskrit. रम्भे also contains a reference to the heavenly nymph Rambhâ, the special favourite of Kubera's son Nalakûbara, and considered to be the most beautiful lady in Indra's paradise, and some other Apsarâ, perhaps of the same name. It is well-known that the timid Indra often sends these heavenly nymphs to disturb the austerities of sages. The story of Shuka and Rambhâ is relevant here. For Rambhâ in both the above

senses vide 'तरुमूरुयुगेन सुंदरी किमु रम्भां परिणाहिना परम्। तरुणीमपि जिष्णुरेव सा धनदापत्यतपःफलस्तनीम्' N. 2. 37. Note that the compounds जयस्तम्भभूते and सौंदर्यभूते are peculiar. These are not च्वि forms. Explain them as: (1) भूत is sometimes added in the sense इव. This we know from कैयट who, in his प्रदीप, while commenting on पतञ्जलि's 'यस्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वाच्छिन्नं सामान्यभूतं स शब्दः' (महाभाष्य), says, 'सामान्यमिव सामान्यभूतम्। भूतशब्द उपमार्थे यथा पितृभूत इति'. So जयस्तम्भौ इव जयस्तम्भभूते. Note further that मेदिनी gives भूत as a synonym of 'like' or 'similar.' 'भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीबे त्रिषूचिते। प्राप्ते वृत्ते समे सत्ये...' मेदिनी. For a similar use compare 'आशास्यमन्यत्पुनरुक्तभूतम्' Raghu 5. 34; 'जलदसमय एष प्राणिनां प्राणभूतः' *R*itu. 2. 28; 'पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत्' Bh. III; 'ते मर्त्यलोके भुवि भारभूताः' Ibid I. (2) Admit an irregular compound known as सुप्सुप्समासः which consists in compounding any word with any other. सौन्दर्यं भूते सौन्दर्यभूते those that had become the very beauty. Mallinâtha has resorted to this expedient while commenting upon 'प्रत्यर्थिभूतामिव तां समाधेः' Ku. 1. 59. आतपत्र...द्वयम् the lotus (lit one possessed of a thousand petals) which formed his umbrella (आतपात् त्रायते तदातपत्रम्) became her two feet. 'सहस्रपत्रं कमलं शतपत्रं कुशेशयम्' अमरः. Symmetry requires the author to use the dual of सहस्रपत्र and give to Madana two umbrellas as he has given him two bow-strings. अस्त्र...अङ्गानि the flowers that formed his weapons (अस्त्रम्) became those (well-known) other limbs of hers. The idea is all her other limbs possessed the delicacy and softness of flowers. Madana is flower-armed. The flowers which form his weapons are thus enumerated 'अरविन्दमशोकं च चूतं च नवमल्लिका। नीलोत्पलं च पंचैते पंचबाणस्य सायकाः'. The five arrows may also be these: 'संमोहनोन्मादनौ च शोषणं तापनस्तथा। स्तम्भनश्चेति कामस्य पञ्चबाणाः प्रकीर्तिताः'. विजिता...निवसता (going with मगधराजेन) who was living in Pushpapura that eclipsed (lit. that conquered) the city of the immortals (*i. e.* Indra's capital Amarâvatî). अनन्त...लालिता (1) fondled by endless enjoyments, as going with Vasumatî, the queen. (2) fondled on the

hoods of Ananta, or supported on his hoods (भोगः) by Ananta (the lordly serpent also known as Shesha), as going with Vasumatî, the earth. यथासुखमन्वभावि was enjoyed so as to taste all kinds of pleasure. The idea is the king of the Magadhas enjoyed his queen as he enjoyed the earth. The adjective अनन्त...लिता, being double-meaning, qualifies both these. अन्वभावि is the *passive third person sing.* of the Aorist of भू with अनु. The author's fondness for using Aorist forms may be noted. The reference is to the story of Shesha or Ananta, who is a celebrated serpent, the son of Kadru and Kashyapa, and who at the request of Brahmâ has taken upon himself the task of supporting the earth on his hood. Vide म. भा. आदिपर्व 36. 19 'इमां महीं शैलवनोपपन्नां ससागरग्रामविहारपत्तनाम्। त्वं शेष सम्यक्चलितां यथावत्संगृह्य तिष्ठस्व यथाऽचला स्यात्'; also 'किं शेषस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्' Mu. 2. 16.

Par. 2 परमविधेयाः extremely obedient. 'विधेयो विनयग्राही वचनेस्थित आश्रवः' अमरः. Wilson explains the word as 'परमं विधेयं कार्यं येषां ते charged with great offices.' नामधेयम् (name) is the same as नामन्. The affix धेय is added to भाग, रूप and नामन् without any change of meaning, according to the Vârtika 'भागरूपनामभ्यो धेयः'. धीर...साहित्याः (1) who with their firm understanding despised the association or co-operation (साहित्यं) of (even) the preceptor of the gods (*viz.* Brihaspati) in the business to be discussed. धीरधिषणया अवधीरितं विबुधाचार्यस्य विचार्ये कार्ये साहित्यं यैस्ते, where विबुधाचार्यस्य is to be costrued with साहित्यम्. The idea is if any intricate points of state policy occurred over which it was necessary for them to hold deliberations and if at this time Brihaspati were to offer his co-operation to them to solve the difficulties, they would indignantly refuse it as being an insult to their firm understanding. They could dispense with the services of even Brihaspati in involved affairs *i. e.* they were equal or even superior to him. (2) who with their firm understanding counted as of no account (lit. despised) the co-operation (to be given by them) to the affair that requires to be seriously thought of by Brihaspati. धीरधिषणया अवधीरितं विबुधाचार्येण विचार्ये

